ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः	भवसं. २।५२
ज्ञानशक्तिश्चेतनाशक्तिः क्षेत्रशक्तिरिच्छान्तर्भूत्वा माया सत्त्वरजस्तमोमयी	राधिको. ९
ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः। ज्ञानमेव परंतेषां पवित्रं ज्ञानमीरितम्(उच्यते)[ब्रह्मोप.११ [+ना. प. ३।८३	+परब्र.१३
ज्ञानशौचं परित्यज्य बाह्ये यो रमते नरः।..लोष्ठं गृह्णाति सुव्रत	जा. द. १।२२
ज्ञानसङ्कल्पनिश्चयानुसन्धानाभिमाना आकाशकार्यान्तःकरणविषयाः	त्रि. ब्रा. १।४
ज्ञानसङ्गेन चानघ	भ. गी. १४।६
ज्ञानसञ्छिन्नसंशयम्	भ. गी. ४।४१
ज्ञानसंहारसंयुक्तंशक्तिद्वयसमन्वितम्	पञ्चब्र. ७
ज्ञानस्वरूपमेवादौ ज्ञानं ज्ञेयैकसाधनम्। ज्ञातंयेननिजंरूपंकैवल्यं..	१यो. त. १६
ज्ञानस्वरूपमेवादौ ज्ञेयं ज्ञानैकसाधनम्। अज्ञानं कीदृशं चेति प्रविचार्य..	यो. शि. १।१४

ज्ञानस्वरूपमेवाहुर्जगदेतद्विलक्षणम् । अर्थस्वरूपमज्ञानात्पश्यन्त्यन्ये कुदृष्टयः	ज्ञा. द. ६।४९
ज्ञानं कर्म च कर्ता च	भ. गी.१८।१९
ज्ञानं केचिद्वदन्त्यत्र केवलं, तन्न सिद्धये । योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः	यो. शि. १।१२
ज्ञानं चेदीदृशं ज्ञातमज्ञानं कीदृशं पुनः	यो. शि. ५।२४
ज्ञानं ज्ञानवतामहम्	भ. गी.१०।३८
ज्ञानं ज्ञेयं च केशव	भ. गी. १३।२
ज्ञानं ज्ञेयं च विज्ञेयं सदा बुद्धैः प्रकीर्तितम्	अ. शां. ८८
ज्ञानं ज्ञेयं ज्ञानगम्यं	भ. गी.१३।१८
ज्ञानं ज्ञेयं ज्ञानगम्याद्तीतं शुद्धं बुद्धं मुक्तमप्यव्ययं च । सत्यं ज्ञानं.. ध्यायेदेवं तन्महो..	शु.र. २।५
ज्ञानंज्ञेयंचिदात्मकम् । तदेव केवलीभावं ततोऽन्यत्सकलं मृषा	महो. ४।६३
ज्ञानंज्ञेयंचिदेवहि । ज्ञाताचिन्मात्ररूपश्च सर्वं चिन्मयमेव हि	ते.बिं. २।२९
ज्ञानं ज्ञेयं परिज्ञाता	भ.गी. १८।१८
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः	शांडि. १।७।२२
ज्ञानं ज्ञेयैकसाधनम्	१यो.त. १६
ज्ञानंतपोऽग्निराहारो मृन्मनोवार्युपाञ्जनम् । वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम्	भवसं. ३।२१
ज्ञानंतुजन्मनैकेन योगादेवप्रजायते । तस्माद्योगात्परतरो नास्ति मार्गस्तु मोक्षदः	यो.शि. १।५३
ज्ञानं तेऽहं सविज्ञानं	भ.गी. ७।२
ज्ञानंनामोत्पत्तिविनाशरहितंनैरन्तर्यं चैतन्यं ज्ञानमित्युच्यते	सर्वसा. ६
ज्ञानं नारायणः परः	ना.पू.ता. १।४
ज्ञानंबुद्धिश्च । ज्ञानंमोक्षैककारणम्	कौलो. १
(तर्हि)ज्ञानंब्राह्मणइतिचेत् , तन्न; क्षत्रियादयोऽपिपरमार्थदर्शिनोऽभिज्ञा बहवः सन्ति	व.सू. ६
ज्ञानं माता विज्ञानं पिता, सगुणब्रह्मनिर्गुणब्रह्मार्पितं..	अद्वैतो. ५
ज्ञानं मोक्षैककारणम्	कौलो. १
ज्ञानं यदा तदा विद्यात्	भ.गी. १४।११
ज्ञानं योगात्मकंविद्धि योगश्चाष्टाङ्गसंयुतः । संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः	भवसं. ३।१३
ज्ञानं लब्ध्वाऽचिरादेव मामकं धाम यास्यसि	मुक्तिको. १।२७
ज्ञानं लब्ध्वा परां शान्ति	भ.गी. ४।३९
ज्ञानं विज्ञानमास्तिक्यं	भ.गी. १८।४२
ज्ञानं विज्ञानसहितं	भ.गी. ९।१
ज्ञानं शरीरं वैराग्यं जीवनं विद्धि	ना. प. ६।१
ज्ञानं सम्यगवेक्षणम् । तस्मिन् (चित्ते ज्ञानेन) निरोधितेनूनमुपशान्तं मनो भवेत्	शांडि. १।७।२४
ज्ञानाग्निदग्धकर्माणं	भ.गी. ४।१९
ज्ञानाग्निदग्धदेहस्य न च श्राद्धं न च क्रिया	पैङ्गलो. ४।७
ज्ञानाग्निः शुभाशुभं च कर्म विन्दति	गर्भो. ११
ज्ञानाग्निः सर्वकर्माणि	भ.गी. ४।३७
ज्ञानात्सायुज्यमेवोक्तं तोये तोयं यथा तथा	ब्र.वि. ५७
ज्ञानात्सिद्धिर्मुक्तिरिति गुरोर्ज्ञानं च लभ्यते	अमन. २।५
ज्ञानात्स्वरूपंपरमंहंसमंत्रंसमुच्चरेत् । प्राणिनां देहमध्येतु स्थितो हंसः सदाऽच्युतः	ब्र.वि. ५९
ज्ञानादेव विमुच्यते (संसारः)	१यो.त.१६
ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि मानवः । ब्रह्महत्याश्वमेधाद्यैः पुण्यपापैर्न लिप्यते	ब्र. वि. ५०
ज्ञानोद्योगपरिक्लेशं कुप्रावरणभोजनम् । कुचर्यां कुनिवासं च मोक्षार्थी न विचिन्तयेत्	शिवो. ७।११७
ज्ञानाद्ध्यानं विशिष्यते	भ.गी. १२।१२
ज्ञानानन्दघनोऽस्म्यहम्	ते. बिं. ३।३१
ज्ञानानन्दोऽहमद्वयः	ते. बिं. ६।६०

ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी । यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता	दे०यु. २१
ज्ञानानां ज्ञानमुत्तमम्	भ. गी. १४।१
ज्ञानान्मुक्तिमवाप्नुयात्	शिवो. ७।७४
ज्ञानामृततृप्तयोगिनो न किञ्चित् कर्तव्यमस्ति, तदस्ति चेन्न स तत्त्वविद्भवति	पैङ्गलो. ४।९
ज्ञानामृतरसो येन सकृदास्वादितो भवेत् । स सर्वकार्यमुत्सृज्य तत्रैव परिधावति	जा. द. ६।४८
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। न चास्ति किञ्चित्कर्तव्यं..	जा. द. १।२३
ज्ञानावस्थितचेतसः	भ. गी: ४।२३
ज्ञानिनस्तत्त्वदर्शिनः	भ. गी. ४।३४
ज्ञानिनामूर्ध्वगो भूयादज्ञाने स्यादधोमुखः। एवं वै प्रणवस्तिष्ठेत्	यो. चू. ७८
ज्ञानिनां ज्ञानदा सत्यं दानवानां विनाशिनी (महालक्ष्मीः)	ना. पू.ता.२।३
ज्ञानिनो नित्यवैरिणा	भ. गी. ३।३९
ज्ञानिनो हृदयं मूढैर्ज्ञातं चेत् कल्पनं तदा । ध्यानेन सागरे पीते निःशेषेण जगद्भवेत्	ते. बिं. ६।९६
ज्ञानिभ्योऽपि मतोऽधिकः	भ. गी. ६। ४६
ज्ञानी च भरतर्षभ	भ. गी. ७।१६
ज्ञानी त्वात्मैव मे मतम्	भ. गी. ७।१०
ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयम् । सर्वज्ञता हि सर्वत्र भवतीह महाधियः	अ. शां. ८९
ज्ञानेन ज्ञेयमालोक्य पश्चाज्ज्ञानं परित्यजेत्	ब्र. वि. ३६
ज्ञानेन तु तदज्ञानं	भ. गी. ५।१६
ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि संस्थिते देहे लब्धाशान्तिपदं गते तदा प्रभामनोबुद्धिशून्यं भवति	पैङ्गलो. ४ ।९

ज्ञानेनाकाशकल्पेन धर्मान्योगगनोपमान् । ज्ञेयाभिन्नेन सम्बुद्धस्तं वन्दे द्विपदां वरम्	अ.शां. १
ज्ञानेनाज्ञानकार्यस्य स मूलस्यलयो यदि । तिष्ठत्ययं कथं देह इति शङ्कावतोजडान् । समाधातुंबाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः	अध्यात्मो. ५९
ज्ञानेनैव विना योगो न सिद्ध्यति कदाचन । जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते	यो.शि. १।५२
ज्ञानेनैव हि संसारविनाशो नैव कर्मणा	रुद्रहृ. ३५
ज्ञानेन्द्रियकर्मेन्द्रियान्तःकरणचतुष्टयं चतुर्दशकरणयुक्तं जाग्रत्	शारीरको. १०
(अथ)ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं वियदादिपञ्चकमन्तःकरणचतुष्टयं कामकर्मतमांस्यष्टपुरम्	पैङ्गलो. २।६
ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्लोचनादयः	वराहो. १।२
ज्ञानेन्द्रियैःसहबुद्धिर्विज्ञानमयकोशः	पैङ्गलो. २।५
ज्ञानेन्द्रियैःसह मनो मनोमयकोशः	पैङ्गलो. २।५
ज्ञाने परिसमाप्यते	भ.गी. ४।३३
ज्ञानैर्बिभर्ति ज्ञायमानं च पश्येत्	श्वेता. ५।२
ज्ञानोदयात्पुरारब्धं कर्मज्ञानान्न नश्यति। अदत्वास्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत्	अध्यात्मो. ५३
ज्ञेयं वस्तुपरित्यागाद्विलयं याति मानसम् । मानसे विलयं याते कैवल्यमवशिष्यते	शांडि.१।७।२३
ज्ञेयं चाज्ञेयं च विकल्पासहिष्णु तत्सशक्तिकं गजवक्त्रं गजाकारं जगदेवावरुन्धे	ग.शो. ३।२
ज्ञेयं चोक्तं समासतः	भ.गी. १३।१९
ज्ञेयं यत्तत्प्रवक्ष्यामि	भ.गी. १३।१२
ज्ञेयं सर्वप्रतीतं च तज्ज्ञानं मन उच्यते । ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः	शांडि. १।७।२२

ज्ञेयः स नित्यसंन्यासी	भ.गी. ५।३
ज्ञेयोऽसि नियतात्मभिः	भ.गी. ८।२

झ

झषाणां मकरश्चास्मि	भ.गी. १०।३१
ज्ञोऽमृतोहुतसंवित्कः शुद्धः संविष्टो निर्विघ्न इममसुनियमेऽनुभूय इहेदं सर्वं दृष्ट्वा.. स प्रपञ्चहीनः..	नृसिंहो. ३।२

ण

णकारो भगवान् भवति (नारायणः)	तारसा. १।४

त

त इमेऽवस्थिता युद्धे	भ.गी. १।३३
त इमे सत्याः कामा अनृतापिधानाः	छान्दो. ८।३।१
त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा..यद्यद्भवन्ति तदा भवन्ति [छान्दो. ६।९।३	+६।१०।२
त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते	छान्दो. ५।१०।६
त ऋषयोऽभवंस्तदृषीणामृषित्वम्	सद्वै. १३
त ऋषीनब्रुवन्–नमोवोऽस्तु भगवन्तोऽस्मिन्धामनिकेनवःसपर्यामीति	सद्वै. ११
त एतस्यैव सर्वे रूपमभवन्	बृह. १।५।२१
त एतदेवरूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति [छान्दो. ३।६।२+७।२+८।२	+९।२+१०।२
त एतं ब्रह्मयज्ञमपश्यंस्तमाहरन्	सद्वै. १३
त एतानि सूक्तान्यपश्यन् यद्वा देवहेळनं यद्दीव्यं..	सद्वै. ११
त एतावन्तो भवन्ति (पशवः) यथाप्रज्ञं हि संभवाः	१ऐत. ३।२।४
त एते सर्व एव समाः सर्वेऽनन्ताः स यो हैताननन्तवत उपास्तेऽनन्तं लोकं जयति	बृह. १।५।१३
त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया..ब्रह्मवर्चसेनाद्येनचतर्पयन्ति	सद्वै. १४
त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यंते	प्रश्नो. १।९
त एव भूमतां प्राप्ताः संशान्ताशेषकिल्बिषाः..येयाता विमनस्कताम्	महो. ५।६०
त एवमेवानुपरिवर्तन्ते	बृह. ६।२।१६
त एवैनमुपमन्त्रयते दद्याम त इति	कौ.उ. २।१,२
त एषु लोकेष्वस्पर्धन्त	बृ. उ. १।३।१
त ऐक्षन्त हन्तैनमासुरं पाप्मानं ग्रसाम इति	नृसिंहो. ६।१
त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति	केनो. ३।१
तकारस्तारलक्ष्म्या च वैराजः प्रस्तरः स्मृतः। इकाररूपिणी...महामाया... अव्यक्तस्वरूपा भवतीति सीतेत्युदाहरन्ति	सीतो. २,३
तक्रं क्षीरस्वरूपं चेत्कचिन्नित्यं जगद्भवेत्	ते.बिं. ६।८०
तक्ष्णुवन्ति वासीभिः कृण्वति फलीभिर्न हैव शक्नुवत इति	आर्षे. १।२
तच्च कारणमेकं हि न भिन्नं नोभयात्मकम्। भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात्।	पञ्चब्र. १२
तच्चक्रमध्ये पापपुण्यप्रचोदितो जीवो भ्रमति	शांडि. १।४।४
तच्चक्षुषाऽजिघृक्षत्, तन्नाशक्नोच्चक्षुषा ग्रहीतुम्	२ ऐत. ३।५
तच्च न मुख्योऽस्ति, कोऽयं मुख्य इति च हृदयं मुख्यः..	प.हं.प. २
तच्च निरतिशयानन्दाखण्डब्रह्मानन्दनिजमूर्त्याकारेण ज्वलति	त्रि.म.ना. १।४
तच्च संस्मृत्य संस्मृत्य	भ.गी. १८।७७
तच्चानन्दसमुद्रमग्ना योगिनो भवन्ति, तदपेक्षया इन्द्रादयःस्वल्पानन्दाः	मं.ब्रा. २।९
तच्चानिर्वाच्यमनिर्देश्यमखण्डानन्दैकरसात्मकं भवति	त्रि.म. ना. १।४
तच्चालौकिकपरमानन्दलक्षणाखण्डामिततेजोराशिर्ज्वलति	त्रि.म.ना. १।४
तच्चित्स्वरूपं निर्विकारमद्वैतं च	ग.शो. ४।२
तच्चेज्जिज्ञास्यसि मावगच्छेति (ब्रह्मतेजः)	अव्यक्तो. २
तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं..	बृह. ३।७।१

तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जितः। क्षराक्षरविहीनो यो नादान्तर्ज्योतिरेव सः	ते.बि. ५।६
तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः [सहवै. २५+ [ऋ. खि. १०।१९१।५	चित्यु. शां.
तच्छान्तमशब्दमभयमशोकमानन्दं विष्णुसंज्ञितं सर्वापरं धामेति	मैत्रा. ७।३
*तच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं मतम्। तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम्	मुक्तिको. २।१
तच्छिश्नेनाजिघृक्षत्, तन्नाशक्नोत्..	२ ऐत. ३।९
तच्छुद्धमप्राप्यं प्राप्यंच ज्ञेयंचाज्ञेयं च	ग.शो. ३।३
तच्छुद्धं तच्छबलम्, ततः प्रकृतिमहत्तत्त्वानि जायन्ते	ग.शो. २।५
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः	मुण्ड. २।२।९
तच्छियो(तच्छिरो)ऽश्रयत, यच्छिरोऽभवत्	१ऐत. १।४।२
तच्छ्रीरित्युपासीत, यश इत्युपासीत	कौ. उ. २।६
तच्छ्रेयो रूपमत्यसृजत	बृह. १।४।११
तच्छ्रोत्रेणाजिघृक्षत्। तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम्	२ऐत. ३।६
तज्जपाल्लभते पुण्यं नरोरुद्राक्षधारणात्	रु. जा. ६
तज्जापकानां वाक्सिद्धिःश्रीसिद्धिः...	हयग्री. ६
तज्ज्ञः कर्मफलेनान्तस्तथा नायाति रञ्जनम्	अ. पू. ५।९८
तज्ज्ञानप्रवाहाधिरूढेन ज्ञेयम्	मं. ब्रा. २।१
तज्ज्ञानं विद्धि राजसम्	भ. गी.१८।२०
तज्ज्ञानं विद्धि सात्त्विकम्।	भ. गी.१८।२१
तज्ज्ञानेन संसारनिवृत्तिः	मं. ब्रा. १।४
तज्ज्ञानेन हि विजानीहि, य एको देव आत्मशक्तिप्रधानः सर्वज्ञः सर्वेश्वरो भूतान्तरात्मा..	शाण्डि. २।४
(उत) तटस्थो द्रष्टा तटस्थो न द्रष्टा द्रष्टृत्वान्न द्रष्टैव	ना. प. ६।६

तडित्सु शरदभ्रेषु गन्धर्वनगरेषु च। स्थैर्यं येन विनिर्णीतं स विश्वसतु विग्रहे	महो. ३।३२
तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा। नश्यति क्रियया विप्र पुरुषस्य तथा मलम्।	महो. ५।१८५
तत उपनिषदः श्रुतय आविर्बभूवुः	गोपीचं. २७
तत उपरि पूर्णचन्द्रमण्डलम्	मं. ब्रा. २।३
तत उपस्थगुदयोर्न्येतन्मूत्रपुरीषं कस्मादाहारापानसिक्तत्वादनुपचति	निरुक्तो. २।१
तत उ ह बालाकिः समित्पाणिः प्रतिचक्रमे उपायानीति	कौ. उ.४।१८
तत उ हैनं यष्ट्या विचिक्षेप स तत एव समुत्तस्थौ	कौ. उ. ४।१८
(अथ) तत ऊर्ध्वं उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता	छांदो.३।११।१
तत एकशफमजायत	बृह.१।४।४
(उद्धैव) तत एत्यगदो हैव भवति	छांदो. ३।१६।६
तत एव उदेत्य नैवोदेता (मा. पा.)	छां.उ.३।११।१
तत एव च विस्तारं	भ. गी.१३।३१
तत एव पवमानपावकशुचय आविष्कृतमेतेनास्य यज्ञम्	मैत्रा. ६।३४
तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः.	छान्दो.६।१६।२
तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति	छांदो. ६।१६।१
तत एवास्य भयं वीयाय, कस्मादभेष्यत्	बृह. १।४।२
तत ओङ्कारमपश्यत्ततो व्याहृतीस्ततो गायत्री, गायत्र्या वेदास्तैरिदमसृजत्	गोपीचं. २७
तत ओषधयोऽन्नं च ततः पिण्डाश्चतुर्विधाः	त्रि. ब्रा. २।५
तत एतन्नामधेयं लेभे (वसिष्ठ इति)	१ऐत. २।४।१
ततश्चतुर्जालं ब्रह्मकोशं प्रणुनेत्..	मैत्रा. ६।२८
ततश्चतुर्जालं ब्रह्मकोशं भिन्दद्ततः परमाकाशम्	मैत्रा. ६।३८

---

*'उच्छास्त्रं' इति पाठान्तरं, तदेव साध्विति भाति, तृतीयचरणे तथैवोक्तत्वात्, उकारवाक्येषु तथोल्लेखाच्च। [पृ.९८पं.३०]

ततश्च दशमे मासि प्रजायते। जातश्च वायुना स्पृष्टो न स्मरति जन्ममरणम् (गर्भः)	निरुक्तो. १।८
ततश्च महदाख्या ब्रह्मणो महामायासम्मीलनात् पञ्चभूतेषु गन्धवती पृथिव्यासीत्	गोपीचं. ८
ततश्चन्द्रः प्रजापतिशक्रौ,ततो माया (भवति)	कामराज. १
ततश्च हृद्देशे महान्तं पुरुषं गजवक्त्रं ..श्रीहृत्कं..दृष्ट्वा स्तुवन्तिस्म	ग. शो. ४।७
ततश्चाग्रे कोटिसूर्यप्रकाशमानन्दरूपं गजवक्त्रं विलोकयति	ग. शो. ३।६
ततश्चात्मानमिति मन्यते स्म । न चैवमतः परं किञ्चित्	ग. शो. ३।६
ततश्चाधःप्रदेशे दश दिक्षु भ्रमन्तो न कञ्चित् पश्यन्ति स्म	ग. शो. ४।६
ततश्चाप्रमादेन निवसेत् ... काश्यां लिङ्गरूपिण्याम्	भस्मजा. २।१६
ततश्चाहङ्कारादिपञ्चतन्मात्रा जायन्ते	ग. शो. २।५
ततश्चाहृतं वासः परिधत्ते पाप्मनोपहत्यै	भस्मजा. २।२
ततश्चैकादशाहेन लयस्थस्य लयोदयात् । मनसा सहितः सोऽपि गंतुमिच्छति दूरतः	अमन. १।६१
ततश्चोमिति ध्वनिरभूत्स गजाकारः	ग. शो. ४।६
ततस्ततो नियम्यैतत्	भ गी. ६।२६
ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः...प्रत्याहारः स विज्ञेयः..	ते.त्रि. १।३३
ततस्तस्मान्निर्विशेषमतिनिर्मलंभवति	त्रि.म.ना. ४।१
ततस्तादृग्गुणगतं मनो भावयति क्षणात्। गन्धतन्मात्रमेतस्मात्..	महो. ५।१५१
ततस्तु तं पश्यते निष्कलं ध्यायमानः (आत्मानं)	मुण्ड. ३।१।८
ततस्तुतांपश्यतिनिष्कलांच (ज्ञानेन)	गुह्यका. ३७
ततस्तु सम्बभूवासौ यद्गिरामप्यगोचरः । यच्छून्यवादिनां शून्यं..	अ.पू. ३।१९
ततस्तेजोहिरण्मयमण्डलम् । तत्र ब्रह्मा चतुर्मुखोऽजायत	महो. १।४
ततस्तेमुक्तामामनुविशन्ति विज्ञानमयेनाङ्गेन, न पुनरावर्तन्ते	भस्मजा. २।१५
ततस्त्रयोदशाहेनलयेनापि.. सिद्धि लभते चिन्तनादपि	अमन. १।६३
ततःकनीयसाएवदेवाज्यायसाअसुराः	बृह. १।३।१
ततःकराग्रेणाहङ्कारंसृष्टवान् (गणेशः)	ग.शो. ४।३
ततःकण्ठान्तरे योगी समूहन्नाडिसञ्चयम्	क्षुरिको. १५
ततःकालवशादेव ह्यात्मज्ञानविवेकतः । योगाभ्यासं स्थितश्चरन्...	त्रि.ब्रा. २।१८
ततः कालवशादेव प्रारब्धेतु क्षयंगते। ब्रह्मप्रणवसन्धानंनादोज्योतिर्मयः शिवः । स्वयमाविर्भवेदात्मा..	ना.बि. २९
ततः कालवशादेवप्रारब्धेतुक्षयंगते । वैदेही मामकीं मुक्ति यान्ति...	मुक्तिको. १।४
ततः कुरु यतात्मवान्	भ.गी. १२।११
ततः कूर्चं व्योम षष्ठस्वरबिन्दुमेलनरूपम्	तारोप. ३
ततः कृशवपुःप्रसन्नवदनो..निर्मुक्तरोगजालो जितबिन्दुः पट्वग्निर्भवति	शांडि.१।७।१४
ततः क्षत्रं बलमोजश्च जातम्	चित्यु. ११।९
ततः पक्वकषायेण नूनंविज्ञातवस्तुना । शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निराधिना	मुक्तिको.२।३१
ततः पतिश्च पत्नी चाभवता तस्मादिदमर्धबृगलमिव..	बृह. १।४।३
ततः पदं तत्परिमार्गितव्यम्	भ.गी. १५।४
ततः पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः ।...प्राणं घ्राणेन रेचयेत्	यो. कुं. १।३२
ततः परतरं शुद्धं व्यापकं निर्मलं शिवम् । सदोदितं परं ब्रह्म..	ना.बि. १७
ततः परमेष्ठी व्यजायत,सोऽभिजिज्ञासत किंमेकुलं किंमेकृत्यमिति	अव्यक्तो. १
ततः परं ब्रह्म परं बृहन्तं यथानिकायं सर्वभूतेषु गूढम् । ..ईशं तं ज्ञात्वाऽमृता भवन्ति	श्वेता. ३।७

ततः परिचयावस्था जायतेऽभ्यासयोगतः	५यो. त. ८१
ततः पावित्रं परमेश्वराख्यमद्वैतरूपं... (आत्मरूपं दृश्यते)	पैङ्गलो. ४।११
ततः पीयूषमिव विषं जीर्यते	शांडि.१।७।४३
ततः पुण्यवशात्सिद्धो गुरुणा सहसङ्गतः ।..सत्वरं फलमश्नुते	यो.शि.१।१४२
ततः पूर्वापरे व्योम्नि...नारायणमनुध्यायेत्स्रवन्तममृतं सदा	यो.शि. ५।४३
ततः पृथ्व्यप्तेजोवाय्वाकाशानि पञ्चमहद्भूतानि जायन्ते	ग. शो. २।५
ततः प्रकाशते परं ब्रह्म मेघापायेंऽशुमानिव	कलिसं.
ततः प्रकृतिमहत्तत्त्वानि जायन्ते	ग.शो.२।५
ततः प्रक्षाल्य (हस्तौ) तद्भस्मापः पुनंत्विति पिबेत्	भस्मजा. १।५
ततः प्रजाः प्रजायन्ते य एवं वेद.. प्रत्यग्ज्योतिष्यात्मन्येव रन्ताऽरम्	अव्यक्तो. ७
ततः प्रणतोमायानुकूलेनहृदामह्यमष्टादशार्णस्वरूपं सृष्टये दत्त्वाऽन्तर्हितः	गो. पू. ३।८
ततः प्रद्युम्नसंज्ञं मन आसीत् । तस्मादहङ्कारनामाऽनिरुद्धः	सङ्कर्षणो. १
ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा । गद्यपद्यात्मकैः शब्दैः...	सरस्व. ३३
ततः प्रवेशयामास जनकः शुकमङ्गणे । तत्राहानि सप्तैव तथैवावसदुन्मनाः	महो. २।२३
ततःप्रवेशयामासजनकोऽन्तःपुराजिरे । राजा न दृश्यते तावत्..	महो. २।२४
ततः प्रव्रज्य शुद्धात्मा सञ्चरेद्यत्रकुत्रचित् ।...सम्पश्यन्हि जनार्दनम्	ना.प. ५।४८
ततः प्रव्रज्याज्यं धृतिदण्डं धनुर्गृहीत्वाऽनभिमानमयेन चैवेषुणा..	मैत्रा. ६।२८
ततः प्राणमयो ह्यात्मा विभिन्नश्चान्तरः स्थितः । ततो विज्ञान आत्मा तु..आनन्दमय आत्मा तु ततोऽन्यः	कठरु. २१
ततः प्राणोऽजायत स इन्द्रः	बृह. १।५।१२
ततः शङ्खाश्च भेर्यश्च	भ. गी. १।१३
ततःशरीरेलघुदीमिवह्निवृद्धिनादाभिव्यक्तिर्भवति	शांडि. १।५।२
ततः शुद्धश्चिदेवाहं व्योमवन्निरुपाधिकः । जीवेश्वरादिरूपेण..	वराहो. २।५३
ततः शुद्धःसत्त्वान्तरस्थमचलममृतमच्युतं ध्रुवं विष्णुसंज्ञितं स्वमहिम्नि तिष्ठमानं पश्यति	मैत्रा. ६।३८
ततः शुभाशुभकर्माणि सर्वाणि सवासनानि नश्यंति	त्रि.म.ना. ५।५
ततः शुष्कवृक्षवन्मूर्च्छानिद्रामयनिःश्वासोच्छ्वासाभावान्नष्टद्वन्द्वः ..मनः प्रचारशून्यं परमात्मनि लीनं भवति	मं.ब्रा. ३।२
ततः शून्यं च द्वौ दिवाकरहरौ तदनु गोत्रभृन्माया...	कामरा. १
ततः श्वेतैर्हयैर्युक्ते	भ.गी. १।१४
ततः सदाचारप्रवृत्तिर्जायते, सदाचारादखिलदुरितक्षयो भवति	त्रि.म.ना. ५।४
ततः सद्गुरुकटाक्षमंतःकरणमाकाङ्क्षति	त्रि.म.ना. ५।४
ततः संध्यां सकुशोऽहरहरुपासीत	भस्मजा. २।३
ततः सर्गेषुलोकेषु शरीरत्वायकल्पते	कठो. ६।४
ततः सर्वं ततः सर्वं ततः सर्वं जगत्..	ग.शो. २।५
ततः सविलासमूलविद्यासर्वकार्योपाधिसमन्विता..अव्यक्तंविशति	त्रि.म.ना. ३।७
ततः स विस्मयाविष्टः	भ.गी. ११।१४
ततः संवत्सरस्यान्ते ज्ञानयोगमनुत्तमम् । आश्रमत्रयमुत्सृज्यप्राप्तश्च परमाश्रमम्	ना.प. ६।३४
ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् । तत्स्वं रूपं भवेत्तस्य विषयो मनसो गिराम्	ते.बि. १।२९
ततः सावरणं ब्रह्माण्डं विनाशमेति	त्रि.म.ना. ३।५
ततः सुदुर्निरीक्षोऽभवत् (इन्द्रः) तस्मै विद्यामानुष्टुभीं प्रादात् प्रजापतिः	अव्यक्तो. ८
ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् । अनाख्यमनाभिव्यक्तं सत्किञ्चिदवशिष्यते	महो. २।६५
ततः स्थावरजङ्गमात्मकंजगद्भविष्यति	मुद्गलो. २।५
ततः स्वकार्यान्सर्वप्राणिजीवान्सृष्ट्वा पश्चाद्याः प्रादुर्भवन्ति	मुद्गलो. २।५

ततः स्वधर्मं कीर्तिं च	भ. गी. २।३३
ततः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम् (पितरः श्राद्धाकर्तारं)	इतिहा. ९३
ततः स्वमनसः स्थैर्यं मनसा विगतैनसा। अहो नु चञ्चलमिदं प्रत्याहृतमपि स्फुटम्	अ. पू. ३।५
तते ब्रह्मघने नित्ये सम्भवन्ति न कल्पिताः। न शोकोऽस्ति न मोहोऽस्ति..न जरास्ति न जन्म वा	महो. ६।१३
ततो गावोऽजायन्त, वडवेतराऽभवत्	बृह. १।४।४
ततोऽङ्गसंविदं स्वच्छां प्रतिभासमुपागताम्। सद्योजातशिशुज्ञानं प्राप्तवान्मुनिपुङ्गवः	अ. पू. ३।१५
ततो जलाद्भयं नास्ति जले मृत्युर्न विद्यते	१ यो. त. ९०
ततो जालन्धरो बन्धः कर्मदुःखौघनाशनः	ध्या. बि. ७८
ततोऽजावयोऽजायन्त, एवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत	बृह. १।४।४
ततो दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलाम्। निरुध्य पूरयेद्वायुमिडया तु शनैः शनैः	१ यो. त. ३६
ततो दुःखतरं नु किम्	भ. गी. २।३६
ततो दृढतरशुद्धसात्त्विकवासनया भक्त्यतिशयो भवति	त्रि. म.ना.५।५
ततो दृढतरा वैष्णवी भक्तिर्जायते	त्रि. म.ना.५।४
ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते। ब्रह्मणः प्रलयेनापि न सीदति महामतिः	१यो. त.१०३
ततो देवः प्रीतो भवति स्वात्मानं दर्शयति [नृ.पू. ४।३६+	रामो. ४।४८
ततो देवा अभवन् परासुरा..	बृह.१।३।७
ततो देवास्तमाधिपत्यायानुमेनिरे	अव्यक्तो. ८
ततो देवी स्वात्मानं दर्शयति	आथ. द्वि. २
ततोऽधिकतराभ्यासाद्भूमित्यागश्च जायते। पद्मासनस्थ एवासौ भूमिमुत्सृज्य वर्तते	१यो. त. ५४
ततोऽधिकतराभ्यासाद्बलमुत्पद्यते बहु। येन भूचरसिद्धिः स्याद्भूचराणां जये क्षमः	१ यो. त. ५८
ततोऽधिकतराभ्यासाद्दार्दुरी स्वेन जायते। यथा च दर्दुरो भाव उत्प्लुत्योत्प्लुत्य गच्छति	१ यो. त.५३
ततो न जपो न माला नासनं न ध्यानावाहनादि	ग.शो. ता.५।६
ततो नवरत्नप्रभामण्डलम्	मं. ब्रा. २।३
ततो निधनपतयेत्रयोविंशज्जुहोति च	बृ. जा. ३।१४
ततो निधनसामान्यादन्तःसामिकानि निधनानि...	संहितो. ३।१
ततो निरात्मकत्वमेति, निरात्मकत्वान्न सुखदुःखभाग्भवति	मैत्रा. ६।२१
ततो नैकञ्चन वेदेति। कतमे त इति ह प्रतीकान्युदाजहार	बृह. ६।२।३
ततोऽन्नमभिजायते। अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्	मुण्ड. १।१।८
ततोऽन्यद्विभक्तं यच्छृणुयाम्	बृह. ४।३।२७
ततोऽन्यद्विभक्तं यज्जिघ्रेत्	बृह. ४।३।२४
ततोऽन्यद्विभक्तं यद्रसयेत्	बृह. ४।३।२५
ततोऽन्यद्विभक्तं यत्पश्येत्	बृह. ४।३।२३
ततोऽन्यद्विभक्तं यद्वदेत्	बृह.४।३।२६
ततोऽन्यद्विभक्तं यद्विजानीयात्	बृह. ४।३।३०
ततोऽन्यद्विभक्तं यत्स्पृशेत्	बृह. ४।३।२९
ततोऽन्यद्विभक्तं यन्मन्वीत	बृह. ४।३।२८
ततोऽन्यश्चान्तरःस्वतः (विज्ञानात्मा)	कठरु. २१
ततोऽपश्यज्ज्योतिर्मयं श्रियाऽऽलिङ्गितं सुपर्णस्थं.. मृगमुखं नरवपुषं...	अव्यक्तो. ३
ततोऽपिधारणाद्वायोः क्रमेणैव शनैः शनैः। कम्पो भवति देहस्य..	१ यो. त. ५२
ततो ब्रह्मोपदिष्टं वै सच्चिदानन्दलक्षणम्। जीवन्मुक्तः सदा ध्यायन्नित्यस्त्वं विहरिष्यसि	शु. र. ३।१७
ततो ब्राह्मणः संयोगं संयुयुजे, तमादित्यात्पुरुषो भास्करवर्णो निष्क्राम्य स एतं माहयाञ्चकार	इतिहा. १

ततो भवति भारत	भ. गी. १४।३
ततो भवेद्घटावस्था पवनाभ्यासतत्परा । प्राणोऽपानो मनो बुद्धिर्जीवात्मपरमात्मनोः	१ यो. त. ६५
ततो भूय इव ते तमो य उ विद्यायां रताः । [ईशा. ९ +	बृह. ४।४।१०
ततोभूय इवते तमोयउसंभूत्यां रताः	ईशा. १२
ततोऽभ्यासपाटवात् सहस्रशः सदाऽमृतधारा वर्षति	पैङ्गलो. ३।२
ततो मदर्पितकर्मणां मदाविष्टचेतसां मद्रूपता भवति	भस्मजा. २।१५
ततो मध्याह्नार्कमण्डलम् (दृश्यते)	मं. ब्रा. २।३
ततो मनुष्या अजायन्त	बृह. १।४।३
ततो मया नचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्	कठो. २।१०
ततो (अविद्याशबलब्रह्मतः) महत्, महतोऽहङ्कारः, अहङ्कारात्पञ्चतन्मात्राणि	त्रि.म.ना. २।५
ततो मात्रा-प्रतिज्ञेया निमिषोन्मेष एव च	योगो. ३५
ततोऽमृतत्वमश्नुते	गोपीचं. ८
ततो मां तत्त्वतो ज्ञात्वा	भ. गी. १८।२५
ततो मे श्रियमावह लोमशां पशुभिः सह स्वाहा	तैत्ति. १।४।१
ततो यदुत्तरतरं तदरूपमनामयम् । य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति	श्वेता. ३।१०
ततो याति परां गतिम् [+१३।२९+१६।२२	भ.गी. ६।४५
ततो यान्त्यधमां गतिम्	भ. गी. १६।२०
ततो युञ्जीत मेधावी..मनः पूर्वं मनः सर्वं मनस्तस्मात् [illegible]	योगो. २।१६
ततो युद्धाय युज्यस्व	भ. गी. २।३८
ततो योगविदुत्तमाः समाधिं धर्ममेघं प्राहुः	पैङ्गलो. ३।२
ततो योषाग्नौ जायन्ते, लोकान्प्रत्युत्थायिनस्त एवमेवानु परिवर्तन्ते	बृह. ६।२।१६
ततो योऽस्य भर्गाख्यस्तं सञ्चिन्तयामि...	कौ. उ. ६।७

ततो रक्तोत्पलाभासं पुरुषायतनं महत् । तत्र सञ्चारयेत्प्राणानूर्णनाभीव तन्तुना	क्षुरिको. १०
ततो रहस्युपाविष्टः प्रणवं प्लुतमात्रया ।... जपेत्पूर्वार्जितानां तु पापानां नाशहेतवे	१ यो. त. ६३
ततो रात्रिरजायत (रात्र्यजायत) [ऋ.म.८।८।४८=मं.१०।१९०।१ [+ तै. आ. १०।१।१३	महाना. ६।१
ततो वक्ष्यामि ते हितम्	भ. गी. १८।६४
ततो वह्निशिखामण्डलं क्रमाद्दृश्यते	मं. ब्रा. २।३
ततो वायुस्थैर्यम् । तच्चिह्नानि—आदौ तारकवद्दृश्यते, ततो वज्रदर्पणम्..	मं. ब्रा. २।३
ततो विज्ञान आत्मा तु ततोऽन्यश्चान्तरः स्वतः । आनन्दमय आत्मा तु ततोऽन्यश्चान्तरः स्थितः	कठरु. २१
ततो विलीनपाशोऽसौ विमलःकमलाप्रभुः । तेनैव ब्रह्मभावेन परमानन्दमश्नुते	ना.बि. २०
ततो विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् । यत्तत्पदं.. तदेव स वासुदेवो..	गो.पू. ४।२
ततो विष्वङ्(पुरुषः) व्यक्रामत् [पु.सू. ऋ.म.८।४।१७= [वा.सं. ३१।४ +	त्रि.म.ना. ४।४ मं. १०।९०.४ चित्यु. १२।२
ततो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति (मा.पा.)	छां.उ. ५।१०।६
ततो वै गृहीतायां शक्त्यां ब्रह्मणः सृष्टिरजायत	ग.शो. ३।११
ततो वै ध्यानस्थिता अभूवन् (देवाः)	ग.शो. ४।६
ततो वै परस्परमसहमानाश्चोर्ध्वं जग्मुः (देवत्रयम्)	ग.शो. ४।६
ततो वै भूतेभ्यश्चतुर्दश लोका जायेरन्	ग.शो. ४।५
ततो वैराग्यमुदेति (भक्त्या)	त्रि.म.ना. ५।४
ततो वै सत्त्वं (विष्णुः) तामादाय जगत्पाति स्म	ग.शो. ३।१२

ततो वै सदजायत	तैत्ति. २।७
ततो वै सृष्टिमचीकरत् (ब्रह्मा)	ग.शो. ३।६
ततो वै सोऽहमभूत् । नैकाकितात्युक्तेति गुणान् निर्ममे	ग.शो. ३।४
ततो व्यैच्छत् व्येवास्मा उच्छति	अव्यक्तो. ६
ततोऽश्वः समभवत्, यदश्वत्तन्मेध्यमभूत्, तदेवाश्वमेधस्याश्वमेधत्वम्	बृह. १।२।७
ततोऽसंसक्तिनामिका (ज्ञानभूमिः)	महो. ५।२५
ततोऽसौ सन्नियोगेन निरालम्बो भवेद्यदि। तदा समरसीभूतः परमानन्द एव सः	अमन. २।९५
ततो ह बालिशा ऊचुरवात्त वा संवत्सरमिमे ब्राह्मणाः	छाग. ५।१
ततो हवै तद्रेतस्तदिमाःप्रजाःप्रजायन्ते	प्रश्नो. १।१४
ततो ह वै ते देवा रुद्रमपृच्छन्, ते देवा रुद्रमपश्यन्	अ.शिरः. ११
ततो ह वै विदाञ्चकार ब्रह्मेति(मा.पा.)	केनो. ४।१
ततोऽहंनामाऽभवत् तस्मादप्येतर्ह्यामंत्रितोऽहमयमित्युक्त्वाऽथान्यन्नाम प्रब्रूते	बृह. १।४।१
ततो हासुराः पुनरेवोद्यन्ति, ते ह माध्यन्दिनस्यैव सवनस्य पवमानेषु यज्ञवास्त्वभवन्	शौनको. ३।१
ततो हासुराः पराभवन् [शौनको.२।४+	३।४
ततो हिरण्यगर्भोऽजायत, तस्माद्दश प्रजापतयो मरीच्यादयः..अजायन्त	सङ्कर्षणो. १
ततो हृदयस्थिताः कामाः सर्वे विनश्यन्ति तस्माद्धृदयपुण्डरीककर्णिकायांपरमात्माविर्भावोभवति	त्रि. म.ना.५।४
ततो हेंद्रोऽपश्यत्, स ह गायत्रीमेव प्रतिसन्विवेश	शौनको. १।२
ततो हैव विदाञ्चकार ब्रह्मेति (इन्द्रः)	केनो. ४।१
तत्कथमिति अज्ञानप्राबल्यात्	त्रि.म.ना. ५।२
तत्कर्म कृत्वा विनिवर्त्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगम् । एकेन द्वाभ्यां त्रिभिरष्टभिर्वा.. आत्मगुणैश्चसूक्ष्मैः। आरभ्यकर्माणि	श्वेता. ६।३

तत्कर्मणा करोति [बृहज्जा. १।१+	नृ.पू. १।१
तत्कारणशरीरम् (आनंदमयकोशः)	पैङ्गलो. २।५
तत्कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा देवं (देवीं) मुच्यते सर्वपाशैः	श्वेता.६।१३
[गुह्यका. ७१+	भवसं. २।४८
तत्किं कर्मणि घोरे मां	भ.गी. ३।१
तत्कुरुष्व मदर्पणम्	भ.गी. ९।२७
तत्केन कमभिवदेत्, तत्केन कं मन्वीत, तत्केन कं विजानीयात् येनेदꣳ सर्वꣳ विजानाति, तं केन विजानीयाद्विज्ञातारम्..	बृह. २।४।१४
तत्केन कं जिघ्रेत्.. तत्कं विजानीयात्, येनेदं सर्वꣳ विजानाति, तं केन विजानीयाद्विज्ञातारं..	बृह.२।४।१४
तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्...	बृह. ४।५।१५
तत्केन कं मन्वीत	बृह. २।४।१४
तत्केन कं विजानीयात्, येनेदं सर्वꣳ विजानाति तं केन विजानीयाद्विज्ञातारं..	बृह. ४।५।१५
तत्केन कं स्पृशेत्तत्केन कं विजानीयात्...	बृह. ४।५।१५
तत्कैवल्यपदं विदुः	अ. पू.५।१९
तत्तत्कार्यकारणभेदरूपेणांशतत्त्ववाचक-वाच्य-स्थानभेद-विषय-देवताकोशभेद-त्रिभागा भवन्ति	त्रि. ब्रा. १।२
तत्क्षामये त्वामहमप्रमेयम्	भ. गी.११।४२
तत्क्षेत्रं यच्च यादृक् च	भ. गी. १३।४
तत्तज्जन्तुध्वनौ चित्तसंयमात्सर्वजन्तुरुतज्ञानं भवति	शाण्डि.१।७।५२
तत्तदेवावगच्छ त्वम्	भ. गी.१०।४१
तत्तदेवेतरो जनः	भ. गी. ३।२१
तत्तत्पदविरक्तस्य....आनन्दः स्वयं भाति	कठ. रु. ३३
तत्तत्प्राधान्येन तत्तद्व्यपदेशः, वस्तुतस्त्वभेद एव	त्रि.म.ना. १।४
तत्तत्प्राप्य शुभाशुभम्	भ. गी. २।५७

तत्तत्स्थाने (चित्तस्य) संयमात्तत्तत्सिद्धयो भवन्ति	शांडि.१।७।५२
तत्तदरश्च (तदरश्च) वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरं मदीयꣳ सरस्तदश्वत्थः	छां. उ. ८।५।३
तत्तद्देवताग्रहान्वितैः श्रोत्रादिज्ञानेन्द्रियैः..जाग्रदवस्था भवति	पैङ्गलो. २।७
तत्तद्ब्रह्ममार्गे सम्यक्सम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं.. भैक्ष्यमाचरन्..स परमहंसो नाम	जाबा. ६
तत्तद्रूपमनुप्राप्य	....
तत्तद्वृत्तिव्यापारभेदेन पृथगाचारभेदः	ना.प. ५।१२
तत्तमः खल्वीरितं तमसः संप्रास्रवति	मैत्रा. ५।५
तत्तस्माद्यज्ञोपवीत्येवाधीयीत, याजयेद्यजेत वा	सहवै. १
तत्तस्यैतत्ते यदसावादित्य ओमित्येतदक्षरस्य चैतत्तस्मादोमित्यनेनैतदुपासीत	मैत्रा. ६।४
तत्तामसमुदाहृतम्	भ.गी.१७।१९, [२२+ १८।२२,३९
तत्तारकं द्विविधं—पूर्वार्धतारकमुत्तरार्धममनस्कं चेति	अद्वयता. ४
तत्तारकं द्विविधं मूर्तितारकममूर्तितारकं चेति	अद्वयता. ५
तत्तुर्यातीतचिन्मात्रं स्वमात्रं चिन्तयेऽन्वहम्	तुरीया.शीर्षकं
तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति (मा.पा.)	छां.उ. ५।२०।२
तत्ते कर्म प्रवक्ष्यामि	भ.गी. ४।१६
तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य गुणैरैक्यं सम्पाद्य.. चिन्तयन् ग्रसेत्	नृसिंहो. ३।४
तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितꣳ सोम्य विजानीहि	छान्दो. ६।८।५
तत्तेज ऐक्षत बहु स्यां प्रजायेयेति	छान्दो. ६।२।३
तत्तेजो विद्धि मामकम्	भ.गी. १५।१२
तत्तेजोऽसृजत, तत्तेज ऐक्षत बहु स्यां..	छान्दो. ६।२।३

तत्ते पदं संग्रहेण प्रवक्ष्ये	भ. गी. ८।११
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्	कठो. २।१५
तत्त्रयोदशं प्राणं मनो विज्ञानमिति विज्ञाय तं तपसा द्वादश द्वादशानद इति सैषा दशान्नं न निघात्	तैत्ति. ३।११
तत्रैपदं ब्रह्मतत्त्वं स्वमात्रमवशिष्यते	यो. शि.शीर्ष.
तत्त्वग्रामोपायसिद्धं परतत्त्वस्वरूपकम् । शारीरोपनिषद्वेद्यं श्रीरामब्रह्म मे गतिः	शारी.शीर्ष.
तत्त्वचाऽजिघृक्षत्, तन्नाशक्नोत्त्वचा ग्रहीतुम्, स यद्धैनं त्वचाऽग्रहीष्यन्	२ ऐत.३।७
तत्त्वज्ञानं गुहायां निविष्टं ज्ञानिकृतं मार्गं सुप्तं वदन्ति	स्वसं. ३
तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च । मिथः कारणतां गत्वा	म.प. ४।८१
तत्त्वज्ञानार्थदर्शनम्	भ.गी. १३।१२
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते	ना. बिं. २२
तत्त्वतश्च शिवः साक्षाच्चिज्जीवश्च स्वतः सदा । चिच्चिदाकारतो भिन्ना न भिन्ना चित्त्वहानितः	रुद्रहृ. ४४
तत्त्वतस्त्वेक एव सन्न्यासः, अज्ञानेनाशक्तिवशात् कर्मलोपश्च.. चातुर्विध्यमुपागतः	ना.प. ५।२
तत्त्वतो जायते यस्य जातं तस्य हि जायते	अद्वैत. २७
तत्त्वतो भिद्यमाने हि मर्त्यताममृतं व्रजेत्	अद्वैत.१९
तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति केवलम् । व्यावहारिकदृष्टिस्तु	पा. ब्र. २४
तत्त्वप्रदीपप्रकाशं स्वात्मानं पश्यन् योगी मत्सायुज्यमवाप्नोति	वासुदे. ५
तत्त्वब्रह्ममार्गे सम्यक्सम्पन्नःशुद्धमानसः प्राणसन्धारणार्थं.. विमुक्तो भैक्षमाचरन्.सन्न्यासेन देहत्यागं करोति स परमहंसो नाम	याज्ञव. ३
तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः... याचिताहारमाहरन्.. समो भूत्वा निर्ममः.. सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति	ना.प.३।८७

तत्त्वत्रयस्य विज्ञानं... स्वधर्माचरणं ..मन्त्रार्थचिन्तनं श्रवणं कीर्तनम् । एते ते कथिता राजन्पारमैकान्त्यसिद्धिदाः	भवसं.५।१८
तत्त्वमसि श्वेतकेतो [छान्दो.६।८।७+ ६।९।४ —६।१४।३+शु.र.।२।३+	पैङ्गलो. ३।१
तत्त्वमसि, अहं ब्रह्मास्मि, सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चनेत्यादि महावाक्यार्थानुभवज्ञानाद्ब्रह्मैवाहमस्मीति...	निरा. ३१
तत्त्वमसि...अहंब्रह्मास्मीत्यनुसन्धानं कुर्यात्	पैङ्गलो. ३।१
'तत्त्वमसि' इत्यादिवाक्यविचारः	मठाम्ना. ३
तत्त्वमसीत्यभेदवाचकं ये जपन्ति ते शिवसायुज्यमुक्तिभाजो भवन्ति	शु.र. ३।५
तत्त्वमसीत्यहं ब्रह्मास्मीति वाक्यार्थविचारः श्रवणं...	पैङ्गलो. ३।२
तत्त्वमसीत्युपदेशेन त्वमेवाहमहमेव त्वमिति तारक...कृतार्थो भवति	मं.ब्रा. ३।२
तत्त्वमसीत्येवं सम्भाष्यते । अयमात्मा ब्रह्मेति वा..	बह्वृचो. ४
तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः	रामर. ५।१५
तत्त्वमस्यादिवाक्यानिब्रह्मणैकत्वं जगुः	पैङ्गलो.२।६
तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यति	अमन. २।१८
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः । तत्त्वीभूतस्तदा रामस्तत्त्वादप्रच्युतो भवेत्	वैतथ्य. ३९
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः	२ यो.त. २
तत्त्वमिच्छामि वेदितुम्	भ.गी.१८।१
तत्त्ववित्तु महाबाहो	भ.गी. ३।१८
तत्त्वस्य तत्त्वेन समेत्य योगम् ।	श्वेता. ६।३
तत्त्वं पूषन्नपावृणु, सत्यधर्माय दृष्टये । पूषन्नेकर्षे यम..[ईशा. १५+	बृह. ५।१५।१

तत्त्वं तत्सहजस्वभावममलं तेजोऽमनस्के ध्रुवम्	अमन. २।७६
तत्त्वं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः	महाना.९।४
तत्त्वानीति च तद्विदः	वैतथ्य. २०
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते...[वनदु.४३,५६,६८,७९ [=मं.१।२४।११+वा.सं.१८।४९+ [तै.सं.२।१।११।६+	ऋ.म.१।२।१५ तै.आ.२।३।१
तत्त्वावबोध एवासौ वासनातृणपावकः । प्रोक्तः समाधियोगेन न तु तूष्णीमवस्थितिः	महो. ४।१२
तत्त्वाविचारपाशेन बद्धं द्वैतभयातुरम् । उज्जीवयन्निजानन्दे स्वस्वरूपेण संस्थितः	द. मू. २०
तत्त्वीभूतस्तदा रामस्तत्त्वादप्रच्युतो भवेत्	वैतथ्य. ३९
तत्त्वेनातश्च्यवन्ति ते	भ. गी. ९।२४
तत्त्वेव भयं विदुषो भवति	तैत्ति. २।७
तत्पतित्वात्पशुपतिः	जाबाल्यु. ३
तत्परमरहस्यशिवतत्त्वज्ञानं (शिवसाक्षात्करणं)	द.मू. २
तत्परमित्यक्षरं गुह्यम् (ओमित्यक्षरं)	सन्ध्यो.२०
तत्परमित्याह, यमेतेनाप्नुवन्ति	ग.शो. ३।२
तत्परं ज्योतिरोमिति [यो.शि.६।५६	+यो. चू. ८५
तत्परं नापरं त्यजति । तदेव कपालाष्टकं सन्धाय य एष स्तनइवावलम्बते सेन्द्रयोनिः	परब्र. २
तत्परं यच्चित्तं परमात्मानमानन्दयति	परब्र. २
तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः	तारसा. २।५
तत्परः संयतेन्द्रियः	भ.गी. ४।३९
तत्परिणममानमभून् (ब्रह्माण्डं) ततः परमेष्ठी व्यजायत	अव्यक्तो. १
तत्परिभाषया कामःककारंव्याप्नोति । काम एवेदं तत्तदितिककारोगृह्यते	त्रि.ता. १।५
तत्परेणप्रेरितं विषमत्वंप्रयाति(तमः)	मैत्रा. ५।५

तत्पर्वते कर्मज्ञानमयीभिर्बहुशाखा भवन्ति	सीतो. ११
तत्पश्चात्तत्परेणेरितं विषमत्वं प्रयाति	मैत्रा. ५।५
तत्पार्श्वे (मनसः) संयमान्निकृतिलोकज्ञानम्	शांडि. १।७।५२
तत्पुरुषस्य विश्वमाजानमग्रे	चित्यु. १।३१
तत्पुरुषं पुरुषो निवेश्य नास्य प्रजा संवत्सरा जायन्ते	महो. १।२
तत्पुरुषाद्वायुः, तस्माच्छान्तिः, तस्याः श्वेतवर्णा सुशीला (गौः),तस्याः गोमयेन क्षारं जातम्	बृ.जा. १।६
तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नंदिः प्रचोदयात्	महाना. ३।४
तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् [महाना.	३।२+१०।७
तत्पुरुषाय विद्महे महासेनाय.. तन्नः षण्मुखःप्रचोदयात् [महाना.३।९+	वनदु.१३३
तत्पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्	महाना. ३।१
तत्पुरुषाय विद्महे सुवर्णपक्षाय.. तन्नो गरुडः.. [महाना. ३।६+	वनदु. १३४
तत्पुरुषाय विद्महे वक्रतुण्डायधीमहि। तन्नो दंती (दन्तिः) प्रचोदयात्	महाना. ३।३+
[वनदु. १३२+	ग.शो. २।१
तत्पुरुषो नादः, बिन्दुरीशानः, (ओङ्कारस्य)	ना.पू.ता. १।३
तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति	छान्दो.५।१०।२
तत्पूजनं (मानसं) मोक्षफलप्रदम्	मं.ब्रा. १।४
तत्पृथ्वीमण्डले क्षीणे वलिरायाति देहिनाम्। तद्वदापो गणापाये केशाः स्युः पाण्डुराः क्रमात्	वराहो. ५।४
तत्पृष्ठदेशे विदले समन्तान्न्यस्ता सुधा मानवदृष्टयधृष्टगा..	१ बिल्वो. ५
तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं, प्रज्ञानेत्रो लोकः, प्रज्ञा प्रतिष्ठा, प्रज्ञानं ब्रह्म	२ ऐत. ५।३
तत्प्रतिबिम्बितं यत्तत्साक्षि चैतन्यमासीत्	पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तदीश्वरचैतन्यमासीत्	पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तद्विराट्चैतन्यमासीत्	पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तद्धिरण्यगर्भचैतन्यमासीत्	पैङ्गलो. १।३
तत्प्रतिष्ठेत्युपासीत	तैत्ति. ३।१०।३
तत्प्रथमावरणे पश्चिमे सम्मुखे स्वर्णमण्डपे देवकन्या	राधोप. २।१
तत्प्रमार्जनमात्रं तु मोक्ष इत्यभिधीयते	अ.पू. ४।५६
तत्प्रसादात्परां शान्तिं	भ.गी.१८।६२
तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत् प्राणेन ग्रहीतुम्	२ ऐत. ३।४
तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत	बृह. १।२।६
तत्प्राणोऽभिरक्षति शिरोऽन्नमथोमनः	अ.शिरः.३।४
तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं...	भवसं. १।३२
तत्र का परिदेवना	भ. गी. २।२८
तत्फलश्रुतिरितितस्योर्ध्वं किं वदामेति	बृ. जा. १।४
तत्र को मोहः कः शोकः, एकत्वमनुपश्यतः [ईशा. ७+	ना. प. ९।१२
तत्र चक्रं द्वादशारं तेषु विष्ण्वादिमूर्तयः। अहं तत्र स्थितिश्चक्रं भ्रामयामि स्वमायया	त्रि.ब्रा. ६०
तत्र चत्वारः—अकारश्चायुतावयवान्वितः, उकारः सहस्रावयवान्वितः, मकारः शतावयवोपेतोऽर्धमात्राप्रणवोऽनन्तावयवाकारः	ना.प. ८।३
तत्र चान्द्रमसं ज्योतिः	भ.गी. ८।२५
तत्र तत्र परंब्रह्म सर्वत्र समवस्थितम्	पैङ्गलो. ४।२२
तत्र तमोनिवृत्तिः (कुण्डलिन्यां नाड्यां)तद्दर्शनात् सर्वपापनिवृत्तिः	मं.ब्रा. १।२
तत्र (अविद्याण्डे) तत्त्वतो गुणातीतशुद्धसत्त्वमयो लीलागृहीत.. मायोपाधिको नारायण आसीत्	त्रि.म.ना. २।१
तत्र तं बुद्धिसंयोगं	भ.गी. ६।४३
तत्र ता ऋचस्तदृचां मण्डलं स ऋचां लोकः	महाना. १०।१

तत्र तिष्ठत्प्रतीक्षंस्तद्गुरोरागमनं क्रमात् ।	शिवो. ७।३५
तत्र तेऽपृथग्धर्मिणोऽपृथग्विवेक्याः	मैत्रा. ६।२२
तत्र त्रयीमयं शास्त्रमाद्यं सर्वार्थदर्शनम् । ऋग्यजुस्सामरूपत्वात् त्रयीति परिकीर्तिता	सीतो. १२
तत्र दश यमाः तथा (१०) नियमाः, आसनान्यष्टौ	शांडि. १।१।२
तत्र दीप्तप्रकाशं स्वमात्मानं परं ब्रह्मैवाहमस्मीति भावयन् योगी मत्सायुज्यमवाप्नोति	गोपीचं. ४
तत्र देवता मार्ताण्डादिभान्वादित्य-हंस-सूर्य-दिवाकर-तपन-भास्कराः...भिन्नाः	सूर्यता. ५।१
तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः । तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य च [ब्र.वि. ३+	१ प्रणवो. ३
तत्र (मथुरायां) द्वादशादित्या एकादश रुद्रा अष्टौ वसवः.. चतुर्विंशतिर्भवन्ति	गोपालो. १।१७
तत्र (नाभौ) द्वादशारयुतं चक्रं, तच्चक्रमध्ये पापपुण्यप्रचोदितो जीवो भ्रमति	शांडि. १।४।४
तत्र (ऊर्ध्वं) न किञ्चिद्ददृशुः (त्रयो देवाः) ततश्चाधः प्रदेशे..	ग.शो. ४।६
तत्र नाडी सुषुम्ना तु नाडीभिर्बहुभिर्वृता ।.. शुक्लां नाडीं समाश्रयेत्	क्षुरिको. ८
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः । तत्र नाडीसहस्रेषु..	ध्या.बि. ५१
तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वास.. प्रभृतयोऽव्यक्तलिङ्गाः.. सर्वं.. परित्यज्यात्मानमन्विच्छेत्	जाबा. ६
तत्र (हृदब्जे) पश्येत्परात्मानं वासुदेवमकल्मषम्	त्रि.ब्रा.२।१००
तत्र पारोक्ष्यशबलः सर्वज्ञत्वादिलक्षणोमायोपाधिःसच्चिदानन्दलक्षणो जगद्योनिः	पैङ्गलो. ३।१
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः (भगवच्छब्दः)	भवसं. २।५१
तत्र (अप्सु) पूर्णानन्दमयः श्रीकैशोरकृष्णः...गोरोचनातिलको महाविष्णुः (आस्ते)	राधोप. ३।१
तत्र प्रजापतिर्वायुर्भूत्वाश्राम्यतेदं सृजेयमिति	२गोपीचं. २७
तत्र प्रथमो मत्स्यावतारः, द्वितीयः कूर्मः, तृतीयो वराहः..नारसिंहः, ..वामनः,..परशुरामः,..रामः, कृष्णः,..बौद्धः..कल्किः	ना.पू. ता. ५।२
तत्र प्रयाता गच्छन्ति	भ. गी. ८।२४
तत्र प्राच्यामैश्वर्यस्थानं (शिवस्य)	भस्मजा. २।९
तत्र बुद्ध्यादीनि स्वादूनि भवन्ति । अध्यवसायसङ्कल्पाभिमानाः.. पञ्च स्वादूनि..	मैत्रा. ६।१०
तत्र ब्रह्मचारिणश्चतुर्विधा भवन्ति— गायत्रो ब्राह्मणः प्राजापत्यो बृहन्निति	आश्रमो. १
तत्रब्रह्माचतुर्मुखोऽजायत [महो.१।४	+चतुर्वे· १
तत्र भवत्यः (श्रुतयः) सर्वलोकैः कृष्णसौन्दर्यक्रीडाभोगा गोपिकास्वरूपैः.. कृष्णं भजिष्यथ	गोपीचं. २७
तत्र मध्यमपादप्रदेशेऽमिततेजःप्रवाहाकारतयानित्यवैकुण्ठंविभाति	त्रि.म.ना.१।४
तत्र महर्षयः परिदेवयाञ्चक्रिरे महच्छोकभयं प्राप्ताः स्मो न चैतत्सर्वं समभिहितं ते वयं भगवन्तमेवोपधावाम	२ प्रणवो. १९
तत्र मृत्स्नां (मृदं) श्वेतां 'उद्धृतासि' इत्युद्धरेत् [कात्याय. १+	नारदो. १
तत्र यद्रक्तं तत्पुंसो रूपमभूत् । यद्धरितं तन्मायायाः	अव्यक्तो. १
तत्र (हृद्ग्रन्थौ) यत्प्रकाशते चैतन्यं स क्षेत्रज्ञ इत्युच्यते	सर्वसा. ७५

तत्र योगरताः केचिन्नैव जानन्ति तारकम् ।. केचिद्ध्यानविमोहिताः । जपेन केचित्क्लिश्यन्ति नैव जानन्ति तारकम्	अमन. १।४
तत्र योनि कृण्वते न हि ते पूर्वमक्षिपत्	श्वेताश्व. २।७
तत्र रक्षांसिपैशाचानचविद्वेष्टियोनरः	इतिहा. ६२
तत्र लोका वेदाः शास्त्राणि पुराणानि ..ज्योतींषि शिवशक्तियोगादित्येवं घटना व्यापठ्यते	त्रि. ता. १।४
तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट् कामाय	बृह. ४।१।३
तत्र विश्व एव जाग्रद्व्यवहारलोपानाडिमध्यं चरंस्तैजसत्वमवाप्य...स्वभासा भासयन् यथेप्सितं स्वयं भुङ्क्ते	पैङ्गलो. २।७
तत्र (मठे) वेदान्तश्रवणं कुर्वन् योगं समारभेत्	शांडि. १।५।१
तत्र वैखानसा अकृष्टपकौषधिवनस्पतिभिः..अग्निपरिचरणं कृत्वा..आत्मानं प्रार्थयन्ते	आश्रमो. ३
तत्र श्रीर्विजयो भूतिः	भ. गी.१८।७८
तत्र (नाड्यां) सञ्चारयेत्प्राणानूर्णनाभीव तन्तुना	क्षुरिको. ९
तत्र सत्त्वं निर्मलत्वात्	भ. गी. १४।७
तत्र संलीयते संविन्निर्विकल्पं च तिष्ठति । भूयो न वर्तते दुःखे तत्र लब्धपदः पुमान्	अ. पू. ४।६९
तत्र सुषुम्ना विश्वधारिणी मोक्षमार्गेति चाचक्षते	शांडि. १।४।६
तत्र सूर्योऽग्निर्नाम सूर्यमण्डलाकृतिः सहस्ररश्मिपरिवृत एकऋषिर्भूत्वा मूर्धनि तिष्ठति	प्रा. हो. २।४
तत्र स्थिते मनसि चक्षुर्मध्यगतनीलज्योतिष्पश्यति । एवं हृदयेऽपि	मं. ब्रा. १।३
तत्र स्थिते मनसि चक्षुर्मध्यगतज्योतिःस्थलं त्रिलोक्यान्तर्दृष्ट्या निरतिशयं सुखं प्राप्नोति	अद्वयता. २
तत्र (राधाकुण्डे)स्नात्वाराधाङ्कंभवति	राधोप. २।१
तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभूवुः	बृह. ३।१।१
तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिः..वनेष्वेवं.. द्वादशमूर्तयो भवन्ति	गोपालो. १।१९
तत्राज्यस्य पर्णमयी जुहूर्भवति	भस्मजा. १।२
तत्रादौ हरिसंस्काराः कर्तव्या मोक्षकांक्षिणाम् । अयमेव परोधर्मः प्रधानं सर्वकर्मणाम्	भवसं. २।६७
तत्राधस्तनमेकंपादमविद्याशवलंभवति	त्रि.म.ना.१।४
तत्रान्योऽन्यत्पश्येदन्योऽन्यजिघ्रेत्	बृह. ४।३।३१
तत्रापरा तु विद्यैषा ऋग्वेदो यजुरेव च ।..निरुक्तं छन्द एव च	रुद्रहृ. २८
तत्रापश्यत् स्थितान् पार्थः	भ. गी. १।२६
तत्रापश्यन्महामायां.. पर्यङ्कस्थां परिचरन्तीमादिदेवं...	लक्ष्म्यु. २
तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्	महाना. ८।१६
तत्रापि साध्यः पवनस्य नाशः षडङ्गयोगादिनिषेवणेन	अमन. २।२८
तत्राप्यविमुक्तमभ्यर्हितम्	भस्मजा. २।८
तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः । स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात्	रु. जा. उ. ३
तत्राष्टदलकेसरमध्ये मणिपीठे सप्तावरणकम्	राधोप. १।४
तत्रास्य यथाकामचारो भवति [+७।२।२+—७।७।९।२	छां. उ.७।१।५
तत्राहमासीनः (शिवः रत्नवेदिकायां) ...तारकं शैवं मनुमुपदिशामि	भस्मजा.२।१५
तत्रैकनाशादपरप्रवृत्तिर्विध्वस्तयोर्मोक्षपदस्य सिद्धिः	अमन. २।२८
तत्रैकैकमात्मनो नवांशकं सचारकविधम्	मैत्रा. ६।१४
तत्रैकस्थं जगत्कृत्स्नं	भ. गी.११।१३
तत्रैकाग्रं मनः कृत्वा	भ. गी. ६।१२
तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि	छान्दो. ६।८।३
तत्रैतदेव शुङ्गमुत्पतितं सोम्य विजानीहि	छान्दो. ६।८।५

तत्रैता देवता आवाह्य द्वादशावरणानि कुर्यात्	सूर्यता. ५।१
तत्रैव मुक्त्यर्थमुपदिश्यते शैवोऽयं मन्त्रः पञ्चाक्षरः	भस्मजा.२।१५
तत्रैव श्वानो गर्दभा मार्जाराः कृमयश्च मत एव, न श्वानगर्दभौ..	स्वसंवे. ३
तत्रैव सति कर्तारं	भ.गी. १८।१६
तत्रैवाव्यक्तसंज्ञके	भ. गी. ८।१८
तत्रोद्गातृनास्तावे स्तोष्यमाणानुपोपविवेश	छान्दो.१।१०।८
तत्रोन्मदाभिः कान्ताभिर्भोजनैर्भोगसञ्चयैः । जनको लालयामास शुकं..	महो. २।२५
(अथ) तत्रोमिति शब्दोऽनेनोर्ध्वमुत्क्रान्तोऽशब्दे निधनमेति	मैत्रा. ६।२२
तत्सगुणनिर्गुणस्वरूपम् , तद्वेत्ता विमुक्तः	मं. ब्रा. २।१
तत्सङ्कल्पानुसारिणी विविधानन्तमहामाया शक्तिसंसेवितानन्तमहामाया... महाविष्णोः.. एतां महामायां तरन्त्येव ये विष्णुमेव भजन्ति, नान्ये तरन्ति	त्रि.म.ना. ४।९
तत्सत्कुलप्रसूतः पितृमातृविधेयः पितृसमीपादन्यत्र.. सद्गुरुमासाद्य.. विवाह्य...ततः.. वनस्थो भूत्वा.. सन्न्यस्तुमर्हति	ना. प. २।१
तत्सत्यमित्याचक्षते	तैत्ति. २।६
(यत्र) तत्सत्यस्य परमं निधानम्	मुण्ड. ३।१।६
तत्सत्यं तत्परं पदम्	१यो.त. १३६
तत्सत्यं स आत्मा [+६।९।४–६।१६।३	छान्दो.६।८।७
तत्सत्यानृते मिथुनीकरोति । तयोर्मिथुनात्प्रजायते,भूयान्भवति	१ऐत. ३।६।६
तत्सत्त्वमेवेरितं तत्सत्त्वात्सम्प्रास्रवत्	मैत्रा. ५।५
(ॐ) तत्सद्भूर्भुवः सुवस्तस्मै प्रणात्मने नमोनमः	गोपालो. ३।२

तत् (शैवं व्रतं) समाचरेन्मुमुक्षुर्नेपुनर्भवाय	जाबाल्यु. ७
तत्समासेन मे शृणु	भ.गी. १३।४
तत्सर्वगतो नहीदं सर्वम् (आत्मा)	नृसिंहो. ५।१
तत्सदाऽऽसीत्तत्समभवत् तदाण्डं निरवर्तत	छान्दो.३।१९।१
तत्सर्वमित्याचक्षते (गाणेशं ब्रह्म)	ग.शो. ३।१,१
तत्सर्वं भूतं भव्यं यत्किञ्चिद्दृश्यमानं स्थावरजङ्गमं तत्सर्वं कालिकातंत्रे ओतं प्रोतं वेद	कालिको. ३
तत्सवितुरिति पूर्वेणाध्वना सूर्याधश्चंद्रिकां व्यालिख्य..	त्रि.ता. १।११
तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः सविता	मैत्रा. ६।७
तत्सवितुर्वरेण्यमित्यादिद्वात्रिंशदक्षरीं पठित्वा तदिति परमात्मा सदाशिवः..	त्रि.ता. १।१०
(ॐ) तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् [त्रि.म.ना.७।११ [ऋ.अ.३।४।१०=मं.३।६२।१० [+तै.सं.१।५।६।४+	महाना. ११।७ +त्रि.ता.१।१ +वा.सं.३।३९ साम. २।८१२
तत्सवितुर्वरेण्यं भर्गो देवः क्षीरं सेचनीयम्	त्रि. ता. १।१२
तत्सवितुर्वरेण्यं भर्गोऽस्याभिध्येयं	मैत्रा. ६।३४
तत्सवितुर्वृणीमहे इत्याचामति मंत्रः— ऋ.अ. =मं. [+एत. ब्रा.४।३०।३+ऐत.आ. [तै.आ. १।११।२	छान्दो. ५।२।७ १५।३।१
तत्सशक्तिकं गजवक्त्रं गजाकारं जगदेवावरुन्धे	ग.शो. ३।३
तत्संवत्सरमात्रमुषित्वा द्विधाऽकरोत्	सुबालो. १।२
तत्संवत्सरस्य मात्रामशयत, तन्निरभिद्यत, ते आण्डकपाले रजतं सुवर्णं चाभवताम्	छां.३।१९।१
तत् (मनः) संवत्सरं प्रोष्य पर्येत्योवाच कथमशकततें मज्जीवितुमिति	छान्दो.५।१।११

तत् (चक्षुः) संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति	छान्दो. ५।१।९
तत् (चक्षुः, श्रोत्रं, मनः, रेतः) संवत्सरं प्रोष्यागत्योवाच कथमशकतमदृते जीवितुमिति [बृह.६।१।९, १०,११,१२	
तत् (भस्म) हैमे राजते ताम्रे मृण्मये वा पात्रे निधाय.. अभ्युक्ष्य..संस्थापयेत्	भस्मजा. १।३
तत्सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति [नारा.५+ऐत्यु.२६	महावा. ६
तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् । प्राणरोधमथाभ्यासादृज्वी कुण्डलिनी भवेत्	योगकुं. १।८
तत्सुखं राजसं स्मृतम्	भ. गी.१८।३८
तत्सुखं सात्त्विकं प्रोक्तम्	भ. गी.१८।३८
तत्सूत्रं विदितं येन स मुमुक्षुः स भिक्षुकः ।..स विप्रः पंक्तिपावनः	परब्र. ९
तत्सूर्यो रश्मिभिर्वर्षति, तेनान्नं भवति,अन्नाद्भूतानामुत्पत्तिः	मैत्रा. ६।३७
तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत्	तैत्ति. २।६
तत्स्त्रिया आत्मभूयं गच्छति यथा स्वयमङ्गं तथा तस्मादेनां न हिनस्ति	२ऐत. ४।२
तत्स्वयं योगसंसिद्धः	भ. गी.४।३८
तत्स्वरूपज्ञानां वैदेही मुक्तिश्च भवति	हयग्री. ६
तत्स्वरूपध्यानपरा मुनयआकल्पान्ते तस्मिन्नेवात्मनि लीयन्ते	अव्यक्तो. ९
तत्स्वरूपात्सृष्टिर्या समुत्पन्ना सा रसिकानन्देन सुसेव्यतां प्राप्ताऽऽसीत्	सामर. ३
तदृषीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे	बृह. १।४।१०
तथाऽक्षरात्सम्भवतीह विश्वम्	मुण्ड. १।१।७
तथाचयज्ञैक्रियतेऽरण्येगेयंचाधीमहे	संहितो. ३।२
तथा चरेत वै योगी सतां धर्ममदूषयन् । जना यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिम्	ना. प. ५।४२
तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ।	अ. शां. १५
तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः	अद्वैत. २९
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च (स्वप्नवत्)	अ. शां. ६८
तथा ज्ञातं च चैतन्यं फलमित्यभिधीयते	कठरु. ४।४४
तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किं स्यात्	बृह. ४।१।६
तथा तत्प्रयोगकल्पः—प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडङ्ग इत्युच्यते योगः	मैत्रा. ६।१८
तथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः	जाबाल्यु. ४
तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किं स्यात्	बृह. ४।१।४
तथा तद्वृत्तिसम्बंधात्प्रमाणमिति कथ्यते	कठरु. ४३
तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किं स्यात्	बृह. ४१।५
तथा तवामी नरलोकवीराः	भ.गी. ११।२८
तथा तेनेदमावृतम्	भ.गी. ३।३८
तथाऽऽत्ममनसोरैक्यं समाधिरिति कथ्यते	वराहो. २।७५
तथाऽऽत्मा नोपलिप्यते	भ.गी. १३।३३
तथाऽऽत्मोपाधियोगेन तद्धर्मो नैव लिप्यते	अध्यात्मो. ५२
तथा त्रैलोक्यवलितं ब्रह्मैकमिह दृश्यताम्	महो. ९।५७
तथा देहादिसङ्घातं मोहगुणजालकलितं तद्रज्जुसर्पवत्कल्पितम्	निर्वाणो. ३
तथा देहान्तरप्राप्तिः	भ.गी. २।१३
तथा द्वादशभिर्वर्षैर्लयस्तस्य निरन्तरम् । व्योमवत्तस्य सिद्धिः स्याद्व्योमतत्त्वमयो भवेत्	अमन. १।७८
तथा द्वादशमात्रस्तु प्राणायामो विधीयते	योगो. २५

तथाऽऽनन्दमयश्चापि ब्रह्मणोऽन्येन साक्षिणा। सर्वान्तरेण पूर्णश्च ब्रह्म नान्येन केनचित्	कठरु. २४
तथा नस्त्वं तात जानीथा यथा यदहं किञ्च वेद	बृह. ६।२।४
तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते।..सैषा चिद्विनाशात्मा स्वात्मेत्यादिकृताभिधा	महो. ५।९९
तथाऽन्तर्ज्योतिरेव यः	भ.गी. ५।२४
तथापि त्वं महाबाहो	भ.गी. २।२६
तथापि दृढता नो चेद्विज्ञानस्य... द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय	मुक्तिको. १।२८
तथा पुरुषप्रयत्नसाध्यवेदान्तश्रवणादिजनितसमाधिना जीवन्मुक्त्यादिलाभो भवति	मुक्तिको. १।२
तथा पूयति वा अन्नमृते प्राणात्	बृह. ५।१२।१
तथाऽऽप्नोति निबोध मे	भ.गी. १८।५०
तथाप्यथर्वणं तेजसा प्रत्याप्याययेन्मंत्राश्च मामभिमुखीभवेयुर्गर्भा इव	२प्रणवो. ४
तथाप्यसिद्धं चेज्ज्ञानं दशोपनिषदं पठ	मुक्तिको.१।२७
तथाप्यानन्दभुक् चेतोमुखः सर्वगतोऽव्ययः। चतुरात्मेश्वरः प्राज्ञस्तृतीयः पादसंज्ञितः(आत्मनः)	ना. प. ५।७
तथा प्रत्यर्थिकृत्याभिमन्त्रयन्त्रादिकिल्बिषैः (मुच्यते)	सूर्यता. १।१४
तथा प्रलीनस्तमसि	भ.गी. १४।१५
तथाप्राणविपत्तौ तु क्षोभमायाति मारुतः। ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेन्नृणाम्	यो. शि. ३०
तथा ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीनेवाविभक्तांस्त्रीनेव लिङ्गरूपानेव च सम्पूज्योपचारैः... चिन्तयन्प्रसेत्	नृसिंहो. ३।४
तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः	अद्वैत. ८
तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना	जा. द. १०।४
तथा मनोमयोह्यात्मापूर्णोज्ञानमयेनतु	कठरु. २३
तथा मानापमानयोः [भ.गी.६।७	+१२।१८
तथा यूयं (मुनयः) पञ्चपदं जपन्तः श्रीकृष्णं ध्यायन्तःसंसृतितरिष्यथ	गो.पू. ४।१६
तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते	कठो. ३।१५
तथा लोकानकल्पयत् (गणेशः)	ग.शो.ता.३।११
तथा लोकाँऽअकल्पयत् [ऋ.अ.८।४।१९=मं.१०।९०।१४	चित्यु.१२।६+ वा.सं.३१।१३
तथा वायुं समारोप्य धारयेच्छिरसि स्थितम्। शिरोरोगा विनश्यंति..	जा. द. ६।३१
तथा विज्ञानवशतः स्वभावः सम्प्रसीदति	महो. ५।६६
तथा विद्वान्नामरूपाद्विमुक्तः परात्परां जगदम्बामुपैति	गुह्यका. ३८
तथा वृत्तिक्षयाच्चित्तं, स्वयोनावुपशाम्यति [मैत्रा.६।३४+	मैत्रे. १।८
तथा शुष्यति वै प्राण ऋतेऽन्नात्	बृह. ५।१२।१
तथा शरीराणि विहाय जीर्णानि	भ. गी. २।२२
तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत्	क्षुरिको. २३
तथा सर्वाणि भूतानि	भ. गी. ९।६
तथा सूक्ष्ममनाकाशमसंस्पृश्यमचाक्षुषम्।.. आत्मानं सच्चिदानन्दमनन्तं ब्रह्म.. (ध्यायेत्)	जा. द. ९।४
तथाऽसौ त्यक्त्वा कुणपं न तत्तादृशं पुराप्राप्नुवन्ति (वह्निगतहविर्यजमानमिव)	भस्मजा. २।७
तथाऽहङ्कारसम्बन्धादेव संसार आत्मनः	वराहो. ३।२०
तथा ह निष्काम्याः सकाम्या भूगोपालचक्रेसप्तपुर्यो भवन्ति	गोपालो.१।१५
तथेतः प्रेत्य भवति स क्रतुं कुर्वीत	छान्दो.३।१४।१
तथेति तँ समन्तं परिण्यविशन्त	बृह. १।३।१८
तथेति तेभ्य एव प्राण उदगायत्	बृह. १।३।७
तथेति तेभ्यश्चक्षुरुदगायत्, यश्चक्षुषि भोगस्तं देवेभ्य आगायत्, यत्कल्याणं पश्यति	बृह. १।३।४

तथेति तेभ्यः प्राण उद्गाय ।	बृह. १।३।२
तथेति परमेष्ठी वक्तुमुपचक्रमे ॐ मिति ब्रह्मेति	ना.प. ८।१
तथेति प्रत्यवोचद्भुसुण्डं वक्ष्यमाणं, किमिति	बृ.जा. १।४
तथेति तेभ्यो मन उद्गायत्, यो मनसि भोगस्तं देवेभ्य आगायत् यत्कल्याणं सङ्कल्पयति	बृह. १।३।६
तथेति तेभ्यो वागुदगायत्, यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति	बृह. १।३।२
तथेति तेभ्यः श्रोत्रमुदगायत् , यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणं शृणोति	बृह. १।३।५
तथेति समुपविविशुः स ह प्रवाहणो जैवलिरुवाच (मा. पा.)	छां. उ. १।८।२
तथेन्द्रियकृता दोषा दह्यन्ते प्राणधारणात् । प्राणायामैर्दहेद्दोषान्	अ. पू. ७
तथैव च पितामहाः	भ. गी. १।३४
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ।	भवसं. १।३३
तथैव नाशाय विशन्ति लोकाः	भ.गी. ११।२९
तथैव निम्नगः सोमः शिवशक्तिपदास्पदः । शिवश्चोर्ध्वमयः शक्तिरूर्ध्वशक्तिमयःशिवः । तदित्थं शिवशक्तिभ्यां नाव्याप्तमिह किञ्चन	बृ.जा.२।९
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः	२ आत्मो. २१
तथैव रसशक्तिश्च सोमात्मा चानलात्मिका । वैद्युदादिमयं तेजो.. मधुरादिमयो रसः	बृ.जा. २।३
तथैव रामबीजस्थं जगदेतच्चराचरम् । बीजोक्तमुभयार्थत्वं रामनामनि दृश्यते [रामर.५।११+	रा.पू.ता.२।३
तथैव विद्वान् रमते निर्ममो निरहं सुखी । कामान्निष्कामरूपी सञ्चरत्येकचरो मुनिः	२ आत्मो. ११
तथैव (शनैः शनैः) सेवितो(वश्यः) वायुरन्यथा हन्ति साधकम्	शांडि. १।७।६
तथैवात्मात्मशक्त्यैव स्वात्मन्येवैति लोलताम् । क्षणं स्फुरति सा देवी..	महो. ५।१२०
तथैवाद्वैतपरमानन्दलक्षणपरब्रह्मणो मम सर्वाद्वैतमुपपन्नं	त्रि.म.ना. ८।१
तथैवान्नमये कोशे कोशास्तिष्ठन्ति चापरे । यथा कोशस्तथा जीवो यथा जीवस्तथा शिवः	त्रि.ब्रा.२।१२
तथैवाश्वो भूत्यः स्पन्दते	छाग. ६।१
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम्	२ आत्मो. २
तथैव देवः स्वप्न आनन्दमभियाति वेद एव ज्योतिः	परब्र. २
तथो एवैवं विद्वान् सर्वेषां भूतानां प्राणमेव प्रत्यात्मानमभिसंस्तूय सहैतैः सर्वैरस्माच्छरीरादुत्क्रामति	कौ. उ. २।१४
तथो एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति	कौ.उ. २।१२
तथो एवैवं विद्वान्सर्वान्पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति	कौ.उ. ४।२०
तथो एवैवं विद्वान् सर्वेषां भूतानां श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति	कौ.उ. २।६
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी [श्वेता.४।१८+	गुह्यका.६१
तदक्षरे परमे व्योमन्	महाना. १।२
तदग्निनैव देवेषु ब्रह्माऽभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः	बृह. १।४।१५
तदग्रं ब्रह्म चोच्यते	यो.चू. ८०
तदण्डमभूद्धैमं, तत्परिणममानमभूत्, ततः परमेष्ठी व्यजायत	अव्यक्तो. १
तदण्डं समभवत्, तत्संवत्सरमात्रमुषित्वा तद्द्विधाऽकरोत्	सुबालो. १।२
तदतितरां सुशोभायमानं ब्रह्मेति पुराविदो वदन्ति	सामर. ५५
तदतीता सप्तमी (योगभूमिका)	वराहो. ४।१

तदत्राविद्यया (भयं) मन्यतेऽथ यत्र देव इव राजेवाहमेवेदꣳ सर्वोऽस्मीति मन्यते	बृह. ४।३।२०
तददितेरदितित्वꣳ सर्वस्यैतस्यात्ता भवति	बृह. १।२।५
तदद्वितीयमखण्डार्थं परं ब्रह्म	बह्वृचो. ३
तदधश्चित्तसंयमादग्निलोकज्ञानम्	शांडि. १।७।५२
तदधिकारीनभवेद्यदि गृहस्थप्रार्थनापूर्वकं 'अभयं सर्वभूतेभ्यो' इत्यनेन मंत्रेण वस्त्रमेकं परिगृह्य...	प.हं.प. ६
तदधिष्ठानमात्मानं संज्वाल्य तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य मात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपं चिन्तयन् ग्रसेत्	नृसिंहो. ३।४
तदधीना विषयग्रहणबुद्धिः, बुद्ध्या बुध्यति, चित्तेन चेतयत्यहङ्कारेणाहङ्कारीति	ना.प. ६। ४
तदधीनाः कर्मज्ञानवैराग्यप्रवर्तकाः पुरुषास्तदनुकूलाचाराः सन्ति	ना.प. ५।१
तदध्यात्मविद्यया लब्धं (मनःशौचं)	शांडि. १।१।३
तदनन्यत्तद्वेधाऽभूद्धरितमेकं, रक्तमपरम्। तत्र रक्तं तत्पुंसो रूपमभूत्, चरितं तन्मायायाः	अव्यक्तो. १
तदनभ्यर्च्य नाश्नीयात्फलमन्नमन्यद्वा	भस्मजा.२।१०
तदनुकृतिरसौ मानुषी वीणा भवति	३ऐत. २।५।२
तदनु च समतावशात्स्वरूपे परिणमनं महतामचिन्त्यरूपम्	अ.पू. १।९४
तदनु प्रविश्य सच्च त्यच्चाभवत्..	तैत्ति. २।६
तदनु विषयवासनाविनाशस्तदनु शुभः परमः स्फुटप्रकाशः	अ.पू. १।५४
तदनु सर्वेशमप्रमेयमजं शिवं.. परं ब्रह्म आत्मन्येव पश्यमानो.. परं ब्रह्म प्राप्नोति	मं.ब्रा. ३।१
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः	ईशा. ५
तदन्तरारयोः पूषा वर्तते च पयस्विनी, सुषुम्ना पश्चिमे चारे	वराहो. ५।२५
तदन्तर्गतजीवराशयः स्थूलशरीरैः सह विराडुच्यते	ग.शो.ता.४।५
तदपराजिता पूर्ब्रह्मणः प्रभुविमितꣳ हिरण्मयम्	छान्दो.८।५।३
तदपश्यत्तदभवत् प्रजासु	महाना. २६
तदपाणिपादमचक्षुश्श्रोत्रमजिह्वमशरीरमग्राह्यमनिर्देश्यम् (ब्रह्म)	शांडि. २।१।२
तदपानेनाजिघृक्षत् तदावयत्	२ऐत. ३।१०
तदपोऽसृजत तस्मात्तत्र क्वच शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते	छान्दो. ६।२।३
तदभावे सत्यनन्तविरोधो विभाति	त्रि.म.ना.२।३
तदभिद्रुत्य पाप्मनाविध्यन्स यथाश्मानमृत्वा लोष्टो विध्वꣳसेत	बृह. १।३।७
तदभिमृशेदनु वा मंत्रयेत 'यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधी...' (इति मंत्रेण)	बृह. ६।४।५
तदभिव्यक्तिचिह्नानि सिद्धिद्वाराणि मे शृणु..। दृश्यन्ते सूक्ष्मरूपेण सदा युक्तस्य योगिनः	यो.शि. २।१९
तदभेदेन मन्त्राम्रेडनं ज्ञानसाधनं	द. मू. १६
तदभ्यद्रवत्तस्मात्तिरोदधे (यक्षं)	केनो. ३।११
तदभ्यद्रवत्तमभ्यवदत् कोऽसीति	केनो. ३।४,८
तदभ्यन्तरसंस्थाने शुद्धबोधानन्दलक्षणं विभाति	त्रि.म.ना. ५।९
तदभ्यन्तरे अमिततेजोराशिस्तदुपरि ज्वलति, परममङ्गलासनं विराजते	त्रि.म.ना. ५।५
तदभ्यासादखण्डमण्डलाकारज्योतिः	मं. ब्रा. २।२
तदभ्यासान्मनःस्थैर्यं, ततोवायुस्थैर्यम्	मं. ब्रा. २।३
तदमलमरजं तदात्मतत्त्वं	अ.पू. ४।७२
तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येति	सुबा..९।१–१३
तदमृतमभयमेतद्ब्रह्मेति	छान्दो. ८।८।३
तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके..	छान्दो. ८।५।३
तदर्थं कर्म कौन्तेय	भ.गी. ३।९
तदलक्षणमग्राह्यं यद्व्यवहार्यमचिन्त्यं.. प्रपञ्चोपशमं शिवं शांतमद्वैतं चतुर्थं मन्यन्ते स ब्रह्मप्रणवः	ना.प. ८।२३
तदवस्था जाग्रत्स्वप्नसुषुप्तितुरीयाः	वराहो. ४।१
तदविज्ञेयं तदव्यक्तम् (ब्रह्मतेजः)	अव्यक्तो. २

तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीराः	मुण्ड. १।१।६
तदव्ययीभूतमन्वर्थवाची शब्दो न व्येति कदाचन	२प्रणवो. १४
तदवभृथः सोमसवनः	छान्दो. ८।५।२
तदस्ति (कर्तव्यं) चेन्न स तत्त्वविद्भवति	पैङ्गलो. ४।९
तदस्मै देवा अभिसन्नवन्तु	चित्त्यु. ११।९
[अथर्व.१९।४१।१+तै.सं.५।४।७।३	तै.आ.३।११।९
तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः	छान्दो. २।९।६
तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः	छान्दो. २।९।५
तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिंकुर्वन्ति हिंकारभाजिनो..	छान्दो. २।९।२
तदस्य पितरो अन्वायत्तास्तस्मात्तान्निदधाति निधनभाजिनो ह्येतस्य साम्नः	छान्दो.२।९।८
तदस्य प्रज्ञा स्रवति दृतेः पादादिवोदकम्...	....
तदस्य प्रथमं जन्म (गर्भाधानम्)	२ ऐत. ४।१
तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रस्तावभाजिनो..	छांदो. २।९।३
तदस्य रुद्रा अन्वायत्ताः, प्राणा वाव रुद्राः, एते हीदꣳ सर्वꣳ रोदयन्ति	छांदो. ३।१६।३
तदस्य रूपं प्रतिचक्षणाय	बृह. २।५।१९
तदस्य वयांस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षे ... आदिभाजीनि ह्येतस्य साम्नः	छान्दो. २।९।४
तदस्य वसवोऽन्वायत्ताः, प्राणा वाव वसवः, एते हीदꣳ सर्वꣳ वासयन्ति	छान्दो.३।१६।१
तदस्य हरति प्रज्ञां	भ.गी. २।६७
तदस्यादित्या अन्वायत्ताः प्राणावाव आदित्याः, एते हीदꣳसर्वमाददते	छान्दो.३।१६।५
तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्	छान्दो. ८।१२।१

ब्रह्माण्डं चैव पिण्डाण्डं लोका भूरादयः क्रमात्...स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि	योगकुं.३।२२
ब्रह्माण्डं पञ्चभूतस्थं पञ्चभूतमयी तनुः । सर्वं भूतमयं चेति त्यक्त्वा नास्तीति भावयेत्	अमन.१।१७
ब्रह्माण्डं सकलं पश्येत् पाणिस्थमिव मौक्तिकम्	अमन.१।८०
ब्रह्माण्डाखण्डविग्रहम् (महेशं)	पं. ब्र. ११
ब्रह्माण्डाद्बहिरूर्ध्वे हि महत्तत्त्वमहङ्कृतिः	गुह्यका. ७
ब्रह्माण्डार्धं कपालं हि शिरस्तस्या विभावयेत्	गुह्यका. ८
ब्रह्माण्डावरणं विनश्यति तद्धि विष्णोः स्वरूपम्	त्रि.म.ना.३।५
ब्रह्मात्मसच्चिदानन्दात्मकमंत्रमित्युपासितव्यम्	श्रीवि.ता.१।१
ब्रह्मात्मैकत्वविज्ञानं हेयं मिथ्यात्वकारणात्	परब्र. ३
ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यमित्योंसत्यं तदेतत्पण्डिता एव पश्यन्ति	नृसिंहो. ९।८

ब्रह्मादयश्च (इंद्रादयश्च) यक्षान्ता वृन्तभागे व्यवस्थिताः (बिल्ववृक्षस्य) २बिल्वो. १०

ब्रह्मादयस्त्रयो मूर्तयः...अकारोकारमकारा एते सर्वे प्रणवमयोर्ध्वपुण्ड्रत्रयात्मकास्तदेतदोमित्येकधा समभवन् गोपीचं. ४

ब्रह्मादयस्त्रयो मूर्तयास्तिस्रो व्याहृतयस्त्रीणि छन्दांसि त्रयोऽग्नय इति वासुदे. ४

ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे। सर्वकारणमव्यक्तमनिरूप्यमचेतनम् । साक्षादात्मनि सम्पूर्णे धारयेत्प्रणवेन तु । इन्द्रियाणि समाहृत्यमनसाऽऽत्मनि योजयेत् जा.द.८।८-९

ब्रह्मादिकीटपर्यन्ता प्राणिनो मयि कल्पिताः । बुद्बुदादिविकारान्तस्तरङ्गः सागरे यथा आ. प्र. १५

ब्रह्मादिपञ्चब्रह्माणोयत्रविश्रान्तिमाययुः। तदखण्डं सुखाकारं रामचन्द्रपदंभजे पं. ब्र. शीर्षकं

ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिष्ववशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थः इत्युच्यते सर्वसारो. ५

ब्रह्मादिलोकपर्यन्ताद्विरक्त्या यल्लभेत् प्रियम् । सर्वत्र विगतस्नेहः सन्तोषं परमं विदुः जा.द. २।६

ब्रह्मादिस्तम्बपर्यन्तं मृषामात्रा उपाधयः। ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् अध्यात्मो.१९

ब्रह्मादीनामगोचरा (अनन्तमहामाया) त्रि.म.ना.४।९

ब्रह्मादीनां वाचकानां मन्त्रोऽन्वर्थादिसंज्ञकः । जप्तव्यो मन्त्रिणा नैवं विना देवः प्रसीदति रा. पू. १।११

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् [महाना. ८।४+१२।३+ वनदु. ४७,६०

ब्रह्मा देवानां प्रथमः सम्बभूव यो.चू. ७२

ब्रह्मा देवानां प्रथमः सम्बभूवविश्वस्य कर्ता भुवनस्य गोप्ता मुंडको. १।१

ब्रह्मा देवानां सवितुः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ग.पू. १।१

ब्रह्माद्यं स्थावरान्तं च पश्यन्ति ज्ञानचक्षुषः मंत्रिको.१६

ब्रह्माद्वितीयमेव सत्यम् त्रि.म.ना.४।२

ब्रह्माघोराङ्गिरसे ददौ (ब्रह्मविद्यां) सुबालो.७।३

ब्रह्मानन्दकारणम् (गोपीचंदनम्) गोपीचं. ६

ब्रह्मानन्दमयविमानकोटिभिरतिमङ्गलमनन्तोपनिषदर्थारामजालसङ्कुलं... प्रणवाख्यं विमानं विराजते त्रि.म.ना.७।९

ब्रह्मानन्दमयानन्त-प्राकार-प्रासाद-तोरणविमानोपवनावलिभिर्ज्वलच्छिखरैरुपलक्षितो निरुपमनित्यनिरवद्यनिरतिशयनिरवधिकब्रह्मानन्दाचलो विराजते [त्रि.म.ना.५।५+ सि.सा.१।१

ब्रह्मानन्दपरं ज्योतिः ते.विं.४।५९

ब्रह्मानन्दमयी विद्यायापरा सा परा गतिः गान्धर्वो. ५

ब्रह्मानन्दरसनिर्भरैरसङ्ख्यैरतिमङ्गलं... निरतिशयाद्वैतपरमानन्दलक्षणमादिनारायणं ध्यायेत् त्रि.म.ना.७।१२

ब्रह्मानन्दरसारूढो ब्रह्मानन्दैकचिद्घनः ते. विं. ४।६०

ब्रह्मामृतरसे तृप्तो ब्रह्मानन्दानुभावकः ते.वि. ४।५८

ब्रह्मानन्दसमष्टिकन्द...ब्रह्मानन्दमयानन्तनिरतिशयानन्दसागराकारम् । आत्मसमानानन्दविभूतिपुरुषानन्तानन्दमण्डितं नित्यमङ्गलमनन्तविभवम् सि.सा. १।१

ब्रह्मानन्दं परमं दक्षिणे च ब्रह्मानन्दं परमं चोत्तरे च पा. ब्र. ३५

ब्रह्मानन्दं सदा पश्यन्कथंबध्येतकर्मणा वराहो.२।१६

ब्रह्मानन्दानुसन्धाने नास्मादन्यत्तु किञ्चन । सुलभं त्रिषु लोकेषु यज्ज्ञात्वाऽमृतमश्नुते गान्धर्वो. ११

ब्रह्मानन्दामृतरसाम्भोनिधितरङ्गिण्याः प्रवाहैरतिमङ्गलम् सि. सा. ६।१

ब्रह्मानन्दाश्रुसंजातेवृन्दावननिवासिनि। सर्वावयवसम्पूर्णे अमृतोपनिषद्रसे । त्वं मामुद्धरकल्याणि महापापाब्धिदुस्तरात् . तुलस्यु. ११

ब्रह्मानन्दे निमग्नस्यविषयाशानतद्भवेत्	आ.प्र. १७
(यद्वा) ब्रह्मानन्दे विलीयताम् (धीः)	१अवधू.२५
ब्रह्मा नारायणः, शिवश्च नारायणः	त्रि.म.ना.२।८
ब्रह्मान्वविन्दद्दश होतारमर्णे	चित्यु.११।१
ब्रह्मा पूरक इत्युक्तो विष्णुः कुम्भक उच्यते । रेचो रुद्र इति प्रोक्तः प्राणायामस्य देवताः	ध्या. बिं.२१
ब्रह्मा ब्रह्मणी वेदितव्ये	देव्यु. १
ब्रह्मब्रह्माऽहं प्राञ्चः प्रत्यञ्चोऽहम्	अ. शिरः. २
ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद	बृह.४।४।२६
ब्रह्मामृतरसासक्तो ब्रह्मामृतरसः स्वयम्	ते.बिं.४।५७
ब्रह्मामृतरसास्वादो ब्रह्मामृतरसायनः	ते.बिं.४।५६
ब्रह्मामृतरसे मग्नो ब्रह्मानन्दशिवार्चनः	ते.बिं. ४।५७
ब्रह्मामृतं पिबेद्भैक्षमाचरेद्देहरक्षणे । वसेदेकान्तिको भूत्वा चैकान्ते [स्कन्दो. १२+	मैत्रे. २।३
(अथ) ब्रह्मा रुद्रो विष्णुरित्यधिपतिवत्येषा	मैत्रा. ६।५
ब्रह्मा रुद्रो विष्णुरित्येकेऽन्यमभिध्यायन्त्येकेऽन्यम्	मैत्रा. ४।५
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना [शरभो. २७+	भ.गी. ४।२४
ब्रह्मावर्ते महाभांडीरवटमूले महासत्राय समेता महर्षयः शौनकादयस्ते ह समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरजीविनमुपसमेत्य पप्रच्छुः केन त्वं चिरं जीवसि केन वाऽऽनन्दमनुभवसीति	द. मू. १
ब्रह्मार्होऽसि गौतम यो मामुपागा एहि त्वा ज्ञपयिष्यामीति	कौ. त. १।१
ब्रह्मविलोकनधियं न जहाति योगी	वराहो.२।८२
ब्रह्मावलोकयंस्तद्रूपो भवति	अद्वयता. १
ब्रह्मावलोकयोगपट्टः	निर्वाणो. २
ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः । नाशमेवानुधावन्ति सलिलानीव वाडवम्	महो. ३।५२
ब्रह्मा विश्वः कतमः स्वयम्भूः प्रजापतिः संवत्सरः	म.ना.१७।१२
ब्रह्मा शक्तिर्महादेवोजन्यतेपुरुषोत्तमात्	सि. वि. ३
ब्रह्मा शिवो मे अस्तु सदाशिवोम्	भस्मजा. २।७
ब्रह्मासाध्यं च यो गच्छेद्ब्रह्महा स प्रकीर्तितः	शिवो. ७।६२
ब्रह्माऽसि पूर्णोऽसि परात्परोऽसि	ते.बिं. ५।६१
ब्रह्मा सृजति लोकान्वै	ते.बिं.५।८८
ब्रह्मास्त्रां महाविद्यां शाम्भवीं...देवीमाहूय ध्यायेत्	पीताम्बरो.१
ब्रह्मास्मि नेतरकलाकलनं हि किञ्चित्	अ.पू. १।१९
ब्रह्मास्मि प्रभवोऽस्म्यहम्	मैत्रे. ३।१
ब्रह्माहमस्मि अहमस्मि	त्रि.म.ना.८।३
ब्रह्माहमस्मि, योऽहमस्मि, ब्रह्माहमस्मि	महाना.६।७
ब्रह्माहमस्मीति कृतकृत्यो भवति	मं.ब्रा. ३।३
ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन्कृतकृत्यो भवति	मं.ब्रा. २।८
ब्रह्माहमस्मीति तत्त्वमस्यादिवाक्यार्थस्वरूपानुसंधानं कुर्वन्नुदीचीं दिशं गच्छेत्	प. हं. प. ५
ब्रह्माहमस्मीति भावयन्गुर्वर्थं ग्राममुपेत्य ध्रुवशीलोऽष्टौ मास्येकाकी चरेद्द्वावेवाचरेत्	प. हं. प. ७
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते	ते.बिं. ४।२
ब्रह्माहं ब्रह्म चिच्छत्रुर्ब्रह्म चिन्मित्रबान्धवाः	अ.पू. ५।२०
ब्रह्माहं, विष्णुरहं, सौरोऽहं, ब्राह्मोऽहम्	अद्वै. भा. १
ब्रह्मा हि परः परो हि ब्रह्मा	म.ना.१६।१२
ब्रह्मा हैव ता ३ इ ऊर्ध्वं स्त्वेवोदसर्पत्	१ऐत.१।४।२
ब्रह्मेदं बृंहिताकारं बृहद्बृहदवस्थितम्	अ. पू.२।३७
ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम् । दिव आत्मानꣳ सवितारं बृहस्पतिम् । चतुर्होतारं प्रदिशो नु क्लृप्तम् । वाचो वीर्यं तपसाऽन्वविन्दत्	चित्यु.११।२
ब्रह्मैकमेव, ब्राह्मणत्वमेकमेव	परब्र. ६
ब्रह्मैकस्त्वं द्विधा त्रिधा शांतिस्त्वं	चतुर्वे. ८
ब्रह्मैतद्ब्राह्मण उज्जहार	चित्यु.११।६
ब्रह्मैव केवलमहं परिपूर्णमस्मि	वराहो.२।७३

ब्रह्मैव केवलं शुद्धं विद्यते तत्त्वदर्शने	२ आत्मो. ३
ब्रह्मैव तेन गन्तव्यं	भ.गी. ४।२४
ब्रह्मैव पुष्पं ता अमृता आपः	छांदो. ३।५।१
ब्रह्मैव ब्रह्मवित् स्वयम्	२ आत्मो.२३
ब्रह्मैव भवति, इत्याह भगवान्ब्रह्मा	शरभो. ३७
ब्रह्मैव भवति स्वयम्	कठरु. १५
ब्रह्मैव वित्तं पुरुषस्य केवलम्	इतिहा. ४४
ब्रह्मैवविद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपिच	पा. ब्र. ३२
ब्रह्मैव सकलं स्वयम्	ते.बिं.६।४३
ब्रह्मैव सन्ब्रह्माप्येति [बृह.४।४।६+ [नृसिंहो. ९।२,५।९,५।८+	सुबा. ३।३+ सहवै. २
ब्रह्मैव सर्वमित्येव भाविते ब्रह्म वै पुमान्। सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते	अ. पू.५।२१
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च। कर्माण्यपि समग्राणि बिभर्तीति विभावय	यो.शि. ४।६
ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्त्रयम्	ते. बिं.६।४२
ब्रह्मैव सर्वं नान्योऽस्ति	ते.बिं. ६।३१
[ईश्वर इति च–] ब्रह्मैव स्वशक्तिं प्रकृत्यभिधेयामाश्रित्य लोकान् सृष्ट्वा प्रविश्यांतर्यामित्वेन ब्रह्मादीनांबुद्धीन्द्रियनियन्तृत्वादीश्वरः	निरालं. ६
ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य एनं हिनस्ति	बृह. ।४।११
ब्रह्मैवास्मि न चेतरः	महो.२।११
ब्रह्मैवावाप्नोति	ग.शो. ३।१
ब्रह्मैवास्मि निरामयम्	अ.पू. ५।६८
ब्रह्मैवाहमस्मीति निश्चित्य निर्विकल्पसमाधिना स्वतन्त्रो यश्चरति स सन्न्यासी	निरालं.३२
ब्रह्मैवास्मीति यावृत्तिः पूरकोवायुरुच्यते	ते.बिं.१।३२
ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः	ते.बिं.१।३६
ब्रह्मैवाहमस्मीति..या भाव्यते सैषा षोडशी श्रीविद्या पञ्चदशाक्षरी…	बह्वृचो.४
ब्रह्मैवाहमस्मीत्यनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स ह परमहंसपरिव्राट्	प.हं.प.११
ब्रह्मैवाहमिति स्मरन्…मुक्तो भवति	ना.प. ५।५०
ब्रह्मैवाहमिति ज्ञात्वावीतशोकोभवेन्मुनिः	महो.४।२९
ब्रह्मैवाहं न जीवोऽहं ब्रह्मैवाहं न भेदभूः	ते.बिं.६।३३
ब्रह्मैवाहं न देहोऽहं ब्रह्मैवाहं न गोचरः	ते.बिं. ६।३३
ब्रह्मैवाहं न संसारी ब्रह्मैवाहं न मे मनः	ते. बिं.६।३२
ब्रह्मैवाहं परात्परः	ते.बिं.६।३४
ब्रह्मैवाहं न संशयः	ते.बिं. ३।३९
ब्रह्मैवाहं सच्चिदानन्दरूपं	सर्वसारो.११
ब्रह्मैवाहं सनातनम् [ते.बिं. ३।३२+	६।३१
ब्रह्मैवाहं सर्ववेदान्तवेद्यं नाहं वेद्यं व्योमवातादिरूपम्	सर्वसारो. ११
ब्रह्मैवेदममृतं तत्पुरस्ताद्ब्रह्मानन्दं परमं चैव पश्चात्	पा. ब्र. ३५
ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण	मुंड. २।२।११
ब्रह्मैवेदं विजृंभते	अ. पू. २।२६
ब्रह्मैवेदं विश्वमिदं वरिष्ठम्	मुण्ड.२।२।११
ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपं	नृसिंहो. ७।३
ब्रह्मैवैकमनाद्यन्तमब्धिवत्प्रविजृम्भते	अ. पू. ५।१०
ब्रह्मै[illegible]प्नोति	तैत्ति. १।८।१
ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि	श्वेता. २।८
ब्रह्मोपनिषदो ब्रह्म	पा. ब्र. ५
ब्रह्मोवाच नाहं वेद्मि	ग. शो. ३।९
ब्राह्मण एकहोता। ब्रह्मणे स्वयम्भुवे स्वाहा	चित्यु. ७।१
ब्राह्मणक्षत्रियविशां	भ.गी.१८।४१
ब्राह्मणत्वं ब्रह्म ध्यानार्हत्वं यतित्वमलक्षितान्तःशिखोपवीतत्वम्	परब्र.५
ब्राह्मणस्त एकं मुखं, तेन मुखेन राज्ञोऽत्सि, तेन मुखेन मामन्नादं कुरु	कौ. त. २।९
ब्राह्मणस्य दक्षिणे हस्ते पञ्च तीर्थानि भवन्ति	आचम. २
ब्राह्मणस्य विजानतः	भ.गी. २।४६
ब्राह्मणस्य शरीरं जायते	यज्ञोपे. १
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं हत्वा च किल्बिषम्। सञ्चिनोति नरो मोहाद्यत्तदपि नाशयेत्	रामो. ५।१५

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो
वर्णा द्विजातयः भवसं. २।६२
ब्राह्मणः पञ्चाक्षरमनुभवति रुद्रोप. १
ब्राह्मणः शिवपूजारतः रुद्रोप. १
ब्राह्मणः श्वेतवर्णः क्षत्रियोरक्तवर्णोवैश्यः
पीतवर्णः शूद्रः कृष्णवर्ण इति
नियमाभावात् (न देहो ब्राह्मणः) व. सू. उ. ४
अथ ब्राह्मणः, स ब्राह्मणः केन स्या-
द्येन स्यात्तेनेदृश एवातोऽन्यदार्तम् बृह. ३।५।१
(ततो) ब्राह्मणः समाहितो भूत्वा
तत्त्वम्पदैक्यमेव सदा कुर्यात् पैङ्गलो. ३।४
ब्राह्मणातिक्रमो नास्ति मूर्खो मन्त्रं
विवर्जयेत् । ज्वलन्तमग्निमुत्सृज्य
नहि भस्मनि हूयते इतिहा. ४९
ब्राह्मणानामयमेव धर्मोऽयमेव धर्मः भस्मजा १।६
ब्राह्मणानां तु सर्वेषां वैदिकानामनु-
त्तमम् । गोपीचन्दनवारिभ्यामूर्ध्व-
पुण्ड्रं विधीयते वासुदे. १४
ब्राह्मणानां यशो राज्ञां यशो विशां
यशोऽहमनुप्रापत्सि छां.८।१४।१
ब्राह्मणानां सहस्रेषु भुक्त्वा तु नव
सप्त च । भवन्ति क्षायिके भूत्वा
च्यायिके च न संशयेत् इतिहा. ४७
ब्राह्मणानीतिहासान् पुराणानिकल्पान्
गाथानाराशंसीः प्रीणाति सहवै. १५
ब्राह्मणान्न निन्देत्तद्व्रतम् छां.२।२०।२
ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वम् बृह.३।८।१२
ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स
एता गा उदजताम् बृह.३।१।२
ब्राह्मणा भगवन्तो यो वः कामयते
स मा पृच्छतु बृह.३।९।२७
ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ
प्रश्नौ प्रक्ष्यामि बृह.३।८।१
ब्राह्मणा ये भक्तिमार्गं न विदन्ति
तेषां सम्भाषणं स्पर्शं न कुर्यात् सामर. २२
ब्राह्मणा वाव रश्मस्तेषामेवादिति छाग. १।२

ब्राह्मणास्तु सदृशाः सूर्येण इतिहा. १८
ब्राह्मणास्तेन वेदाश्च भ.गी.१७।२३
ब्राह्मणाः क्षत्रिया वैश्याः(रुद्राक्षजातयः) रु. जा. ८
ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च
लोकैषणायाश्च व्युत्थायाथ भिक्षा-
चर्यं चरन्ति बृह.३।५।१
ब्राह्मणे गवि हस्तिनि भ.गी.५।१८
ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां
ब्रह्माऽभवत् बृह.१।४।१५
ब्राह्मणेमनुष्येष्वेताभ्यांरूपाभ्यां..(मापा.) बृ.उ.१।४।१५
ब्राह्मणेष्वमृतमिति तज्जलं शिरसि क्षिपेत् बृ.जा.३।१८
ब्राह्मणो द्विपदां वरः इतिहा. ४९
ब्राह्मणो निर्वेदमायात् मुंड.१।२।१२
ब्राह्मणो बिभृयाच्छ्वेतान्रक्तान्राजा
तु धारयेत् । पीतान्वैश्यस्तु बिभृया-
त्कृष्णाञ्छूद्रस्तु धारयेत् (रुद्राक्षान) रु. जा. १०
ब्राह्मणो मनुष्येषु, क्षत्रियो क्षत्रियेण.. बृह.१।४।१५
ब्राह्मणो यजेत; न सुरां पिबेत्
ब्राह्मणो वै मुखाज्जज्ञे बाह्वोः क्षत्रं
ऊर्वोर्वैश्यः पद्भ्यां शूद्रः ग.शो.३।११
ब्राह्मणोऽष्टाचत्वारिंशद्वर्षवासी च आश्रमो. १
ब्राह्मणोऽस्यमुखमासीत् [चित्त्यु.१२।५ +सुबालो.१।४
[ऋ.अ.८।४।१९=मं.१०।९०।१२ वा.सं.३१।११
ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यं-
जातयः । स्थूलदेहगता एते स्थूला-
द्भिन्नस्य मे नहि आ. प्र. २३
ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ब्रह्मो. १९
ब्राह्मी नारायणी माहेश्वरी कौमारी
अपराजिता वाराही नारसिंहिका
चेत्यष्टपत्रगाः कालिको. १
ब्राह्मीमिष्टिं यजेत्तासामहोरात्रेण निर्वपेत् कुण्डिको. २
ब्राह्मीं वाव त उपनिषदमब्रूमेति केनो. ४।७
ब्राह्म्यादयः सप्त मातरो नवमे सूर्यता. ५।१
ब्रूयाद्भद्रमभद्रकम् शिवो. ७।८१
ब्लूं चोदयित्री सूनृतानां चेतन्ती
सुमतीनाम् [ऋ. सं. १।३।११+
[वा. सं. १२।१२+ तै.सं.१।५।११

भ

भक्तवत्सलः स्वयमेव सर्वेभ्यो मोक्षविघ्नेभ्यो भक्तिनिष्ठान्सर्वान् परिपालयति	त्रि.म.ना.८।४
भक्तानां धारणात्पापं (रुद्राक्षस्य) दिवारात्रिकृतं हरेत् । लक्षं तु दर्शनात्पुण्यं कोटिस्तद्धारणाद्भवेत्	रु. जा. उ. ४
भक्तानां भक्त एव ज्ञातिः	सामर. २२
भक्तानां भक्तैः सह कार्यं, नान्यैः	सामर. २२
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्	गणपत्यु.१२
भक्ता राजर्षयस्तथा	भ.गी. ९।३३
भक्तास्तेऽतीव मे प्रियाः	भ.गी.१२।२०
भक्तास्त्वां पर्युपासते	भ.गी. १२।१
भक्तिमान् मे प्रियो नरः	भ.गी.१२।१९
भक्तिमान्यः स मे प्रियः	भ.गी.१२।२७
भक्तियोगान्मुक्तिः	त्रि.म.ना.८।४
भक्तियोगेन सेवते	भ.गी.१४।२६
भक्तियोगो निरुपद्रवः	त्रि.म.ना.८।४
भक्तिरव्यभिचारिणी	भ.गी.१३।११
भक्तिरस्य (कृष्णस्य) भजनम्	गो.पू. २।२
भक्तिर्भक्त्या भवति	सामर. ९५
भक्तिं मयि परां कृत्वा	भ.गी.१८।६८
भक्तोऽसि मे सखा चेति	भ. गी. ४।३
भक्त्या त्वनन्यया शक्यः	भ.गी.११।५४
भक्त्या मामभिजानाति	भ.गी.१८।५५
भक्त्या युक्तो योगबलेन चैव	भ.गी. ८।१०
भक्त्या लभ्यस्त्वनन्यया	भ.गी. ८।२२
भक्त्या नम्रतनोर्विष्णोः प्रसादमकरोद्विभुः	शरभो. १८
भक्त्या विना ब्रह्मज्ञानं कदापि न जायते	त्रि.म.ना.८।४
भक्त्या सर्वसिद्धयः सिद्धयन्ति	त्रि.म.ना.८।४
भक्त्याऽसाध्यं न किञ्चिदस्ति	त्रि.म.ना.८।४
भक्षणाद्युनप्रशंप्रादक्षिण्यादारिद्र्यनाशिनीं...य एवं वेद स वैष्णवो भवति (तुलसीं)	तुलस्यु. २
भगव इति तं प्रतिशुश्राव	छांदो. ४।८।२
भगव इति ह प्रतिशुश्राव	[छान्दो. ४।५।१+६।२+७।२ +८।२+९।२
भगवञ्छरीरमिदं मैथुनादेवोद्भूतं संविदपेतं...निरयएवमूत्रद्वारेण	मैत्रे. १।४
भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेणनिर्धूतकलिर्भवति	कलिसं. १
भगवतो वा अहमविरत्याऽन्यानवृषि	छां.१।११।२
भगवन् देवाः प्रजां विधारयन्ते	प्रश्नो. २।१
भगवन्कत्येव प्रजा विधारयन्ते(मा.पा.)	प्रश्नो. २।१
भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येयः	ब्र.शिखो. १
भगवन् कुत एष प्राणो जायते	प्रश्नो. ३।१
भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्ते	प्रश्नो. १।३
भगवन्कोऽवधूतः, तस्य का स्थितिः किं लक्ष्म किं संसरणमिति	१ अवधू. १
भगवन् तदभ्यासवशाद्भ्रमरकीटन्यायात्तदभ्यासः कथमिति	ना. प.६।१
भगवन्तावग्रे वदतां ब्राह्मणयोर्विवदतोर्वाचं श्रोष्यामीति	छांदो.१।८।२
भगवन् भक्तिनिष्ठां मे प्रयच्छ	त्रि.म.ना.८।७
भगवन्यद्येवमस्यात्मनो महिमानं सूचयसीत्यन्यो वा परःकोऽयमात्मा	मैत्रा. ३।१
भगवंस्त्वं नो गतिः	मैत्रे. १।४
भगवन् सर्वविजय सहस्रारापराजित। शरणं त्वां प्रपन्नोऽस्मि श्रीकरं श्रीसुदर्शनम्	वनदु. ९२
भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक्	अ. शां. ८४
भगः शक्तिर्भगवान्काम ईश उभा दातारविह सौभगानाम् । समप्रधानौ समसत्त्वौ समोजौ तयोः शक्तिरजरा विश्वयोनिः	त्रिपुरो. १४
भजतां प्रीतिपूर्वकम्	भ.गी.१०।१०
भजते मामनन्यभाक्	भ.गी. ९।३०
भजत्येकत्वमास्थितः	भ.गी. ६।३१

भजनानन्दोपासकानां न वर्णो न देशो न कालोऽस्ति	सामर. २२
भजन्ते मां दृढव्रताः	भ.गी. ७।२८
भजन्त्यनन्यमनसः	भ.गी.९।१३
भजेद्भ्रमरकीटवत् सैव सायुज्यमुक्तिः	मुक्ति.१।२४
भद्रमित्याह भद्रः खल्वयं श्रिया जुष्टः	अव्यक्तो. ३
भद्रं पश्यन्त उपसेदुरग्रे	चित्यु.११।९
[तै.सं.५।७।४।३+	तै.आ.३।११।९
भयप्रदमकल्याणं वैर्यसर्वस्वहारिणम्। मनःपिशाचमुत्सार्य योऽसि सोऽसि स्थिरो भव	अ.पू. ५।३५
भयमोहशोकक्रोधत्यागस्त्यागः	निर्वाणो. ५
भयं क्रोधमथालस्यमतिस्वप्रातिजागरम्। अत्याहारमनाहारं नित्यं योगी विवर्जयेत्	अ.ना. २८
भयं चाभयमेव च	भ.गी. १०।४
भयाज्ञानाभ्यामिन्द्रियसङ्घातैः कम्पन्निव मृततुल्या मूर्च्छा भवति	पैङ्गलो. २।९
भयात्तस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्चवायुश्च मृत्युर्धावति पंचमः	कठो. ६।३
भयात्सारङ्गवदेकत्र न तिष्ठेत्	ना.प. ७।१
भयाद्रणादुपरतं	भ.गी. २।३५
भयेन च प्रव्यथितं मनो मे	भ.गी.११।४५
भरद्वाजोऽङ्गिरसे परावरां (ब्रह्मविद्यां प्रोवाच)	मुण्डो. १।२
भरद्वाजो बृहद्दाचक्रे अग्नेः	२ऐत.१।६।२
भरे भरेषु समुपह्वयाम प्रसासहि	आर्षे.१०।२
(अथ)भर्ग इति भासयतीमाँल्लोकानिवि रञ्जयतीमानि भूतानि गच्छत इति गच्छत्यस्मिन्नागच्छत्यस्मा इमाः प्रजास्तस्माद्भारकत्वाद्भर्गः	मैत्रा. ६।७
(अथ)भर्ग इति योह वा अस्मिन्नादित्ये निहितस्तारकेऽक्षिणि चैष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गो भर्जति वैष भर्ग इति	मैत्रा. ६।७
भर्ग इत्यापो ह वै भर्गः	गायत्री१.२
भर्गो देवस्य धीमहि मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधु द्यौरस्तु नः पिता भुवः स्वाहा	बृह. ६।३।६
भर्ता भोक्ता महेश्वरः	भ.गी.१३।२३
भर्ता च मे भूयात्	चित्यु.७।१
भर्ता सम्भ्रियमाणो बिभर्ति	चित्यु.१४।१
भर्ता स्वानाꣳ श्रेष्ठः पुर एता	बृह.१।३।१८
भवताऽप्येष एवार्थः कथितो वाग्विदांवर	महो. २।३३
भवति च सर्वेषु पादेषु चतुरात्मा	नृसिंहो. ३।२
भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद	बृह.१।३।२६
भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद	बृह. १।३।२५
भवतीत्यनुशुश्रुम	भ.गी. १।४
भवतोऽज्ञानमेव च	भ.गी.१४।१७
भवत्यत्यागिनां प्रेत्य	भ.गी.१८।१२
भवन्तः सर्व एव हि	भ. गी. १।११
भवत्यखिलजन्तूनां यदन्तस्तद्बहिः स्थितम्	अ. पू. १।३६
भवत्यन्नादोऽधिपतिर्य एवं वेद	बृह. १।३।१८
भवत्यस्यान्नमापश्च पृथिवीचान्नमेतन्मयानि ह्यन्नानि भवन्ति	१ऐत. ३।१।२
भवत्यस्यान्नमोषधिवनस्पतयोऽन्नम्	१ऐत. ३।१।३
भवन्ति भावा भूतानां	भ.गी. १०।५
भवन्ति विविधा रोगाः पवनव्यत्ययक्रमात्	यो. चू. ११७
भवन्ति सम्पदं दैवीं	भ.गी. १६।३
भवन्ति हास्य पशवः, पशुमान्भवति	छांदो. २।६।२
भवन्तो (देवाः) वै न मद्भिन्नाः	गणेशो.४।१०
भव भावनया युक्तो मुक्तः परमया धिया। धारयात्मानमव्यग्रो ग्रस्तचित्तं चितः पदम्	महो. ४।९२
भव वर्जितचिन्मात्रं सर्वं चिन्मात्रमेव हि	ते. बिं. २।२५
भवं यत्काद्रुतनिम्ना	चित्यु. २१।१
भवानः सप्रथस्तमः	चित्यु. १७।१
भवानिदं जगत्सर्वं व्याप्यैव परितिष्ठति	गणेशो. ३।७
भवानेव गच्छत्विति	बृह.- ६।२।४

भवान् भीष्मश्च कर्णश्च	भ. गी. १।८
भवाप्ययौ हि भूतानां	भ.गी. ११।२
भवामि न चिरात्पार्थ	भ.गी. १२।७
भविता न च मे तस्मात्	भ.गी.१८।६९
भविष्यति पुनर्धनम्	भ.गी.१६।१३
भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति	बृह. ६।३।३
भविष्याणि च भूतानि	भ.गी. ७।२६
भवेदनर्थाय विना प्रमाणं (परमार्थः)	ब्र. वि. ३२
भवेद्युगपदुत्थिता	भ.गी.११।१२
भस्मदिग्धाङ्गो रुद्राक्षभूषणो मामेव सर्वभावेन प्रपन्नो मदेकपूजानिरतः सम्पूजयेत्	भस्मजा.२।१०
भस्मधारणमकृत्वा नाश्नीयादापोऽन्नमन्यद्वा	भस्मजा. १।६
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् । भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः	बृ.जा. ५।१९
भस्मनो यद्यभावस्तदानर्थभस्मदाहनजन्यमन्यद्वावश्यं मन्त्रपूतं धार्यम्	भस्मजा.१।७
भस्ममुष्टिं समादाय संहितामन्त्रमन्त्रिताम् । मस्तकात्पादपर्यन्तं मलस्नानं पुरोदितम्	बृ. जा. ४।२
भस्म व्यापांडुरांगः शशिशकलधरो ज्ञानमुद्राक्षमालावीणापुस्तैर्विराजत्करकमलधरोयोगपट्टाभिरामः । ...सव्यालःकृत्तिवासाः सततमवतु नोदक्षिणामूर्तिरीशः	द. मू. ९
भस्मसन्दिग्धसर्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः । भस्मशायी च पुरुषो भस्मनिष्ठ इति स्मृतः	बृ.जा. ९।२०
भस्म सर्वाविभक्षणात्	बृ. जा. १।६
भस्मसात्कुरुते तथा	भ.गी. ४।३७
भस्मसात्कुरुतेऽर्जुन	भ.गी. ४।३७
भस्माधिक्यमभीप्सुस्तु अधिकं गोमयं हरेत्	बृ.जा.३।२२
भस्मायुधाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो ज्वरः प्रचोदयात्	वनदु.२५।९८
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम्...एवं यः सततं ध्यायेद्देवदेवं सनातनम् । स मुक्तः सर्वपापेभ्यो निःश्रेयसमवाप्नुयात्	शांडि.३।२।३
भागमेकं न्यसेद्भूमौ द्वितीयं वेदिमध्यतः। तृतीयभागे पूजा स्यादिति लिङ्गं त्रिधा स्थितम्	शिवो. २।३
भागार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे । देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा	आगम. ९
भातीत्युक्ते जगत्सर्वं भानंब्रह्मैवकेवलम्	वराहो.२।७२
भानाभानविहीनात्मावैदेहीमुक्तएवसः	ते.बिं.४।७९
भानुकोटिसमप्रभम् । प्रसन्नं सामवेदाख्यं	पञ्चब्र. ६
भानुनेव जगत्सर्वं भास्यतेयस्यतेजसा	२आत्मो. ८
भानुमध्यगतः शशी	ध्या.बिं. २६
भाभिर्गतिरस्य हीति भर्गः	मैत्रा. ६।७
भारो विवेकिनः शास्त्रं भारो ज्ञानं च रागिणः । अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः	महो. ३।१५
भार्या पुत्रो गृहं धनं सर्वं तेभ्यो देयम्	स्वसंवे. ४
भार्यायै रेतः संवत्सरस्य तेजोभूतस्य भूतस्यात्मभूतस्य त्वमात्माऽसि	कौ. उ. १।६
भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् । कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम्	श्वेता. ५।१४
भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु	जा.द.४।५१
भावनाभावमात्रेणसङ्कल्पःक्षीयतेस्वयम्	महो.९।१८३
भावनामखिलांत्यक्त्वा यच्छिष्टं तन्मयो भव [मैत्रे.२।२८+अ.पू.५।१०४	वराहो.४।१९
भावनामात्रमेवात्र कारणम्	यो.शि.३।२३
भावना सर्वभावेभ्यः समुत्सृज्य समुत्थितः । अवशिष्टं परं ब्रह्म केवलोऽस्मीति भावय	अ.पू. ५।९५
भावमव्ययमीक्षते	भ.गी.१८।२०
भावमात्सर्यतृष्णाशामोहादिरहितः (वर्तते स ब्राह्मणः)	व. सू. ९
भावयन्ति चितिश्चैत्यं व्यतिरिक्तमिवात्मनः । सङ्कल्पतामिवायाति बीजमङ्कुरतामिव	महो.५।१८०

भावयन्मनसा विष्णुं परमात्मानमीश्वरम् (यतिः)	ना.प.५।४९
भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता	ते.बिं.१।४२
भावशुद्धिर्हरेर्भक्तिरितितिक्षा करुणा तथा ।...आनृशंस्यं सतां सङ्गः पारमैकान्त्यहेतवः	भवसं.५।२०
भावसंवित्प्रकटितामनुरूपा च मारुते । चित्तस्योत्पत्त्युपरमा वासनां मुनयो विदुः	मुक्तिको.२।२४
भावसंशुद्धिरित्येतत्	भ.गी.१७।१६
भावं भावेन सौम्यं सौम्येन...ग्रसति स्वेन तेजसा	अ.शिरः.३।३
भावा अप्यद्वयेनैव तस्माद्द्वयता शिवा	वैतथ्य. ३३
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि	शु. र. १।१९
भावाभावदशाकोशं दुःखरत्नसमुद्गकम् । बीजमस्य शरीरस्य चित्तमाशावशानुगम्	अ.पू. ४।४०
भावाभावदहनं	निर्वाणो.७५
भावाभावद्वयातीतं स्वप्नजागरणादिगम् । मृत्युजीवननिर्मुक्तं तत्त्वं तत्त्वविदो विदुः	अमन. २।६१
भावाभावमजं सर्वमितिमत्वासुखीभव	अ.पू.५।६७
भावाभावविनिर्मुक्तं जरामरणवर्जितम् । प्रशान्तकलनारम्यं नीरागं पदमाश्रय	महो.६।७२
भावाभावविनिर्मुक्तं भावनामात्रगोचरं	यो.शि.३।२२
भावाभावविहीनोऽस्मि भासा हीनोऽस्मि भास्म्यहम्	मैत्रे. ३।५
भावाभावादिद्वन्द्वातीतः...परं ब्रह्म प्राप्नोति	मं. ब्रा. ३।१
भावाभावेपदार्थानांहर्षामर्षविकारदा । मलिना वासना यैषा सा सङ्ग इति कथ्यते	अ. पू. ५।५
भावाभावौ ततस्त्यक्त्वा निर्विकल्पः सुखी भव	महो.४।१०९
भावा विभवभूमयः । अयश्शलाकासदृशाः परस्परमसङ्गिनः	महो. ३।४
भवांश्च सर्वान् विनियोजयेद्यः । तेषामभावे कृतकर्मनाशः	श्वेता. ६।४
भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मकम् । दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत्	ते.बिं. १।५०
भावितं तीव्रसंवेगादात्मना यत्तदेव सः । भवत्याशु कपिश्रेष्ठ विगतेतरवासनः	मुक्ति.२।५८
भावेनगलितेभावे स्वस्थस्तिष्ठामिकेवलः	१सं.सो.२।३६
भावेष्वरतिरायाता पथिकस्य मरुष्विव	महो. ३।६
भावैरसद्भिरेवायमद्वयेन च कल्पितः	वैतथ्य. ३३
भावोऽप्यभावमायाति जीर्यन्ते वै दिगीश्वराः	महो. ३।५१
भासनाद्ग्रसितम्	बृ.जा. १।६
भासमानमिदं सर्वं भानरूपं परं पदम् । पश्यन्वेदान्तमानेनसद्यएवविमुच्यते	वराहो.२।१४
भासस्तवोग्राः प्रतपन्ति विष्णो	भ.गी.११।३०
भासस्तस्य महात्मनः	भ.गी.११।१२
भासा त्वया व्योम्नि कृतः सुताक्ष्यस्त्वं वै कुमारस्त्वमरिष्टनेमिः	एका.उ. ४
भासा हीनोऽस्मि भाऽस्म्यहं	मैत्रे. ३।५
भास्कराय विद्महे महाद्युतिकराय धीमहि । तन्नो आदित्यःप्रचोदयात्	वनदु. १२१
भास्कराय विद्महे महद्द्युतिधराय धीमहि। तन्नो आदित्यः प्रचोदयात्	महाना.३।१०
भास्याम्यहमिति चन्द्रमाः	बृह.१।५।२२
भास्वतीमेवाप्येति यो भास्वतीमेवास्तमेति	सुबालो.९।१३
भास्वती स्मृता चतुर्थः पादो भवति भवति च सर्वेषु पादेषु चतुरात्मा	नृसिंहो. ३।३
भास्वतीं त्वासादयामि	चित्यु.१९।१
भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति	बृह. ५।६।१
भिक्षाटनसमुद्योगाद्येन केन निमन्त्रितम । अयाचितं तु तद्भैक्षं भोक्तव्यं च मुमुक्षुभिः	सं.सो. २।६८

भिक्षादि वैदलं पात्रं स्नानद्रव्यमवारितम् । एतां वृत्तिमुपासीना घातयन्तीन्द्रियाणि च	२सन्न्यासो.१५
भिक्षादि वैदलं पात्रं स्नानद्रव्यमवारितम् । एवं वृत्तिमुपासीनो यतेन्द्रियो जपेत्सदा	कुण्डिको. १३
भिक्षामात्रेण जीवी स्यात्स यतिर्यतिवृत्तिहा	ना.प. ५।१२
भिक्षामात्रेण यो जीवेत्स पापी यतिवृत्तिहा	प. हं. ७
भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च । योजनान्न परं याति सर्वथा पङ्गुरेव सः	ना.प. ३।६५
भिक्षाशी यत्किञ्चिन्नाद्यात्	कठरु. ४
भिक्षा सर्वत्र लभ्यते	१सं.सो.२।९९
भिक्षुर्नैहिकामुष्मिकापेक्षः	ना. प. ५।११
भिक्षाशनं दद्यात्पवित्रं धारयेज्जन्तुसंरक्षणार्थम्	२सन्न्यासो.१०
भिक्षुश्चतुर्दशकरणानां न तत्रावकाशं दद्यात्	ना. प. ७।३
भिक्षूणां पटलं यत्र विश्रांतिमगमत्सदा । तदैपदं ब्रह्म तत्त्वं ब्रह्ममात्रं करोतु माम्	भिक्षुको.शीर्षकं
(ॐ अथ) भिक्षूणां मोक्षार्थिनां कुटीचक-बहूदक-हंस-परमहंसाश्चेति चत्वारः (भेदाः)	भिक्षुको. १
भिद्यते चेज्जडो मदश्चिदेका सर्वदाखलु	रुद्रहृ. ४५
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे [मुण्ड.२।२।८+ [महो. ४।८२+ अ. पू. ४।३१+	यो.शि.५।४९ सरस्व. ५६
भिद्यते हृदयग्रन्थिः...क्षीयन्ते परमाकाशे ते यान्ति परमां गतिम्	यो.शि.६।४०
भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते एवमेवास्य..षोडशकलाः ...अस्तं गच्छन्ति	प्रश्नो. ६।५
भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते । एषोऽकलोऽमृतो भवति	प्रश्नो. ६।५
भिन्दन्ति योगिनः सूर्यं योगाभ्यासेन वै पुनः	यो.शि.१।७५
भिन्नं भगव इति (शिष्य आह)	छां. ६।१२।१
भिन्ना प्रकृतिरष्टधा	भ. गी. ७।४
भिन्नाभिन्नं न पश्यन्ति	...
भिन्ने तमसि चैकत्वमेक (मे) एवानुपश्यति [ब्र. विं. १५+	त्रि.ता. ५।१५
भिन्ने पञ्चात्मके देहे गते पञ्चसु पञ्चधा । हंसस्त्यक्त्वा गतो देहं कस्मिन्स्थाने व्यवस्थितः	पिंडो. २
भिया देयम्	तैत्ति.१।११।३
भीमकर्मा वृकोदरः	भ. गी. १।१५
भीमार्जुनसमा युधि	भ. गी. १।४
भीषणमभीषणं	नृसिंहो. ६।१
भीषणमित्याह-भीषावा अस्मादादित्य उदेति भीतश्चन्द्रमा भीतोवायुर्वाति भीतोऽग्निर्दहतिभीतः पर्जन्यो वर्षति	अव्यक्तो. ३
भीषणं सप्तमं स्थानं (जानीयात्)	नृ. पू. २।३
भीषाऽस्मादग्निश्चेन्द्रश्च	भस्मजा. २।६
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः [तैत्ति. २।८+	नृ. प. २।१०
भीषाऽस्माद्वातः पवते [नृ. पू. २।१०+	तैत्ति. २।८ भस्मजा. २।६
भीषोदेति सूर्यः [नृ. पू. २।१०+	तैत्ति. २।८ भस्मजा. २।६
भीष्मद्रोणप्रमुखतः	भ.गी. १।२५
भीष्ममेवाभिरक्षन्तु	भ. गी. १।११
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ	भ.गी.११।२६
भुङ्क्ते प्रकृतिजान् गुणान्	भ.गी.१३।२३
भुञ्जते ते त्वघं पापाः	भ.गी. ३।१३
भुञ्जानं वा गुणान्वितम्	भ.गी. ५।१३
भुञ्जीय भोगान् रुधिरप्रदिग्धान्	भ. गी. २।५
भुव इति बाहू, द्वौ बाहू द्वे एते अक्षरे	बृह.५।५।३,४
भुव इति वायुः	तैत्ति. १।५।२
भुव इति वायौ	तैत्ति. १।६।१
भुव इति सामानि	तैत्ति. १।५।२
भुव इत्यन्तरिक्षं	तैत्ति. १।५।१
भुव इत्यन्तरिक्षलोकः	गायत्रीर. २
भुव इत्यपानः	तैत्ति. १।५।३

भुक्तान्नरसादिकं गात्रेऽग्निना सह... साङ्गोपाङ्गकलेवरं व्याप्नोति	शांडि.१।४।७
भुक्त्वाजन्मसहस्राणि भूयः संसारसङ्कटे । पतन्ति केचिद्बुधाः..	महो.५।१४३
भुजः करिष्यमाणः	चित्त्यु.१४।४
भुज्यते शिवसम्प्रीत्यै मिताहारः स उच्यते	योगकुं. १।४
भुञ्जन्मूत्राद्युत्सृजन्वा कदाचिन्न तन्नोच्छिष्टं भजते शुद्धदेही	सि. शि. ११
भुवनाधिपतिविशांपतिपशुपतिस्थाणुभवाः	सूर्यता. ५।१
भुवनानीति तद्विदः	वैतथ्य. २४
भुवः प्रपद्येऽमुनाऽमुनाऽमुना	छांदो.३।१५।३
भुवः स्वाहेत्यग्नौ हुत्वा मन्थे... संस्रवमवनयति	बृह. ६।३।२
भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा	महाना. ७।१
भुवो वायवेऽन्तरिक्षाय स्वाहा	महाना. ७।२
भुसुण्डः कालाग्निरुद्रं अग्नीषोमात्मानं भस्मस्नानविधिं पप्रच्छ	बृ. जा. २।१
भूतग्राममचेतसः	भ.गी. १७।६
भूतग्राममिमं कृत्स्नं	भ.गी. ९।८
भूतग्रामः स एवायं	भ.गी. ८।१९
भूततोऽभूततो वाऽपि सृज्यमाने समा श्रुतिः	अद्वैत. २३
भूतदिक्पालबीजानि यन्त्रस्याङ्गानि वै दश	त्रि.म.ना.७।१२
भूतपिशाचशाकिनीप्रेतवेतालनाशको भवति	नृ.षट्च. ८
भूतप्रकृतिमोक्षं च	भ.गी.१३।३५
भूतप्रेतपिशाचब्रह्मराक्षसापस्मारभवभीतिभ्योऽभिरक्षणाद्रक्षेति	बृ. जा. १।६
भूतभर्तृ च तज्ज्ञेयं	भ.गी.१३।१७
भूतभावन भूतेश	भ.गी.१०।१५
भूतभावोद्भवकरः	भ. गी. ८।३
भूतभृन्न च भूतस्थः	भ. गी. ९।५
भूतश्राद्धे पृथिव्यादिपञ्चमहाभूतानि चक्षुरादिकरणानि चतुर्विधभूतग्रामान्	ना.प. ४।३९
भूतसत्त्वतुरीयभागेन ज्ञानेन्द्रियमसृजत्	पैङ्गलो. २।४
भूतसम्मोहने काले भिन्ने तमसि वैखरे । अन्तः पश्यन्ति सत्त्वस्था निर्गुणं गुणगह्वरे	मंत्रिको. २
भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि । अभूतस्यापरे धीरा विवदन्तः परस्परम्	अ. शां. ३
भूतस्यात्मभूतस्य त्वमात्माऽसि	कौ. त. १।६
भूतं न जायते किञ्चिदभूतं नैव जायते	अ. शां. ४
भूतं भवद्भविष्यदिति सर्वमोङ्कार एव	नृ. पू. ४।२
भूतं भविष्यत्प्रभवः क्रियाश्च कालः क्रमस्त्वं परमाक्षरं च	एका. उ. ६
भूतं भव्यं भविष्यच्च सर्वं चिन्मात्रमेव हि	ते.बिं. २।२८
(अथ) भूतं भव्यं भविष्यदिति कालवत्येषा	मैत्रा. ६।५
भूतं भव्यं भविष्यदिति सर्वमोङ्कार एव [गणेशो. १।१+	गमो.ता.२।१
भूतं भव्यं भविष्यच्च त्रिकालोदितमव्ययम् । तदप्योङ्कारमेवायं विद्धि मोक्षप्रदायकम्	ना. प. ८।६
भूतं भव्यं यच्च वेदा वदन्ति	श्वेताश्व. ४।९
भूतादिर्महति विलीयते	सुबालो. २।२
भूतादिं भित्त्वा महान्तं भिनत्ति	सुबा.११।२
भूतादेराकाशं (जायते)	सुबालो. १।१
भूतानामन्त एव च	भ.गी.१०।२०
भूतानामस्मि चेतना	भ.गी.१०।२२
भूतानामीश्वरोऽपि सन्	भ. गी. ४।६
भूतानां त्रयमप्येतत्सर्वोपरमबाधकम् । तत्सुषुप्तं हि यत्स्वप्नं मायामात्रं प्रकीर्तितम्	ना.प. ८।१८
भूतानि गुणा अनुयाजाः , जिह्वेडा	प्रा. हो.४।३
भूतानि तत्त्वसंज्ञानि कूटस्थोऽक्षरसंज्ञितः	ना.उ.ता.३।६
भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद [बृ. उ. २।४।६+	४।५।७
भूतानि पञ्च तन्मात्राणि	महो. १।२
भूतानि यान्ति भूतेज्याः	भ.गी. ९।२५
भूतानीति च तद्विदः	वैतथ्य. २०
भूताय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति	बृह. ६।३।२

भूतावासमिमं (शरीरं) त्यजेत्	ना.प. ३।४८
भूतिर्भूतिमतां सुकृतं कृताय स्वाहा	पारमा. ३।६
भूतेन पञ्चमः प्रोक्तः षष्ठः षोडशतः स्वरात्	सूर्यता.२।३
भूतेन्द्रियार्थानतिक्रम्य ततः प्रव्रज्याख्यं धृतिदण्डं धनुर्गृहीत्वाऽनभिमानमयेन चैवेषुणा तं...निहत्याद्यम्	मैत्रा. ६।२८
भूतेभिर्देवेभिरभिष्टुतोऽहमेव	भस्मजा.२।५
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति	केनो. २।५
भूतेष्वहमवस्थितः	वासुदे. ९
भूत्यै न प्रमदितव्यम्	तैत्ति.१।११।१
भूत्वा तत्र गतप्राणः शनैरथ समुत्सृजेत्	क्षुरिको. ५
भूत्वा पुनः सौम्यवपुर्महात्मा	भ.गी.११।५०
भूत्वा भूत्वा प्रलीयते	भ.गी.८।१९
भूत्वा भूत्वा स्थिरं योगी	योगो. २३
भूत्वा यास्यसि लाघवम्	भ.गी. २।३५
भूदेवी ससागराम्भस्सप्तद्वीपा वसुन्धरा भूरादिचतुर्दशवनानामाधाराधेया प्रणवात्मिका भवति	सीतो.१०
भूः प्रपद्येऽमुनाऽमुनाऽमुना	छां.३।१५।३
भूभारमखिलं निचखान	सङ्कर्षणो. २
भूमा त्वेव विजिज्ञासितव्यः	छां.७।२३।१
भूमानन्दस्वरूपोऽस्मि	ते.बिं. ३।१३
भूमानंप्रकृतिध्यात्वाकृतकृत्योऽमृतोभवेत्	सौ. ल. १५
भूमानं भगवो विजिज्ञासे	छां.७।२३।१
भूमात्रयस्पिण्डं निहितं यथाऽचिरेणैति भूमित्वम्...प्रणश्यति चित्तं तथा	मैत्रा. ६।२७
भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न उच्यते	अक्ष्युप. ३९
भूमिकात्रितयाभ्यासात् (सत्त्वापत्तिज्ञानभूः)	महो. ५।३०
भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते । समं सर्वत्र पश्यन्ति चतुर्थी भूमिकां गताः	अक्ष्युप. २२
भूमिकापञ्चकाभ्यासाच्चित्ते(ऽर्थे-)तु विरतेर्वशात् । सत्त्वात्मनिस्थितेशुद्धे सत्त्वापत्तिरुदाहृता [महो.५।३०+	वराहो. ४।६

भूमिकापञ्चमाभ्यासात्स्वात्मारामतया भृशम् । पदार्थभावना नाम षष्ठी भवति भूमिका	वराहो.४।८,९
भूमिकासप्तकं चैतद्धीमतामेव गोचरम्	महो. ५।३९
भूमित्रयेषु विहरन्मुमुक्षुर्भवति	वराहो. ४।१
भूमिप्राऽस्य कीर्तिर्भवति	३ऐत.२।५।३
(ॐ) भूमिरन्तरिक्षं द्यौरित्यष्टाक्षराणि [बृ.उ. ५।१४।१+	गायत्र्यु.१
भूमिरापोऽनलो वायुराकाशश्चेतिपञ्चकः	१यो.त. ८३
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च [ते.बिं. ९।७६+	भ.गी. ७।४
भूमिरापस्तथा तेजो वायुर्व्योम च चन्द्रमाः । सूर्यः पुमांस्तथा चेति मूर्तयश्चाष्ट कीर्तिताः	ना.पू.ता.१।२
भूमिर्धेनुर्धरणी लोकधारिणी [महाना.४।५+सुदर्श. ३+	यज्ञोप. ३
भूमिर्माता दितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त एनः	सहवै. १०
[अथर्व. ६।१२०।२+	तै.आ.२।६।२
भूमिशायी ब्रह्मचारी निष्कामो गुरुभक्तिमान् (राममंत्रं जपेत्)	रामर. ४।२
भूमिषट्कचिराभ्यासाद्भेदस्यानुपलंभनात् । यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः	महो. ५।३४
भूमिं जले जलं वह्नौ वह्निं वायौ वायुमाकाशे चाकाशमहङ्कारे चाहङ्कारं महति महदव्यक्तेऽव्यक्तं पुरुषे क्रमेण विलीयते	पैङ्गलो. ३।३
भूमिः शय्याऽस्ति विस्तीर्णा यतयः केन दुःखिताः	१सं.सो.२।९९
भूमेर्वितन्वन प्रतरन्प्रकामः पोपूयमानः पञ्चभिः स्वगुणैः प्रसन्नैः सर्वाणि मां धारयिष्यसि स्वाहा	पारमा. २।५
भूमैव सुखं भूमात्वेव विजिज्ञासितव्यः	छां. ७।२३।१
भूमौ तिष्ठति भूमिस्तं न वेद स ह्यात्मा	गोपालो. १।९
भूमौ दर्भासने रम्ये..कृत्वामनोमयीं..	अ.ना.१८–२१
भूमौ वा पतित व्योम व्योमपुष्पं सुगन्धकम्	ते.बिं. ६।५७

भूम्यादित्यान्तरे यस्तु छादयेच्चतुरङ्गुलम्। तां तु सन्ध्यां परां विद्याच्छायासम्भेदने परे	सन्ध्यो. ११
भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छथ	प्रश्नो. १।२
भूय एव नो भगवन्विज्ञापयत्विति	नृसिंहो. ७।१
भूय एव महाबाहो	भ.गी. १०।१
भूय एव मा भगवान् विज्ञापयतु	+१०।३+
[छांदो. ६।८।७+९।४+१०।३+	११।३+१२।३
भूयश्च सृष्ट्वा त्रिदशानथेशीसर्वाधिपत्यं कुरुते भवानी	गुह्यका. ६४
भूयश्चान्ते विश्वमायानिवृत्तिः [श्वेता. १।१०+	ना. प. ९।९
भूयस्तेनैव मार्गेण जाग्राय धावति सम्राट्	सुबालो. ४।४
भूयस्तेनैव मार्गेण स्वप्रस्थानं नियच्छति	परब्र. २
भूयस्तेनैव स्वप्नाय गच्छति जलौकावत्	ब्रह्मो. १
भूयः कथय तृप्तिर्हि	भ.गी.१०।१८
भूयः सृष्ट्वा यतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा	श्वेता. ५।३
भूयाद्भूयो द्विपद्माभयवरदकरातप्तकार्तस्वराशुभ्राभ्राभेभयुग्मद्वयकरधृतकुम्भाद्भिरासिच्यमाना	सौभाग्य. ३
भूयासमिति यो द्रष्टा सोऽहं विष्णुर्मुनीश्वर	वराहो. २।८
भूयासं चाक्षयं चापुनर्मृत्युं जयति, ब्रह्मणः सायुज्यं गच्छति	सहवै. १८
भूयोजन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः। सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते	मुक्ति. २।३४
भूयो येन (जीवितेन) न शोच्यते	महो. ३।१२
भूरग्नये च पृथिव्यै च महते च स्वाहा	महाना. ७।३
भूरग्नये पृथिव्यै स्वाहा	महाना.७।२५
भूरजोऽब्धौ समुत्पन्नं जगद्भवतु सर्वदा	ते.त्रि. ६।८१
भूरन्नमग्नये पृथिव्यै स्वाहा, भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा	महाना. ७।१
भूरसि भुवोऽसि सुवरसि भूर्भूतयेस्वाहा	पारमा. ५।६
भूरिति भुवो लोकः। भुव इत्यन्तरिक्षलोकः। स्वरिति स्वर्गलोकः। महरिति महर्लोकः। जन इति जनो लोकः। तप इति तपोलोकः। सत्यमिति सत्यलोकः	गायत्रीर. २
भूरिति वा अग्निः	तैत्ति.१।५।२
भूरिति वा अयं लोकः	तैत्ति.१।५।१
भूरिति वा ऋचः	तैत्ति. १।५।२
भूरिति वै प्राणः	तैत्ति. १।५।३
भूरितिव्याहृतिर्गायत्रं छन्दस्त्रिवृतं स्तोमं प्राचीं दिशं वसन्तमृतुं वाचमध्यात्मं जिह्वां रसमितीन्द्रियाण्यन्वभवन्	२प्रणवो. ३
भूरित्यग्नौ प्रतितिष्ठति	तैत्ति. १।६।१
भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः	छां. ४।१७।३
भूर्भुवं वा भुवो वा सुवो वा किञ्चित्स्वनन्तं सुषुवे सर्वस्य दातारमजरं जरित्रे स्वाहा	पारमा. ८।६
(अथ) भूर्भुवः स्वरिति लोकवत्येषा	मैत्रा. ६।५
भूर्भुवः स्वरित्येषैवास्य प्रजापतेः स्थविष्ठा तनूर्या लोकवतीति। स्वरित्यस्याः शिरो नाभिर्भुवो भूः पादा आदित्यश्चक्षुः	मैत्रा. ६।६
भूर्भुवः स्वस्त्रीणि स्वर्गभूपातालानि त्रिपुराणि	त्रि.ता. १।१
भूर्भुवः सुवरग्न ओम्	महाना. ७।२
भूर्भुवः सुवरन्नमोम्	महाना. ७।१
भूर्भुवः सुवरन्नं चन्द्रमसे दिग्भ्यः स्वाहा	महाना. ७।१
भूर्भुवः सुवः ब्रह्म स्वयम्भु	चित्त्यु. ६।१
भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः	तैत्ति. १।५।१
भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः	म. ना. ७।८
भूर्भुवः सुवर्महरोम्	महाना. ७।३
भूर्भुवः सुवश्चन्द्रमसे दिग्भ्यः स्वाहा	महाना. ७।२
भूर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा	महाना. ७।३
भूर्भुवः सुवश्छन्द ओम्	महाना. ७।६
(ॐ) भूर्भुवः सुवरिति व्याहृतयः	२प्रणवो. १८

भूर्भुवः स्वरिमे लोकाश्चन्द्रसूर्याग्निदेवताः । यासुमात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति	यो.शि.६।५६
भूर्भुवः स्वरिमे लोकाः सोमसूर्याग्निदेवताः । यस्य मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति	यो. चू. ८५
भूर्भुवः स्वर्महर्जनस्तपः सत्यं तलं वितलं सुतलं रसातलं तलातलं महातलं पातालं..एवं..ब्रह्मांडं..	राधोप. १।२
भूर्भुवः स्वः, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि [प्रवर्ग्या. ३+	वा.सं. ३६।३
भूर्भुवः स्वःपते रायस्पते वाजिपते गोपते ऋग्यजुस्सामाथर्वाङ्गिरःपते नमो ब्रह्मपुत्राय	ग. पू. १।९
भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति	बृह. ६।३।३
भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनि । सुवर्लोकः कटीदेशे नाभिदेशे महर्जगत्	ना. बिं. ३
भूश्च नारायणः, भुवश्च नारायणः	ना.उ.ता.१।५
भूषणं नक्षत्राणि	सन्ध्यो. २३
भूस्ते आदिर्मध्यं भुवः स्वस्ते शीर्ष [अ. शिरः. ३।१+	बटुको. १७
भूस्ते दधामि, भुवस्ते दधामि, स्वस्ते दधामि सर्वं त्वयि दधामीति	बृह. ६।४।२५
भूस्त्वादिर्मध्यं भुवस्ते स्वस्ते शीर्षं विश्वरूपोऽसि	चतुर्वे. ८
भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवः स्वः प्रपद्ये	सहवै. २२
भूः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति	बृह. ६।३।३
भृगुपुत्रः प्रकृतिपुरुषमयो हि स धनद इति प्रकृतिर्माया पुरुषः शिव इति	ग. पू. २।८
भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवन्ब्रह्मेति	तैत्ति. ३।१
भृगुस्तस्मै यतो विशन्ति तद्विजिज्ञासस्व	तैत्ति. ३।११
भृत्योऽभिमतकर्तृत्वान्मन्त्री सर्वार्थकारणात् । सामन्तश्चेंद्रियाक्रान्तेर्मनो मन्ये विवेकिनः	महो. ५।७९
भृष्टबीजसमुत्पन्नवृद्धिश्चेज्जगदस्तु सत्	ते. बिं. ६।९४
भेददृष्टिरविद्येयं सर्वथा तां विसर्जयेत्	महो. ५।११३
भेदनिम्नाः (भिन्नाः) पृथग्वादास्तस्मात्ते कृपणाः स्मृताः	अ.शां. ९४
भेदस्तयोर्विकारः स्यात्सर्गे न ब्रह्मणि क्वचित् (विभाति ब्रह्मसर्गयोः)	सरस्व. ४७
भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात् । अतश्च कारणं नित्यमेकमेवाद्वयं खलु	पञ्चब्र. ३२
(ततः) भेदाभावात् कदाचिद्बहिर्गतेऽपि मिथ्यात्वभानात्	मं.ब्रा. २।६
भेदाभेदस्तथा भेदाभेदः साक्षात्परात्मनः। नास्ति स्वात्मातिरेकेण स्वयमेवास्ति सर्वदा	पा. ब्र. ३१
भेषजकृतो ह वा एष यज्ञो यत्रैवंविद्ब्रह्मा भवति	छांदो.४।१७।८
भैक्षाशनं च मौनित्वं तपो ध्यानं विशेषतः । सम्यग्ज्ञानं च वैराग्यं धर्मोऽयं भिक्षुके मतः	ना. प.५।४४
भैक्षेण वर्तयेन्नित्यं नैकान्नाशी भवेत् क्वचित् । निरीक्षन्ते त्वनुद्विग्नास्तद्गृहं यत्नतो व्रजेत्	१सं.सो.२।६०
भैक्षेण वर्तयेन्नित्यं नैकान्नाशी भवेत् क्वचित् । चित्तशुद्धिर्भवेद्यावत्तावन्नित्यं चरेत्सुधीः	ना.प.५।४६
भैषज्याहारपात्राणि वस्त्रशय्यासनं गुरोः । आनयेत्सर्वयत्नेन प्रार्थयित्वा धनेश्वरान्	शिवो. ७।२७
भो किमादौ किं जातमिति सद्योजातं	पं. ब्र. १
भोक्ता च प्रभुरेव च	भ.गी.९।२४
भोक्ता भोग्यश्च यद्भवेत्	कैव. १८
भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्	श्वेताश्व.१।१२
भोक्तारं यज्ञतपसां	भ.गी. ५।२९
भोक्तृत्वे हेतुरुच्यते	भ.गी.१३।२१
भोक्तेति वै (च) भोक्तृविदो भोज्यमिति च तद्विदः	वैतथ्य. २२
भोगशक्तिर्भोगरूपा... सर्वं क्रियते	सीतो. २७
भोगान्ददाति विपुलान् लिङ्गे सम्पूजितः शिवः	शिवो. ७।७३

भोगान्भुक्त्वा च मुच्यन्ते प्रलये कर्मयोगिनः	शिवो. १।३१
भोगाभोगा महारोगाः सम्पदः परमापदः । वियोगायैव संयोगा आधयो व्याधयोऽधियाम्	अक्ष्युप. २६
भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यते	महो. ५।९७
भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाचर	अ. पू. ४।८२
भोगेभ्यो ह्यरतिर्जाता दृश्याद्वा सकलादिह	महो. २।७१
भोगैकवासनां त्यक्त्वा त्यज त्वं भेदवासनाम्	महो. ४।१०९
भोगैश्वर्यगतिं प्रति	भ.गी. २।४३
भोगैश्वर्यप्रसक्तानां	भ.गी. २।४४
भोग्यमजीजनत्	बह्वृचो. १
भोजनं तामसप्रियम्	भ.गी.१७।१०
भोजयेत्तद्दशांशतः	रामर. ४।८
भोजयेद्व्रतिनश्चात्र स्वगुरुं च विशेषतः	शिवो.७।७७
भोज्यमिति च तद्विदः	वैतथ्य. २२
भो पवित्रं सुलभं सुकरम्	कात्याय.१
भो प्रजापते त्वमव्यक्तादुत्पन्नोऽसि व्यक्तं ते कृत्यमिति	अव्यक्तो. २
भो भगवन् ब्रह्मपुत्र कथं मुक्त्युपायोऽ..	ना.प. १।१
भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वाऽधिकतरो ध्येयः...	शरभो. १
भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति	देव्यु. २६
भ्रमतीव च मे मनः	भ.गी. १।३०
भ्रमदसि...प्रस्तब्धमस्येकशफमसि(मा.पा.)	बृ.उ.६।३।४
भ्रमरकीटकार्येण दीक्षिताः शिवयोगिनः शिवपूजापथे गुरुपूजाविधौ च महेश्वरपूजनान्मुक्ताः	रुद्रोप. ३
भ्रमरकीटन्यायेन शरीरत्रयमुत्सृज्य सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति	ना.प. ३।८७
भ्रमविश्रान्तशकुनिः पक्षौ संहृत्य तथा जीवोऽपि जाग्रत्स्वप्नप्रपञ्चे व्यवहृत्य श्रान्तोऽज्ञानं प्रविश्य स्वानन्दं भुङ्क्ते	पैङ्गलो. २।८
भ्रमः पञ्चविधो भाति तदेवेह समुच्यते । जीवेश्वरौ भिन्नरूपाविति प्राथमिको भ्रमः । आत्मनिष्ठं कर्तृगुणं वास्तवं वा द्वितीयकः । शरीरत्रयसंयुक्तजीवः सङ्गी तृतीयकः । जगत्कारणरूपस्य विकारित्वं चतुर्थकः । कारणाद्भिन्नजगतः सत्यत्वं पञ्चमो भ्रमः	अ. पू.१।१३
भ्रष्टबीजोपमा येषां पुनर्जननवर्जिता । वासनारसनाहीना जीवन्मुक्ताहिते..	प्रा. वा. 5-91-46 अ.पू.४।५२
भ्रष्टबीजोपमा भूयो जन्माङ्कुरविवर्जिता । हृदि जीवद्विमुक्तानां शुद्धा भवति वासना	१सं.सो.२।४३
भ्राजिष्णवे विश्वहेतवे नमः	सूर्यो. ६
भ्रातरं वा स्वसारं वा	छां. ७।१५।२
भ्राताऽन्तरिक्षमभिशस्त एनः	सहवै. १०
भ्रातृहा त्वमसि	छां. ७।१५।२
भ्रातॄन्वा भोजयेच्छ्राद्धे पुत्रं वापि गुणान्वितम् । आत्माच वापि भुञ्जीत न विप्रं वेदवर्जितम्	इतिहा. ७७
भ्रान्तं पश्यति दुर्दृष्टिः सर्वं मदवशादिव	मुक्ति. २।६०
भ्रान्ता एवाखिलास्तेषां क मुक्तिः केह वा सुखम्	वराहो.२।५५
भ्रान्तिहरणम्	निर्वाणो. ७
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ! न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा	ध्या.बि. ८०
भ्रामयन् सर्वभूतानि	भ.गी.१८।६१
भ्रुवोर्घ्राणस्य च यः सन्धिः स एव द्यौर्लोकस्य परस्य च सन्धिर्भवति [जाबा. ३।४	+रामो. ३।४
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्	भ.गी.१८।१०
भ्रुवोर्मध्ये ललाटस्थं तज्ज्ञेयं च निरञ्जनम्	२योगत.१४
भ्रुवोर्मध्ये ललाटे तु नासिकायास्तु मूलतः । जानीयादमृतं स्थानं तद्ब्रह्मायतनं महत्	ध्या.बि. ४०

भ्रूचक्रं सप्तमं विद्याद्बिन्दुस्थानं च तद्विदुः । भ्रुवोर्मध्ये वर्तुलं च ध्यात्वा ज्योतिः प्रमुच्यते	योगरा. १५
भ्रूणहत्यां वा एते घ्नन्ति [त्रिसुप.२+	महाना.१२।२
भ्रूणहाऽभ्रूणहा (भवति)	बृह.४।३।२२
भ्रूदहरादुपरि सच्चिदानन्दतेजःकूटरूपं परं ब्रह्मावलोकयंस्तद्रूपो भवति	अद्वयता. १
भ्रूमध्यदृष्टिरप्येषा मुद्रा भवति खेचरी	१यो.त.११८
भ्रूमध्यनिलयो बिन्दुः शुद्धस्फटिकसन्निभः । महाविष्णोश्च देवस्य तत्सूक्ष्मं रूपमुच्यते	यो.शि.५।३४
(तत्र) भ्रूमध्यं गतो जीव आपादमस्तकं व्याप्य कृषिश्रवणाद्यखिलक्रियाकर्ता भवति	पैङ्गलो. २।७
भ्रूमध्ये चित्तसंयमात्तपोलोकज्ञानं	शांडि.१।७।५२
भ्रूमध्ये तारकालोकशान्तावंतमुपागते । चेतनैकतने बद्धे प्राणस्पंदो निरुद्धयते	शांडि.१।७।३३
भ्रूमध्ये सच्चिदानन्दतेजःकूटरूपं तारकं ब्रह्म	मं.ब्रा. १।२
भ्रूयुगमध्यबिले दृष्टिं तद्द्वारोर्ध्वस्थिततेज आविर्भूतं तारकयोगो भवति	अद्वयता. ६
भ्रूयुगमध्यबिले तेजस आविर्भावः	मं.ब्रा. १।४

म

मकरन्दं पिबन्भृङ्गो गन्धान्नापेक्षते यथा । नादासक्तं सदा चित्तं विषयं न हि काङ्क्षति	ना. बिं. ४२
मकारतुरीयांशा पञ्चमी	वराहो. ४।१
मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् । मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च	आगम. २१
मकारमूर्तिः कृष्णाङ्गी वृषवाहिनी वृद्धा त्रिशूलधारिणी सरस्वती भवति	शांडि. १।६।१
मकारवाच्यः शिवस्वरूपो हनुमान्	तारसा. ३।८
मकारश्चतुर्थी किंस्थानमित्युभावोष्ठौ स्थानम्..	२ प्रणवो. १६
मकारश्च पुनः प्राज्ञं	आगम. २३
मकारश्चाग्नि-(स्त्वग्नि-)सङ्काशो विधूमो विद्युतोपमः [ब्र.वि.८+	१ प्रणवो. ८
मकारश्चाप्यकारश्च ह्युकारश्चेति कीलकम्	गुह्यका. ८२
मकारस्तामसः कृष्णो रुद्रश्चेति तथोच्यते	यो. चू. ७६
मकारस्तृतीयकूटाक्षरो भवति	श्रीवि. ता. १।२
मकारस्तृतीयाक्षरो भवति	रामो. १।२
मकारस्त्वम्पदार्थवान्	रामर. ५।१३
मकारस्थूलांशे सुषुप्तविश्वः	वराहो. ४।१
मकारं तु स्मरन् पश्चाद्रेचयेदिडयाऽनिलम्	जा. द. ६।९
मकारः शतावयवोपेतः	ना. प .८।२
मकारः सहस्रावयवान्वितः	तुरीयो. १
मकाराक्षरसम्भूतः शिवस्तु हनुमान् स्मृतः । बिन्दुरीश्वरसंज्ञस्तु शत्रुघ्नश्चक्रराट् स्वयम्	तारसा. २।२
मकारे च भ्रुवोर्मध्ये प्राणशक्त्या प्रबोधयेत्	ब्र.वि. ७०
मकारे जाग्रत्प्राज्ञः	प. हं. प. १०
मकारेण ब्रह्मणाऽनुसन्दध्यात्	नृसिंहो. ७।४
मकारेण मनआद्यवितारं मनआदिसाक्षिणमन्विच्छेत्	नृसिंहो. ७।५
मकारे तु लयं प्राप्ते तृतीये प्रणवांशके	ध्या. बिं. १२
मकारे लभते नादमर्धमात्रा तु निश्चला	१ यो. त. १३९
मकारे लीयते रुद्रः प्रणवो हि प्रकाशते	यो. चू. ७८
मकारे व्यञ्जनमित्याहुः	२ प्रणवो. १२
मकारोऽभ्युदयार्थत्वात् स मायेति च कीर्त्यते...	रामर. ९।७
मकारो रुद्रो भवति	तारसा. १।४
मकारोऽस्मि सनातनः	मैत्रे. ३।११
मकारो हृदि सुस्थितः	यो. चू. ७४
मघवन्यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन्पुनरागमः [छान्दो. ८।९।२+१०।३+	+११।२
मघवन्नेतद्विजानीहि किमेतद्यक्षमिति	केनो. ३।११

मघवन्मर्त्यं वा इदꣳ शरीरमात्तं मृत्युना	छांदो. ८।१२।१
मघाद्यं श्रविष्ठार्धमाग्नेयं क्रमेणोत्क्रमेणसार्पाद्यं श्रविष्ठार्धान्तं सौम्यम्	मैत्रा. ६।१४
मच्चित्तः सततं भव	भ. गी. १८।५७
मच्चित्तः सर्वदुर्गाणि	भ. गी. १८।५८
मच्चित्ता मद्गतप्राणाः	भ. गी. १०।९
मच्चिन्तनं मत्कथनमन्योन्यं मत्प्रभाषणम् । मदेकपरमो भूत्वा कालं नय महामते	वराहो. २। ४६
मज्जातः शुक्रं, शुक्रशोणितसंयोगादावर्तते गर्भः	गर्भो. २
मज्जा निधनम्	छांदो. २।१९।१
मज्जामेदोभ्यां सम्पूर्णे शिराजालसमावृते । नवद्वारे पुरे देहे ममत्वं च शरीरके	दुर्वासो. २।७
मञ्चकं शुक्लवस्त्रं च स्त्रीकथालौल्यमेव च । दिवा स्वापं च यानं च यतीनां पतनानि षट्	ना. प. ३।७१
मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास	छांदो. १।१०।१
मटचीहतेषु कुरुष्वाढिक्यासह[मा.पा.]	छां. १।१०।१
मणिकर्ण्यां मम क्षेत्रे गङ्गायांवातटे पुनः । म्रियेत देही तज्जन्तोर्मुक्तिर्नातो वरान्तरम्	रामो. ता. ३।३
मणिपूरकचक्रं हृदयचक्रं, अष्टदलमधोमुखम् । तन्मध्ये ज्योतिर्मयलिङ्गाकारं ध्यायेत्	सौभाग्य. २७
मणिपूरं नाभिदेशं हृदयस्थमनाहतम् । विशुद्धिः कण्ठमूले च आज्ञाचक्रं च मस्तकम्	योगकुं. ३।११
मणिबन्धे तथा गुल्फे स्फुरणं यस्य नश्यति । षण्मासावधिरेतस्य जीवितस्य स्थितिर्भवेत्	त्रि. ब्रा. १२३
मणिबन्धे द्वादशैव स्कन्धे पञ्चशतं वहेत् । अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत्	रु. जा. १६
(यद्वा) मण्डलाद्वा स्तनबिम्बमेकं मुखं चाधस्त्रीणि गुहासदनानि	त्रिपुरो. ११
मत एव केषाञ्चित्कैश्चिद्भेदः	स्वसंवे. ३
मत एव तन्निष्ठाः मत एव न निर्वाणं नो निरय इति	स्वसंवे. २
मत एव न श्वानगर्दभौ	स्वसंवे.३
मत एव यत्र विरिञ्चिविष्णुरुद्रा ईश्वरश्च गच्छन्ति	स्वसंवे. ३
मतङ्ग भगवन्गुरो राजश्यामलारहस्योपनिषदं मेऽनुब्रूहि	राजश्या. १
मतं यस्य न वेद सः	केनो. २।३
मतश्च मन्तयितव्यं च नारायणः	सुबालो. १
मता बुद्धिर्जनार्दन	भ. गी. ३।१
मतिर्नाम वेदविहितकर्ममार्गेषुश्रद्धा	शांडि. १।२१
मतिविज्ञानसम्पत्तिशुद्धये (रुद्राक्षं) धारयेत्सुधीः	रु. जा. ३०
मतिस्त्वेव विजिज्ञासितव्या	छांदो. ७।१८।१
मत्कर्मकृन्मत्परमः	भ. गी. ११।५५.
मत्कर्मपरमो भव	भ. गी. १२।१०
मत्त एव पृथग्विधाः	भ. गी. १०।५
मत्त एवेति तान् विद्धि	भ. गी. ७।१२
मत्तऐरावतोबद्धःसर्षपीकोणकोटरे	महो. ४।६४
मत्तः कश्चिन्नान्यो व्यतिरिक्त इति फलपत्रोदकाहारः पर्वतवनदेवतालयेषु सञ्चरेत्	ना. प. ४।४८
मत्तः परतरं नान्यत्	भ. गी. ७।७
मत्तः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च अहमानन्दानानन्दाः विज्ञानाविज्ञाने अहम्	देव्यु. १
मत्तः सर्वं प्रवर्तते	भ. गी. १०।८
मत्तः सर्वाणि भूतानि मत्तः सर्वं चराचरम् , भवन्तो वै न मद्भिन्नाः	गणेशो. ४।९
मत्तः स्मृतिर्ज्ञानमपोहनं च	भ. गी. १५।१५
मत्तो न कश्चिन्नान्यो व्यतिरिक्त इत्यात्मन्यालोच्य...देहपतनपर्यन्तं स्वरूपानुसन्धानेन वसेत्	ना. प. ७।३
मत्तोऽन्यदस्ति चेन्मिथ्या यथा मरुमरीचिका	ते. बिं. ६।७३
मत्तो व्यतिरिक्तः कश्चिन्नास्तीति	तुरीयाती. २

मत्पादाकृतयश्चऊर्ध्वपुण्ड्रानासादयः स्मृताः रेखा द्वादशकस्थाने	ऊर्ध्वपुं. ६
मत्प्रसादात्तरिष्यसि	भ. गी. १८।६८
मत्प्रसादादवाप्नोति	भ. गी. १८।५६
मत्वा धीरो न शोचति	कठो. ६।६
मत्सरो मुष्टिकोऽजयः	कृष्णो. १४
मत्संस्थामधिगच्छति	भ. गी. ६।१५
मत्सान्निध्यात्प्रवर्तन्ते देहाद्या अजडा इव	सर्वसारो. ९
मत्सारभूतं यद्यत्स्यान्मथुरा सा निगद्यते	गोपालो. २।२५
मत्स्थानि सर्वभूतानि	भ. गी. ९।४
मत्स्थानीत्युपधारय	भ. गी. ९।६
मत्स्यकूर्मवराहनारसिंहवामनरामरामकृष्णबुद्धकल्किसद्योजातवामदेवा अघोरतत्पुरुषेशानपरमेश्वराः षोडशदलाः	ना. पू. ता. ६।१
मत्स्वरूपपरिज्ञानात्कर्मभिर्नसबध्यते	वराहो. २।२८
मत्स्वरूपमेव, सर्वं मद्व्यतिरिक्तमणुमात्रं न विद्यते	त्रि. म. ना. ८।१
मत्स्वरूपस्त्वयं ज्ञेयो बिल्ववृक्षो विधानतः	१ बिल्वो. २
मथुरावन-मधुवनमहावन-खादिरवन-भांडीरवननंदीश्वरवननंदवनानंदवनखांडववनपलाशवनाशोकवन केतकवन-द्रुमवन-गन्धमादनवन-शेषशायिवन-श्यामायुवन-भुज्युवन-दधिवन-वृषभानुवनसङ्केतवनदीपवन-रासवन-क्रीडावनोत्सुकवनान्येतानि चतुर्विंशतिवनानि	राधोप. ३।१
मथुरायां विशेषेण मां ध्यायन्मोक्षमश्नुते	गोपालो. २।२०
मथुरायां स्थितिर्ब्रह्मन्सर्वदा मे भविष्यति	गोपालो. २।४
मदङ्गलेपनं पुण्यं चक्रतीर्थान्तःस्थितं चक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति	गोपीचं. १

मदनाधः शिवं वाग्भवम्, तदूर्ध्वं कामकलामयं	त्रि. ता. १।१६
मदनुग्रहाय परमं	भ. गी. ११।१
मदन्तिका मानिनी मङ्गला च सुभा(भ)गा च सा [त्रि.म.६+	त्रिपुरो. ६
मदमोहेन यः शूद्र्यां पुत्रमुत्पादयेद्विजः । यावत्तिष्ठत्स वै भूमौ तावत्तिष्ठेत् सुदारुणे	इतिहा. ७९
मदर्थमपि कर्माणि	भ. गी. १२।१०
मदर्थे त्यक्तजीविताः	भ. गी. १।९
मदाभिमानमात्सर्यलोभमोहातिशायिताम् । बहिरप्यास्थितामीषत्यजत्यहिरिव त्वचम्	अक्ष्युप. १६
मदीयं च त्वदीयं च ममेति च तवेति च । मह्यं तुभ्यं मयेत्यादि तत्सर्वं वितथं भवेत्	ते. बिं. ५।५०
मदीयोपासकस्यासाध्यंनकिञ्चिदस्ति	त्रि. म. ना. ८।७
मदीयोपासनां कुरु, मामेव प्राप्स्यसि	त्रि. म. ना. ८।६
मदुपासकस्तस्मान्निरतिशयाद्वैतपरमानन्दलक्षणं परब्रह्म भवति	त्रि. म. ना. ८।७
मदुपासकः सर्वोत्कृष्टः स भवति	त्रि. म. ना. ८।७
मदुपासनकः सर्ववन्द्यो भवति	त्रि. म. ना. ८।७
मदुपासनया सर्वमङ्गलानि भवन्ति	त्रि. म. ना. ८।७
मदुपासनया सर्वं जयति	त्रि. म. ना. ८।७
मदेकपूजानिरतः सम्पूजयेत्, तदहमश्नामि	भस्मजा. २।१०
मद्गतेनान्तरात्मना	भ. गी. ६।४७
मद्गुष्टे पादं वक्ता	छांदो. ४।८।१
मद्भक्त एतद्विज्ञाय	भ. गी. १३।१९
मद्भक्तः सङ्गवर्जितः	भ. गी. ११।५५
मद्भक्ता यान्ति मामपि	भ. गी. ७।२३
मद्भक्तिनिष्ठो भव	त्रि. म. ना. ८।६
मद्भक्तिं लभते पराम्	भ. गी. १८।५४
मद्भक्तेष्वभिधास्यति	भ. गी. १८।६८
मद्भावं सोऽधिगच्छति	भ. गी. १४।१९
मद्भावा मानसा जाताः	भ. गी. १०।६
मद्भावायोपपद्यते	भ. गी. १३।१९
मद्यं मांसंच लशुनंपलाण्डुं शिग्रुमेव च । श्लेष्मातकं विड्वराहमभक्ष्यं वर्जयेन्नरः	रु. जा. ४०

मद्याजी मां नमस्कुरु [भ.गी.९।३४+ १८।६५

मद्रूपमव्ययं ब्रह्म आदिमध्यान्तवर्जितम् । स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् वासुदे. ८

मद्रेषु चरकाः पर्यव्रजाम बृह. ३।३।१

मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानाः बृह. ३।७।१

मद्व्यतिरिक्तमणुमात्रं न विद्यते त्रि. म. ना. ८।६

मद्व्यतिरिक्तमबाधितं न किञ्चिदस्ति त्रि. म. ना. ८।६

मद्व्यतिरिक्तं सर्वं बाधितम् त्रि. म. ना. ८।६

मधुकरराजानं माक्षिकवत् प्रश्नो. १

मधुकरवृत्त्याऽऽहारमाहरन् कृशो भूत्वा... कारागृहविनिर्मुक्तचोरवत् पुत्राप्तबन्धुभवस्थलं विहाय दूरतो वसेत् ना. प. ७।१

मधु क्षरंति तद्रसम् महाना. ११।१०

मधुनक्तमुतोषसि मधुमत् पार्थिवꣳ रजः बृह. ६।३।६
[महाना.१२।२+ऋ.मं.१।९०।७ +त्रिष्टुप. ३+
[वा. सं. १३।२८+ तै. सं. ४।२।९।३

मधुनाऽभिषिच्य गुरुदारगमनात् पूतो भवति भस्मजा. २।११

मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः [त्रिष्टुप.३ महाना. १२।२

मधुमेतु माम् । ब्रह्ममेव मधुमेतुमाम् [त्रिष्टुप. १+ महाना. १२।१

मधुमेधया । ब्रह्ममेव मधुमेधया [त्रिष्टुप. २+ महाना. १२।२

मधुमेधवा । ब्रह्ममेव मधुमेधवा [त्रिष्टुप. ३+ महाना. १२।३

मधुराम्ल-लवण-तिक्त-कटु-कषाय-रसान्विन्दति गर्भो. १

मधुरादिमयो रसः सू. जा. २।४

मधुवाता ऋतायते मधु क्षरंति सिन्धवः [बृ. ६।३।६+महाना. १२।२+ ऋक्सं.
[मं. १।९०।६+वा. .१३.२७
[तै. सं. ४.२।९।३+ त्रिष्टुप. ३

मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैनं विद्वाꣳसमनृतꣳ हिनस्ति बृह. ५।५।१

मध्यतोऽस्मा अन्नꣳ राध्यते तैत्ति. ३।१०।१

मध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात्प्रमुच्यते नारा. ५

मध्यन्दिने प्रबलमधीयीत सहवै. १७

मध्यन्दिने माध्यन्दिनं (कर्म) कृत्वोपस्थानान्तं ध्यायमान आदित्याभिमुखोऽधीयानः सुरापानात्पूतो भवति भस्मजा. १।७

मध्यमश्च द्वाविंशत्कनिष्ठोविंशतिमात्रकः योगो. ६

मध्यमं शास्त्रचिन्तनम् मैत्रे. २।२१

मध्यमा (मात्रा) चतुर्दशी, पश्यन्ती पञ्चदशी परा ना. प. ८।४

मध्यमा तैजसात्मनः गान्धर्वो. १

मध्यमामेवाप्येति यो मध्यमामेवास्तमेति सुबालो. ९।८

मध्यमायां भवतु सावित्री गायत्रीर. ५

मध्यमायां मुकुलिता वैखर्यां विकसीकृता । पूर्वं यथोदिता या वाग्विलोमेनास्तगा भवेत् योगकुं. ३।१९

मध्यमा वृषभवाहिनी माहेश्वरी गायत्रीर. ५

मध्यलक्ष्यं तु प्रायश्चित्तादिवर्णसूर्यचन्द्रवह्निज्वालावलीवत्तद्विहीनान्तरिक्षवत्पश्यति मं. ब्रा. १।२

मध्यस्थकुण्डलिनीमाश्रित्य मुख्या नाड्यश्चतुर्दश भवन्ति शांडि. १।४।५

मध्यं चैवाहमर्जुन भ. गी. १०।३२

मध्यं छन्दसां बृहती १ऐत. ३।५।४

मध्यं ह्येषामङ्गानामात्मा १ऐत. ३।५।४

मध्याद्वाचामेति,कथमिति, लवणमिति छांदो. ६।१३।२

मध्याह्नकालिका सन्ध्या सावित्री युवती..भुवोलोके व्यवस्थिता गायत्रीर. ६

(अथ) मध्याह्ने तीक्ष्णं रुद्रस्तपति सन्ध्यो. २३

मध्याह्ने सूर्याभिमुखः पठेत् सूर्यो. ९

मध्ये कैवल्यात्मा	अद्वैतो. १
मध्ये तिष्ठन्ति राजसाः	भ. गी. १४।१८
मध्ये नाभिर्भवति	नृ. पू. ५।२
मध्ये बिन्दुंत्रिकोणं तदनु ऋतुगणं..	ग. पू. २।१०
मध्ये बीजात्मकं देवं यजेत्	ग. पू. २।१०
मध्ये भास्करं ध्यायेदुपचारान् समर्प्यार्घ्याणि दद्यात्	सूर्यता. ५।१
मध्ये लक्ष्मीनारायणं विक्षेपशक्त्यावरणं	ना. पू.ता. ६।१
मध्ये वामनमासीनं विश्वेदेवा उपासते	कठो. ५।३
मध्वश्नाति, बिसानि भक्षयति (दुःस्वप्ने)	३ ऐत. २।४।७
मनआदिचतुर्दशकरणैः पुष्कलैरादित्याद्यनुगृहीतैः शब्दादीन्विषयान्स्थूलान्यदोपलभते तदात्मनो जागरणम्	सर्वसारो. ३
मनआदिश्च प्राणादिश्चेच्छादिश्च सत्त्वादिश्चपुण्यादिश्चैतेपञ्चवर्गाः	सर्वसारो. ५
मन इति मनोविदो बुद्धिरिति च तद्विदः । चित्तमिति चित्तविदो धर्माधर्मौ च तद्विदः	वैतथ्य. २५
मन उदक्रामन्मीलित इवाश्नन् पिबन्नास्तैव	१ ऐत. १।४।४
(अथ ह) मन उद्गीथमुपासाञ्चक्रिरे तद्धासुराःपाप्मनाविविधुः	छांदो. १।२।६
मन उपवक्ता	चित्यु. १।१
(अथ ह) मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उद्गायत्	बृह. १।३।६
मन एतानि चक्षूंषि यस्माद्व्रतमिदं पाशुपतं यद्भस्मनाऽङ्गानि संस्पृशेत्तस्माद्ब्रह्म तदेतत्पाशुपतं पशुपाशविमोक्षणाय	अ.शिरः. ३।११
मन एतानि चक्षूंषि...तदेतद्बटुकं पशुपाशविमोक्षणाय	बटुको. २४
मन एनं तद्भूत्वाऽवति	बृह. १।५।१९
मन एव जगत्सर्वं मन एव महारिपुः	ते. बिं. ५।९८
मन एव पिता वाङ्माता प्राणः प्रजा	बृह. १।५।७
मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धनं (बन्धाय–बन्धस्य) विषयासक्तं (विषयासक्ति) मुक्त्यै [मुक्तं–मोक्षे–मुक्तौ-मुक्तेः) निर्विषयं स्मृतम् (मनः–तथा) [अ.बि.२+	शाट्याय. १
[मैत्रा. ६।३४,११+	अमन. १।७७
[भवसं. ३।१४+	त्रि. ता. ५।२
मन एव महद्दुःखं मन एव जरादिकम्	ते. बिं. ५।९९
मन एव महद्बन्धं मनोऽन्तःकरणं च तत्	ते. बिं. ५।१०१
मन एव महारिपुः	ते. बिं. ५।९८
मन एव समर्थं हि मनसो दृढनिग्रहे	महो. ४।१०९
मन एव सम्राडिति होवाच	बृह. ४।१।६
मन एव सविता वाक्सावित्री	सावित्र्यु. ८
मन एव हि कालश्च मन एव मलं तथा	ते. बिं. ५।९९
मन एव हि तेजश्च मन एव मरुन्महान्	ते. बिं. ५।१०२
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् । मनसोत्पद्यतेबिन्दुर्यथा क्षीरं गता-(घृता-) त्मकम् [यो. शि. ६।७३+	योगकुं. ३।५
मन एव हि भूमिश्च मन एव हि तोयकम्	ते. बिं. ५।१०१
मन एव हि सङ्कल्पो मन एव हि जीवकः	ते. बिं. ५।१००
मन एव हि संसारो मन एव जगत्त्रयम्	ते. बिं. ५।९८
मन एवाप्येति यो मन एवास्तमेति	सुबालो. ९।१०
मन एवायतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत	बृह. ४।१।६
मन एवास्यात्मा वाग्जाया प्राणः प्रजा	बृह. १।४।१७
मननात् त्राणनान्मंत्रः सर्ववाच्यस्य वाचकः	रा. पू. १।१२
(तस्मात्) मननादौ सन्न्यासिनामधिकारः	ना. प. ५।८
म (मा) ननान्मन उच्यते	महो. ४।१२३
मननोत्थेमनस्येष बंधःसांसारिकोदृढः	अ. पू. २।२४

मनश्चञ्चलमस्थिरम्	भ. गी. ६।२४
मनश्च मन्तव्यं च	प्रश्नो. ४।८
मनश्चन्द्रं (अप्येति)	बृह. ३।२।१३
मनश्चन्द्रो रविर्वायुर्दृष्टिरग्निरुदाहृतः। बिन्दुनादकला ब्रह्मन्विष्णुब्रह्मेशदेवताः	यो. शि. ६।७०
मनश्चेदुन्मनीभूयान्न पुण्यं न च पातकम्	यो. शि. ६।६१
यत्र न चन्द्रमा भाति, यत्र न नक्षत्राणि भान्ति, यत्र नाग्निर्दहति, यत्र न मृत्युः प्रविशति, यत्र न दुःखं...परमं पदं..	नृ. पू. ५।१६
यत्र न जरा न मृत्युर्न कालो न भङ्गो न जयो न विवादो न हिंसा न शान्तिर्न स्वप्न एवं लीलाकामशरीरी स्वविनोदार्थं भक्तैः सहोत्कण्ठितैस्तत्र क्रीडति कृष्णः	राधोप. ४।२
यत्र न मोहो न दुःखं	ग. शो. ५।६
यत्र न सूर्यस्तपति, यत्रनवायुर्वाति	नृ. पू. ५।१६
यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा	छांदो. ७।२४।१
यत्र नाभ्युदितं चित्तं तद्वै सुखमकृत्रिमम्	अ. पू. ५।४५
यत्र नासन्न सद्रूपो नाहं नाप्यनहङ्कृतिः । केवलं क्षीणमनन आस्तेऽद्वैतेऽतिनिर्भयः [अक्ष्युप. ४१+	वराहो. ४।१७
यत्र निशितासिशतपातनमुत्पलताडनवत्सोढव्यं... नावहेलनया भवितव्यमेवं दृढवैराग्याद्बोधो भवति	महो. ४।२६
(अथापि) यत्र नील इवाग्निर्दृश्यते यथा मयूरग्रीवा	३ ऐत. २।४।६
यत्र नृसिंहादयो देवताआवरणानि	राधोप. ४।२
यत्र पुरुषस्तत्स्त्री यत्र वा स्त्री स पुरुषस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ९
यत्र पार्थो धनुर्धरः	भ. गी. १८।७८
यत्र पूर्वे साध्याः सन्ति देवाः [+महावा.४+पु.सू.१६+ [मं. १०।९०।१६+	चित्यु. १२।७ ऋ.अ. ८।४।१९= वा. सं. ३१।१६
यत्र बिन्दुश्च नादश्च सोमसूर्याग्निवायवः। इन्द्रियाणि च सर्वाणि लयं गच्छंति सुव्रत	यो. शि. ३।११
यत्र (विद्यायां) ब्रह्म प्रतिष्ठितम्, विश्वेदेवाः प्रतिष्ठिताः, यस्तां न वेद किमन्यैर्वेदैः करिष्यति	अव्यक्तो. ३
यत्र ब्रह्माण्डानि कोटिशो विराजमानानि राजन्ते	सामर. ५५
यत्र ब्रह्माण्डान्युत्पद्यन्ते लीयन्ते	सामर. ५
यत्र ब्रह्मा पवमानेति षट्	३ ऐत. २।४।४
यत्र भार्गवी यमुना समुद्रममृतमयं वृन्दावनानि नीलपर्वतगोवर्धनसिंहासनं प्रासादो मणिमण्टपो विमलादिषोडशचण्डिकागोप्यः	राधोप. ४।२
(अथापि) यत्र भूमिं ज्वलंतीमिव पश्येत तदप्येवमेव विद्यादिति प्रत्यक्षदर्शनानि	३ ऐत. २।४।६
यत्र मनस्तद्वाग्यत्र वा वाक् तन्मनस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ८
यत्र भक्ष्यमभक्ष्यं वा विद्याऽविद्या न..	ते. बिं. ५।१४
यत्र यज्ञस्तत्र छन्दांसि यत्र वा छन्दांसि स यज्ञस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ४

यत्र यत्र धृतो वायुरङ्गे रोगादिदूषिते । धारणादेव मरुतस्तत्तदारोग्यमश्नुते	त्रि. ब्रा. १२०
यत्र यत्र मनो याति तत्र तत्र परं पदम् [पैङ्गलो. ४।२१+	सौभाग्य. २३
यत्र यत्र मनो याति ब्राह्मणस्तत्र दर्शनात् । मनसा धारणं चैव धारणा सा परा मता	ते. बि. १।३५
यत्र यत्र मनो याति न निवार्यं मनस्तदा । अवारितं क्षयं याति वार्यमाणं तु वर्तते (वर्धते)	अमन. २।७०
यत्र यत्र मृतो ज्ञानी येन वा केन मृत्युना । यथा सर्वगतं व्योम तत्र तत्र लयं गतः	पैङ्गलो. ४।१३
यत्र योगेश्वरः कृष्णः	भ. गी. १८।७८
यत्र रविसोमौ न तपतः	ग. शो. ५।६
यत्र रसावात्मानमुपसंहृत्याजुगुपत्	शौनको. ४।५
यत्र लक्ष्मीर्जाम्बवती राधिका विमला चन्द्रावली सरस्वती ललितादिरिति	राधोप. ४।१
यत्र लोका न लोका देवा न देवा वेदा न वेदा यज्ञा न यज्ञा माता न माता...एकमेव तत्परं ब्रह्म विभाति निर्वाणम्	ब्रह्मो. ३
यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. २
यत्र वर्णा न वर्तन्ते विवेकस्तत्र नोच्यते	अ.शां. ६०
यत्र वा अस्य सर्वमात्मैवाभूत्..	बृह. २।४।१४
(अथ) यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतत्	बृह. ४।३।५
यत्र वाऽन्यदिव स्यात्तत्रान्योऽन्यत् पश्येत्	बृह. ४।३।३१
यत्र वा पितुस्तत्पुत्रस्यैतत्तदुक्तं भवति	१ ऐत. २।८।१
यत्र वायुर्नेष्याग्निर्वाति(न)भान्ति	ग. शो. ५।६
यत्र वायुस्तदाकाशो यत्र वा आकाशस्तद्वायुस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ३
यत्र विद्याविद्ये न विदामः	गोपालो. १।१२
यत्र विराण्नृसिंहोऽवभासते तत्र खलूपासते	अव्यक्तो. ५
यत्र विश्वं भवत्येकनीडम् । यस्मिन्निदꣳ संचविचैति सर्वꣳ स ओतः प्रोतश्च विभुः प्रजासु	महाना. २।३
यत्र वृक्षा आधिदैविका देवा एव भवन्ति	सामर. ६
यत्र वैकुंठेऽनेकशो भक्ता जयन्तकुमुदजयविजयगरुडाद्याः शतशः पार्षदाः राजमाना भवन्ति	सामर. ९२
यत्र सङ्कल्पनं तत्र मतोऽस्तीत्यवगम्यताम्	महो. ४।५२
यत्र सप्तावरणानि तेजोमयानि	सामर. ५
यत्र समुद्रतीरे च निरन्तरं कामधेनुवृन्दम्	राधोप. ४।२
यत्र सर्वमात्मैवाभूत्तत्र कुत्र वा मनुते । कथं वा गच्छतीति	गोपालो. २।१०
यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी । प्रबुद्धा यत्र ते विद्वान्सुषुप्तिं याति योगिराट्	याज्ञव. २५
यत्र सुप्तो न कञ्चन कामयते तत्सुषुप्तम्	श्री. वि. ता. ३।१
यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति	बृह. ४।३।१९
यत्र सुप्तो न कञ्चन कामं कामयते ...स्वप्नं (स्वप्ने) पश्यति तत्सुषुप्तम्	मांडू. ५
[गणेशो. २।३+नृ. पू. ४।२	रामो. २।३
यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति न तत्र देवा न देवलोका यज्ञा न..	सुबालो. ४।४
यत्र सुहार्दः सुकृतो मदन्ते विहाय	
यत्र रोगं तन्वाꣳ स्वायाम्	सहवै. १०
यत्र स्तनयित्नुस्तद्विद्युद्यत्र वा विद्युत्तत्र स्तनयित्नुस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ५

यत्र ह क्व पुत्रस्य तत्पितुः, यत्र वा पितुस्तत्पुत्रस्य	१ ऐत. १।८।१
यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति	बृह. २।४।१४
यत्राग्निर्मृत्युर्न दहति (न) प्रविशति	ग. शो. ५।६
यत्राग्निस्तत्र पृथिवी यत्र वै पृथिवी तत्राग्निस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. १
यत्रात्मना सृष्टिलयौ जीवन्मुक्तिदशागतः । सहजः कुरुते योगं सेयं निष्पत्तिभूमिका..	वराहो. ५।७५
यत्रादित्यस्तद्द्यौ यत्र वा द्यौस्तदादित्यस्तेद्वेयोनिस्तदेकंमिथुनम्	सावित्र्यु. ६
यत्राद्वैतीभूतं विज्ञानं कार्यकारणकर्मनिर्मुक्तं निर्वचनमनौपम्यं निरुपाख्यं किं तदङ्गवाच्यम्	मैत्रा. ६।७
यत्रान्तर्याम्यादिभेदस्तत्त्वतो नहि युज्यते । निर्भेदं परमाद्वैतं स्वमात्रमवशिष्यते	अध्यात्मो.शीर्षकं
यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्	छांदो. ७।२४।१
यत्रापह्नवतां याति स्वाविद्यापदविभ्रमः । तत्त्रिपान्नारायणाख्यं स्वमात्रमवशिष्यते	त्रि.म.ना. शीर्षकं
यत्रामृतः स पुरुषो ह्यव्ययात्मा	मुण्ड. १।२।११
यत्रायं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्त्याहो ३ नेति..	बृह. ३।२।११
यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति	बृह. ३।२।१२
यत्रायं पुरुषो रमते तत्रायं रसो व्रजति	सामर. ५
यत्रायं मणिमानं न्येति	बृ. उ. ४।३।३६
यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छेति	छांदो. ४।१।७
यत्रालम्बालम्बिभावो विद्यते न कदाचन । ज्ञविज्ञसम्यग्ज्ञालम्बं निरालम्बं हरिं भजे	निरा.शीर्षकं
यत्रासंभिन्नतां याति स्वातिरिक्तभिदाभ्रांतिः । संविन्मात्रं परं ब्रह्म तत्स्वमात्रं विजृम्भते	स्कन्दो. शीर्षकं
यत्रासां दिशामन्तस्तद्दमयाञ्चकार	बृह. १।३।१०
यत्रासौ केशान्तो विवर्तते	तैत्ति. १।६।१
यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहितः	गोपालो. २।२
यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः । यथालब्धोपजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः	ना प. ५।२६
यत्रास्ति वासना लीना तत्सुषुप्तं न सिद्धये	अ. पू. ५।१६
यत्रास्ते च गुरुर्ब्रह्मन्दिव्ययोगप्रदायकः ।... तेनोक्तः सम्यगभ्यासंकुर्यादादावतन्द्रितः	योगकुं. २।१४
यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति	बृह. ३।२।१३
यत्त्रिवृत् पञ्चदशः सप्तदश एकत्रिंश इति कास्य तद्गात्	छाग. २।२+४।२
यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत, चक्षुष्यः श्रुतो भवति	छांदो. ३।१३।८
यत्रैतत्पुरुष आर्तो मरिष्यन्नाबल्यं न्येत्यसंमोहं नैति तदाहुरुदक्रमीच्चित्तम्	कौ. त. ३।३
(अथ) यत्रैतत्पुरुषः पिपासति तेज एव तत्पीतं नयते	छान्दो. ६।८।५
यत्रैतत्पुरुषः सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति	कौ. त. ३।३
यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य नाम तदा सम्पन्नो भवति	छांदो. ६।८।१
यत्रैतत्पुरुषोऽशिशिष्यति नामाप एव तदशितं नयन्ते	छांदो. ६।८।३
(अथ) यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति	छांदो. ८।६।४
यत्रैतद्भूयत एतदागात्	कौ. त. ४।१८

(अथ) यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते	छांदो. ८।६।५
यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषाश्रुतिः	छांदो. ३।१३।८
यत्रैतदित्थेत्थेत्यभिपश्यति	आर्षे. ९।१
यत्रैतदूर्ध्वोच्छ्वासी भवति	बृह.४।३।३५,३८
यत्रैतद्देवास्तत्प्राप्य तदमृतो भवति, यदमृता देवाः	को. त. २।१४
(अथ) यत्रैतदाकाशमनु विषण्णं चक्षुः स चाक्षुषः पुरुषः	छांदो. ८।१२।४
(अथ) यत्रैनं घ्नन्तीव जिनंतीव हस्तीव विच्छाययति	बृह. ४।३।२०
यत्रैव जातं सकलेवरं मनस्तत्रैव लीनं कुरुते स योगात् । स एव मुक्तोहिनिरहङ्कृतिःसुखी..	यो. शि. १।१२३
यत्रैवंविद्धवाएषा ब्रह्माणा (मा.)	छां. उ.४।१७।९
यत्रैवंविद्ब्रह्मा भवति	छांदो.४।१७।८,९
यत्रैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदगाद्धिता नाम हृदयस्य नाड्यः	कौ. त. ४।१९
यत्रैष जगदाभासो दर्पणान्तः पुरं यथा । तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भवानघ	अध्यात्मो. १०
यत्रोपरमतेचित्तं निरुद्धंयोगसेवया । यत्रचैवात्मनात्मानंपश्यन्नात्मनि तुष्यति [यो. शि. ३।१४+	भ. गी. ६।२०
यत्रोपाकृते प्रातरनुवाकेन पुरा	छां. उ. ४।१६।४
यत्सकललोकरक्षणचक्रं यन्मायात्मा तच्चतुर्थस्य	नृ. षट्च. ६
यत्सकृदुपस्पृशति तेन सामानि... प्रीणाति	सद्वै. १५
(अथ) यत्सङ्गववेलायाꣳस आदित्यस्तदस्य वयाꣳस्यन्वायत्तानि	छान्दो. २।९।४
यत्सञ्चरति स वायुः [गर्भो.१+	शारीरको. १
यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यः	महाना. १८।१
यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम्	महो. ४।१२२
यत्सत्यं तदुपास्यताम	पैङ्गलो. ४।१७
यत्सत्यं वा विष्णुरुद्योगः सूर्यो गौर्वा विष्णुर्विशत् विश्वं, विश्वं सन्दधानः तद्विश्वं विष्णवे विश्वरूपाय स्वाहा	पारमा. ५।५
यत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मं सर्वतोमुखमनिर्देश्यममृतमस्ति तदिदं निष्कलं रूपम्	शांडिल्यो. ३।२
यत्सस्त्वमुभयोरनुगोप्ता तत्सत्यं सत्यपदाय सत्याय स्वाहा	पारमा. ४।९
(अथ) यत्सत्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दते	छान्दो. ८।५।२
यत्सप्तभूमिकाविद्यावेद्यानन्दकलेवरम् । विकलेवरकैवल्यं रामचन्द्रपदं भजे	अक्ष्यु. शीर्षकं
यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेति मेधया हि तपसा जनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते	बृह. १।५।२
यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत्	बृह. १।५।१
यत्समत्वं तयोरत्र जीवात्मपरमात्मनोः...समाधिरभिधीयते	सौभाग्य. २०
यत्समाधौ परं ज्योतिरनन्तं विश्वतोमुखम् । तस्मिन्दृष्टे क्रियाकर्म यातायातो नविद्यते	यो. चू. ११३
यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत्	बृह. ३।९।३३
(अथ) यत्समृद्धमिदं तस्यान्नं	मैत्रा. ६।३६
(अथ) यत्सम्प्रति मध्यन्दिने स उद्गीथस्तदस्य देवा अन्वायत्ताः	छान्दो. २।९।५
यत्सम्मितमनु संयन्ति प्राणिनस्तन्मे मनः शिवसङ्कल्पमस्तु	२ शिवसं. २
यत्सर्वनिष्ठमजरं समस्तं	पारमा. १।८
यत्सर्वस्य सोमोऽहमेव जनिता विश्वाधिको रुद्रो महर्षिः	भस्मजा. २।५

यत्सर्वहृदयागारं यत्र सर्वं प्रतिष्ठितम् । वस्तुनो यन्निराधारं वासुदेवपदं भजे	वासुदे. शीर्षकं
यत्सर्वशास्त्रसिद्धान्तं यत्सर्वहृदयानुगम्	अ. पू. ३।२१
यत्सर्वं चाप्यसर्वं च यत्तत्त्वं तदसौ स्थितः	अ. पू. ३।२३
यत्सर्वं तद्ब्रह्म	पं. ब्र. १
यत्सर्वं परिपश्यतीति सौक्ष्म्यात्	सूर्यता. १।२
यत्सर्वं सर्वगं वस्तु यत्तत्त्वं तदसौ स्थितः	अ. पू. ३।२२
यत्सक्करमभिधावाम्याशाम्	सहवै. ९
यत्संवत्सरं वत्स्यथ अथ वेदिष्यथेति । ते ह संवत्सरमूषुः	छाग. ४।३
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व	बृह. ३।४।१
यत्सांख्यैः प्राप्यते स्थानं	भ. गी. ५।५
यत्साधुभवतिसाधुवतेत्येवतदाहुः	छान्दो. २।१।३
यत्साम्पराये महति ब्रूहिनस्तत्...	कठो. १।२९
यत्सामानि सोम एभ्यः पवते... तद्देवांस्तर्पयति	सहवै. १४
यत्सामानि सोमाहुतिभिः... तद्देवास्तर्पयति	सहवै. १४
यत्साम्यज्ञानकालाग्निस्वातिरिक्तास्तिताभ्रमम् । करोति भस्म निश्शेषं तद्ब्रह्मैवास्मि केवलम्	भस्मजा.शीर्षकं
यत्सायं प्रातरत्ति तत्समिधम्	महाना. १८।१
यत्सारभूतं सकलं धरित्री मोदप्रायेणानुभूतमनुविश्वं सूक्ष्मः	पारमा. ८।१
यत्सारस्वतं तत्तृतीयस्य, यस्य यत्कामं देवं तच्चतुर्थस्य	नृ. षट्च. ४
यत्सीमिन्द्रो अकरोदनीकैः	बा. मं. १०
यत्सुचक्रं यत्प्रियात्मा तद्द्वितीयस्य	नृ. षट्च. ६
यत्सुवर्णꣳ सा द्यौः	छान्दो. ३।१९।२
(शरीरे) यत्सुषिरं तदाकाशम् [गर्भो. १+	शारीरको. १
यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा	महाना. १४।२
यत्सूक्ष्मं तच्छुक्लं [बटुको. १९+	अ. शिरः. ३।४
यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा	महाना. १४।२
यत्स्वयं प्राक्तनं कर्म पितामातेति तत्स्मृतम्	शिवो. ७।१०९
यत्स्वरूपज्ञानिनः सर्वमविदितं विदितं भवति । तत्सर्वं परमरहस्यं कथितम्	त्रि. म. ना. ८।६
यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते	सहवै. १४
यथा कटकशब्दार्थः पृथग्भावो न काञ्चनात् । न हेमकटकात्तद्वद्रुच्छच्छब्दार्थता परा	महो. ४।४६
यथा करी करेणैव पानीयं प्रपिबेत् सदा । सुषुम्ना वज्रजालेन पवमानं ग्रसेत्तथा	यो. शि. १।११७
(ते होचतुः) यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसः	बृह. ६।१।८
यथाकर्म यथाविद्यं (स...प्रत्याजायते)	कौ. व. १।२
यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक्	छां. ५।१।८
यथाकामं प्रश्नान्पृच्छथ यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति	प्रश्नो. १।२
(अतः) यथाकामं जपित्वा पश्येम शरदः शतमिन्द्र जीवेत्याशिषः प्रार्थयते	सन्ध्यो. ३
यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम्	अ. शां. ३६
यथाकारी यथाचारी तथा भवति, साधुकारी साधुर्भवति, पापकारी पापो भवति	बृह. ४।४।५
यथाऽऽकाशस्तथा देह आकाशादपि निर्मलः	यो. शि. १।४२

यथाऽऽकाशस्थितो नित्यं भ. गी. ९।६
यथाकाशं वायुरिव गच्छद्भिः
पथिकैः पथि । नानातीर्थानि
दृश्यन्ते नानामार्गास्तु विस्मयः यो. शि. १।१५७
यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये
जगत्स्थितिः यो. शि. ४।१६
यथाऽऽकाशो घटाकाशो महाकाश
इतीरितः । तथा भ्रान्ते-(न्तै-)
र्द्विधा प्रोक्तो ह्यात्माजीवेश्वरा-
त्मना [अ. पू. ५।७७+ जा. द. १०।२
यथा काश्यो वा वैदेहो वोग्रपुत्रं
उज्ज्यं धनुरधिज्यं कृत्वा द्वौ
बाणवन्तौ सपत्नातिव्याधिनौ
हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं
त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां बृह. ३।८।२
यथा कुमारको निष्काम आनन्द-
मभियाति । तथैव देवः स्वप्न
आनन्दमभियाति ब्रह्म. २
यथा कुमारो निष्काम आनन्द-
मुपयाति.. ब्रह्मो. १
यथा कुर्वन्ति भारत भ. गी. ३।२५
यथा कूपःशतधारःसहस्रधारोऽक्षितः महाना. १५।५
यथा कृताय विजितायाधरेयाः
संयन्त्येवमेनं सर्वं
तदभिसमेति छां. ४।१।४,६
यथा केशः सहस्रधाभिन्न एव-
मस्यैताहिता नामनाड्योऽन्त-
र्हृदये प्रतिष्ठिता भवन्ति बृह. ४।२।३
यथा केशः सहस्रधा भिन्नस्तथा
हिता नाम नाड्यो भवन्ति सुबालो. ४।४
यथा केशः सहस्रधा भिन्नस्तावता-
ऽणिम्ना तिष्ठन्ति
(हिता नाम नाड्यः) बृह. ४।३।२०
यथा कोशस्तथा जीवो यथा
जीवस्तथा शिवः त्रि. ब्रा. १९
यथा क्रतुरस्मिँल्लोके पुरुषो भवति
तथेतः प्रेत्य भवति स क्रतुं
कुर्वीत छान्दो. ३।१४।१

यथाक्रमोऽयं परलोकस्थाने भवति
तमाक्रममाक्रम्योभयान्पाप्मन
आनन्दांश्च पश्यति बृह. ४।३।९
(ते होचतुः) यथा क्लीबा
अप्रजायमाना रेतसा.. बृह. ६।१।१२
यथाक्षणं यथाशास्त्रं यथादेशं
यथासुखम् । यथासम्भवस-
त्सङ्गमिमं मोक्षपथक्रमम् ॥
तावद्विचारयेत् प्राज्ञो
यावद्विश्रान्तिमात्मनि महो. ४।२९
यथा क्षारमयत्नेन प्राप्यते लवणं
स्वयम् । ब्रह्मज्ञान्यप्ययत्नेन
निर्वाणं मनसस्तथा अमन. १।३०
यथा क्षुरः क्षुरधानेऽवहितः
स्याद्विश्वम्भरो वा विश्वम्भर-
कुलाये तं न पश्यन्ति बृ. उ. १।४।७
यथा खलु सोम्येमास्तिस्रो
देवताः...(मा. पा.) छां. उ. ६।८।६
यथा खं श्येनमाश्रित्य याति
स्वमालयमेवं सुषुप्तो ब्रूते ब्रह्मो. १
यथा गङ्गा शिवसङ्गात्तथैव न सूतकं
वा नाप्यशुचित्वमेषाम् सि. शि. १०
यथागन्धर्वनगरंयथावारिमरुस्थले अ. पू. १।२०
यथा गुरुस्तथैवेशो यथैवेशस्तथा
गुरुः । पूजनीयो महाभक्त्या
न भेदो विद्यतेऽनयोः यो. शि. ५।५८
यथाऽग्निगर्भा पृथिवी यथा द्यौ-
रिन्द्रेण गर्भिणी । वायुर्दिशां
यथा गर्भ एवं गर्भं दधामि ते बृह. ६।४.२२
यथाऽग्निनाऽयःपिण्डो वाऽभिभूतः
कर्तृभिर्हन्यमानो नानात्व-
मुपैत्येवं वाव खल्वसौ भूतात्मा-
न्तःपुरुषणाभिभूतो गुणै-
र्हन्यमानो नानात्वमुपैति मैत्रा. ३।३
यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं
विना । विना चाभ्यासयोगेन
ज्ञानदीपस्तथा नहि
[यो. शि. ६।७६+ योगकुं. १।१४

यथाऽग्निर्देवानां ब्राह्मणो मनुष्याणां वसन्त ऋतूनामेवं गायत्री छन्दसाम्	सन्ध्यो. १८
यथाऽग्निर्वै देवानामन्नादः सोमोऽन्नमग्निनैवान्नमित्येवंवित्...	मैत्रा. ६।१०
यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः...व्युच्चरंति	बृह. २।१।२०
यथाऽग्नेर्ज्वलतो सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते [कौ. ब. ३।३+	४।१९
यथा घटघटमध्ये बहुचन्द्रोऽपि दृश्यते	अद्वैतो. ९
यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात्	छांदो. ५।२४।१
यथा च मरणंप्राप्य आत्माभवति..	कठो. ५।६
यथाऽचिरात् सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान्	कैव. १
यथा वायुः पुष्करिणीं समिङ्गयति सर्वतः	बृ. उ. ६।४।२३
यथा जपाकुसुमसान्निध्याद्रक्तस्फटिकप्रतीतिस्तदभावे शुद्धस्फटिकप्रतीतिः	त्रि. म. ना. ३।७
यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम् । अविशेषो भवेत्तद्वज्जीवात्मपरमात्मनोः	पैङ्गलो. ४।१०
यथा जलौकाऽग्रमग्रं नयत्यात्मानं नयति परं सन्धय	ब्रह्मो. १
यथा जातरूपधरो निर्ग्रन्थोनिष्परिग्रहः... सन्न्यासेन देहत्यागं करोति स परमहंसो नाम	जाबालो. ६
यथा जातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक्संपन्नः ...सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति	ना. प. ३।८७
यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानं न विद्यते	त्रि. म. ना. ५।४
यथा ज्ञास्यसि तच्छृणु	भ. गी. ७।१
यथा तथा वा भवतु ह्युपनायनकर्मणि । उपदिष्टे मम सुते ब्रह्मणि त्वत्प्रसादतः	शु. र. १।५
(अथ) यथा तयोर्विसर्पिस्तृणकाष्ठसंस्पर्शेनोज्ज्वलतीत्येवं वाव खल्वसावप्राणाख्यः प्राणसंस्पर्शेनोज्ज्वलति	मैत्रा. ६।२६
यथा तमः सवितानुग्रकरसो ह्ययमात्मा चिद्रूप एव	नृसिंहो. २।७
यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् । घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः	यो. शि. ४।१७
यथा तु कथा च भुञ्जन् वा भुञ्जन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यात् [३ऐत.१।३।४+	१।४।२
यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति	छांदो. ६।८।६
यथा तु खलु सौम्येमास्तिस्रो देवताः...(मा. पा.)	छां. उ.६।४।७
यथा तूली तुलाधारां... मनोवृत्तिस्तथाऽऽत्मनि	अमन. २।७४
यथा तृणाशिनो विवेकहीनाः परप्रेष्याः... तथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः	जाबाल्यु. ४
यथा तृतीयकाले तु रविः प्रत्याहरेत्प्रभाम् । तृतीयाङ्गस्थितो योगी विकारं मानसं हरेत्	यो. चू. १२१
यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्ने तथा पितृलोके	कठो. ६।५
यथाऽऽदर्शो मलेन च	भ. गी. ३।३८
यथा दाह्यं दग्ध्वोऽग्निरविकल्पो ह्ययमात्मा	नृसिंहो. २।७
यथाऽसौ दिव्यादित्य एवमिदं शिरसि चक्षुः	३ ऐत. १।२।२
यथा दीपो निवातस्थः	भ. गी. ६।१९
यथा दुन्दुभेः खं, तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति	बृह. ५।१०।१

यथा देहान्तरप्राप्तेः कारणं भावना नृणाम् । विषयं ध्यायतः पुंसो विषये रमते मनः	यो. शि. ३।२४
यथा द्यौरिन्द्रेण गर्भिणी, वायुर्दिशां यथा गर्भ एवं गर्भं दधामि ते	बृह. ६।४।२२
यथाधिकारवाक्यसेत्पूर्णदीक्षांलभेत्	गुह्यषोढा. १
यथाऽधीमहे स्वर्ग्या देवस॰ हिता भवति	संहितो. १।१
यथा ध्यानेन वैराग्यमैश्वर्यं स्वस्य पूजनात्	रा. पू.१।५
यथा न जायते किञ्चिज्जायमानं समन्ततः	अद्वैत. २
यथा नदी जायते सागर एकोऽपि सागरप्रतिभासितः । तथा ब्रह्म सर्वान्तरात्मा मध्ये प्रकाशितम्	अद्वैतो. ३
यथा नदीनां बहवोऽम्बुवेगाः	भ. गी. ११।२८
यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं...(मा.)	मुण्डको. ३।२।८
यथा नद्यः स्यन्दमानाः समुद्रे गच्छन्त्यस्तं नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं जगदम्बामुपैति	गुह्यका. ३८
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्	मुण्ड. ३।२।८
यथा नद्यः किङ्किणी कांस्यचक्कभेकविः कृन्धिका वृष्टिनिवाते..	मैत्रा. ६।२२
(सहोवाच) यथा नस्त्वं गौतम मापराधास्तव च पितामहाः	बृह. ६।२।८
यथाऽनादिसर्वप्रपञ्चो दृश्यते, नित्योऽनित्यो वेति संशय्येते	त्रि. म. ना. ३।२
यथाऽनादिससिद्धोऽयं जीवसङ्घः, तथा मायाऽप्यनादिसिद्धा भवति, सा त्रिविधा...	सामर. ९८
यथा नामी वाचकेन नाम्ना योऽभिमुखो भवेत् । तथा बीजात्मको मन्त्रो मन्त्रिणोऽभिमुखो भवेत्	रा. पू. ४।३
यथा नास्ति नभोवृक्षस्तथा नास्ति जगत्स्थितिः	यो. शि. ४।१९
यथा निरंकुशो हस्ती कामान्प्राप्य निवर्तते । अवारितं मनस्तद्वत् स्वयमेव विलीयते	अंमन. २।७१
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति । ग्राह्याभावे मनःप्राणो निश्चलज्ञानसंयुतः..	२ अवधू. ६
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति । ग्राह्यभावे...	त्रि. ब्रा. २।१६३
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति। तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति [मैत्रा. ६।३४+	मैत्रे. १।७
यथा निर्मितको जीवो जायते म्रियतेऽपि वा । तथा जीवा अमी सर्वे भवंति न भवंति च	अ. शां. ७०
यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत् । तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत्	क्षुरिको. २३
यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति	छांदो. ६।४।७
यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि	छांदो. ६।३।४
यथाऽनुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति	छांदो. ८।१।५
यथान्तरं न भेदाःस्युः शिवकेशवयोस्तथा । देहो देवालयः प्रोक्तः स जीवः केवलः शिवः	स्कन्दो. १०
(ते होचुः) यथा अन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन..विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः	बृह. ६।१।९
यथाऽन्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः	

श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः छांदो. ५।१।९

यथाक्रममाद्श्रेत्स्यस्योपव्याख्यानम् मैत्रा. ६।१०

यथाऽपकृष्टं शैवालं क्षणमात्रं न तिष्ठति । आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखम् अध्यात्मो. १५

यथा पक्षिगणो रात्रौ तरुमाश्रित्य तिष्ठति । विश्रम्य च पुनर्गच्छेत्तद्वद्भूतसमागमः भवसं. १।२२

यथा परमतेजःपारावारतरङ्गाः परमतेजःपारावारे प्रविशन्ति तथैव सच्चिदानन्दात्मोपासकः ...परब्रह्मणि...प्रविवेश त्रि. म. ना. ८।३

यथा परमतेजोमहानदीप्रवाहः परमतेजःपारावारे प्रविशति.. त्रि. म. ना. ८।३

यथा पर्वतधातूनां दह्यन्ते धमनान्मलाः अ. ना. ७

यथा पर्वतमादीप्तं नाश्रयन्ति मृगद्विजाः । तद्वद्ब्रह्मविदो दोषा नाश्रयन्ति कदाचन मैत्रा. ६।१८

यथाऽपः प्रवता यन्ति, यथा मास अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायान्तु सर्वतः स्वाहा तैत्ति. १।४।७

यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युत्तं सकृद्विद्युत्तेव या वा अस्य श्रीर्भवति बृह. २।३।६

यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः प्रश्नो. ५।५

यथा पुत्रकामेष्टिना पुत्रं वाणिज्यादिना वित्तं ज्योतिष्टोमेन स्वर्गं तथा...जीवन्मुक्त्यादिलाभः मुक्तिको. २।१

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः । सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् कठो. १।११

यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते छांदो. ४।१४।३

यथापूर्वमविद्याकार्याणि जायन्ते । कार्यकारणोपाधिभेदाज्जीवेश्वरभेदोऽपि दृश्यते त्रि. म. ना. ४।७

यथा पृथिव्यादीनां व्यापकशरीराणां देवविशेषाणां... निजमूर्त्याकारदेवताः श्रूयन्ते सर्वत्र तद्वत्परब्रह्मणः सर्वात्मकस्य साकारनिराकारभेदविरोधो नास्त्येव त्रि. म. ना. २।३

यथा पृथिव्यामोषधयः सम्भवन्ति.. तथाऽक्षरात्सम्भवतीह विश्वम् मुण्ड. १।१।७

यथा पृथिव्यामोषध्यः सम्भवन्ति गिलन्त्यपि..तथा तस्यां जगत् गुह्यका. २६

यथा प्रकाशयत्येकः भ. गी. १३।३४

(अथ खलु) यथा प्रज्ञायां सर्वाणि भूतान्येकीभवन्ति तद्व्याख्यास्यामः कौ. ब. ३।४

यथा प्रदीप्तं ज्वलनं पतङ्गाः भ. गी. ११।२९

यथाप्राप्तानुभवतः सर्वत्रानभिवाञ्छनात्..विज्वरो भव.. महो. ६।१४

यथाप्लुतो विराट्प्लुतः ना. प. ८।४

यथाऽप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके कठो. ६।५

यथाऽप्सु परीव दृश्यते (मा.पा.) कठो. ६।५

यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः । समुद्रे लीयते तद्वज्जगन्मय्यनुलीयते जा. द. १०।६।७

यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् छान्दो. ५।१।१०

(ते होचुः) यथा बधिरा अशृण्वन्तः श्रोत्रेण... पश्यन्तश्चक्षुषा विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् बृह. ६।१।१०

यथा बाला अमनसः प्राणन्तः प्राणेन... प्रविवेश ह मनः	छांदो. ५।१।११
यथा ब्रह्म त्रिविधात्मकं सच्चिदानन्दात्मकम्	सामर. ५७
यथा ब्रह्मानन्दोऽयं लोकः सच्चिदानन्दो भवति तथा जीवसङ्घस्त्रिविधो भवति	सामर. ९७
यथा भवति बालानां गगनं मलिनं मलैः । तथा भवत्यबुद्धानामात्मापि मलिनो मलैः	अद्वैत. ८
यथा भवेद्दृढासनस्तत्त्वं यावत् प्रकाशते । स्वयं प्रकाशिते तत्त्वे स्वानन्दस्तत्क्षणाद्भवेत्	अमन. २।५१
यथाभागमवस्थिताः	भ. गी. १।११
यथाभूतार्थदर्शित्वमेतावद्भुवनत्रये । यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता	अ. पू. २।३५
यथा भूमेः पर्वतवृक्षतृणगुल्मलताद्यनन्तवस्तुभेदः तथैव... मम सर्वाद्वैतमुपपन्नं भवत्येव	त्रि. म. ना. ८।१
यथा मञ्जिष्ठाव्यस्तः पायुः काककुलायगन्धिकमस्यशिरो वायति	२ ऐत. २।४।४
यथा महान्सुहयः सैन्धवः (मा.पा.)	बृ. उ. ६।१।१३
यथा महाफले सर्वे रसाः सर्वप्रवर्तकाः । तथैवान्नमये कोशे कोशास्तिष्ठन्ति चान्तरे	त्रि. ब्रा. ११
यथा महारजनं वासः...या वा अस्य श्रीर्भवति	बृह. २।३।६
यथा महासुहयः सैन्धवः पड्वीशशङ्कून् संवृहेदेव॰ हैवेमान् प्राणान्संववर्ह	बृह. ६।१।१३
यथा माक्षीकेकेन तन्तुना जालं विक्षिपति तेनापकर्षति तथैवैष प्राणः	प्रश्नो. १
यथा मातृमान्पितृमानाचार्यवान ब्रूयात्तच्छैलिनिरब्रवीत्	बृह. ४।१।२,२
यथा मा त्वं गौतमाऽवदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूत्	छांदो. ५।३।७
यथा मायामयाद्बीजाज्जायते तन्मयोऽङ्कुरः । नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना	अ. शां. ५९
यथा मायामयो जीवो जायते म्रियतेऽपि च । तथा जीवा अमी सर्वे भवन्ति नभवन्तिच	अ. शां. ६९
यथा मासा अहर्जरम् , एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा	तैत्ति. १।४।७
यथा मां त्वं तदैतानवदोयथाऽहमेषां नैकञ्चन वेद..	छांदो. ५।३।५
यथा मां त्वं तातैतानवदः..(मा.पा.)	छां. उ. ५।२।५
यथा मुग्धा अविद्वांसो मनसा प्राणन्तः प्राणेन...प्रविवेश ह मनः	बृह. ६।१।११
यथाऽमुष्मिन्नाकाशे वायुरायत्तः	२ ऐत. १।२।२
यथा मूढो यथा ह्यन्धो यथा बधिर एव वा । तथा वर्तेत लोकस्य स्वसामर्थ्यस्य गुप्तये	१ यो. त. ७७
यथाऽमूनि त्रीणि ज्योतींषि, एवमिमानि पुरुषे त्रीणि ज्योतींषि	२ ऐत. १।२।२
यथाऽमृतं विषाद्भिन्नं विषदोषैर्न लिप्यते । न स्पृशामि जडाद्भिन्नो जडदोषाप्रकाशतः	आ. प्र. २८
यथा मृदि घटो नाम कनके कुण्डलाभिधा । शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे	यो. शि. ४।१४
यथा यथा सदाभ्यासात्सङ्कल्पविलयो भवेत् । योगिनो भवति श्रेयान्कर्मत्यागस्तदातदा	अमन. २।१०४
यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् । वायुवाक्कायदृष्टीनां स्थिरता च तथा तथा	अमन. २।६७
यथाऽयमग्निः पृथिव्यां, एवमिदमुपस्थे रेतः	२ ऐत. १।२।२
यथाऽयःपिण्डे हन्यमाने नाग्निरभिभूयत्येवं नाभिभूयत्यसौ पुरुषः	मैत्रा. ३।३

यथा योगी वायुनिरोधनं उच्चा-
चरणगुरुराच्छिनोति किल्बिषम् अद्वैतो. ४

यथा रज्जुं परित्यज्य सर्पं गृह्णाति
वै भ्रमात् । तद्वत्सत्यमविज्ञाय
जगत्पश्यति मूढधीः ना. बिं. २६

यथा रज्जौ निष्क्रियायां सर्पा-
भासविनिर्गमौ । अवृतेः सद-
सत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे २ आत्मो. २७

यथा रथचक्रस्य खं, तेन स ऊर्ध्व
आक्रमते स आदित्यमागच्छति बृह. ५।१०।१

यथा रविः सर्वरसान्प्रभुङ्क्ते...तथैव
योगी विषयान् भुङ्क्ते १ अवधू. ६

यथा रसाशये फेनं मथनादेव
जायते । मनोनिर्मथनादेव
विकल्पा बहवस्तथा त्रि. ब्रा. २।१४

यथा राज्ञे कुर्वन्नमात्यबुद्धिं देही
विन्देद्बाधमस्माद्विनष्टम् । सत्या-
दिरूपं शिवमेवंविदानो विष्ण्वादि-
बुद्ध्या हीयतेऽज्ञानसङ्गात् सि. शि. ३

यथार्द्रैन्धानाग्नेरभ्याहितस्य
पृथग्धूमा...(मा. पा.) बृ. उ. ४।५।११

(अथ)यथाऽऽर्द्रैधाग्नेरभ्याहितस्य
पृथग्धूमा निश्चरन्त्येवं वा एतस्य
महतो भूतस्य निःश्वसित-
-मेतद्यदृग्वेदो..[मैत्रा. ६।३२+ बृह. ४।६।११

यथार्थकथनोमित्युच्चार्याभिमानो-
त्पत्तिप्रणवः तुरीयो. १

यथा लगति कंठात्तु हृदयावधि
सस्वनम् । पूर्ववत्कुम्भयेत्प्राणं
रेचयेदिडया ततः योगकुं. १।२७

यथालब्धोपजीवी स्यान्मुनिर्दान्तो
जितेन्द्रियः (यतिः) ना. प. ५।२६

यथा लम्बरस्य खं, तेन स ऊर्ध्व
आक्रमते स चन्द्रमसमागच्छति बृह. ५।१०।१

यथा लातव्यो गोत्रो ब्राह्मणः २ प्राणाग्नि. १४

यथालाभमश्नीयात् (यतिः) आरुणि. ३

यथालाभमश्नीयात्प्राणसन्धारणार्थं
यथा मेदोवृद्धिर्न जायते
[१ सं. सो. १।२+ कठश्रु. ६

यथावच्छास्त्रवाक्यार्थे मतिमाधाय
निश्चलाम् ।...शिलाशय्या-
समासीनो जरयत्यायुराततम् अक्ष्युप. १९

यथावच्छृणु तान्यपि भ. गी. १८।१९

यथावदखिलं प्रोक्तं जनकेन
महात्मना । तदेव तत्पुरा
प्रोक्तं तस्य पित्रा महाधिया महो. २।३१

यथावदुपचारी कृतकृत्यो
मरुदुत्तरायणं गतः मैत्रा. ६।३०

यथा वन्ध्यासुतो नास्ति यथा
नास्ति मरौ जलम् यो. शि. ४।१८

यथावस्थितज्ञानेन किञ्चिन्नेति
यदस्ति तदस्ति यन्नास्ति
नास्ति तत् स्वसंवे. २

यथा वा अरा नाभौ समर्पिता
एवमस्मिन्प्राणेसर्वं समर्पितम् छांदो. ७।१५।१

यथा वा चित्तसामर्थ्यं जायते...
दूरश्रुतिर्दूरदृष्टिः क्षणाद्दूरागमः...
वाक्सिद्धिः कामरूपत्वमदृश्य-
करणी तथा । मलमूत्रप्रलेपेन
लोहादेः स्वर्णता भवेत् १ यो.त. ७३-७४

यथा वातैर्विनिर्मुक्तो निश्चलो
निर्मलः परः । शब्दाद्यैर्विषयै-
स्त्यक्तो लयस्थो दृश्यते तथा अमन. १।२७

यथा वाऽप्सुचारिणः शाकुनिकः
सूत्रयन्त्रेणोद्धृत्योदरेऽग्नौ
जुहोत्येवं वाव खल्विमान्
प्राणानोमित्यनेनोद्धृत्याना-
मयेऽग्नौ जुहोति मैत्रा. ६।२६

यथा वायुः पुष्करिणीं समिङ्गयति
सर्वतः । एषा ते गर्भ एजतु.. बृह. ६।४।२३

यथावायुःपुष्करिणीं समिङ्गति(मा.) बृह. ६।४।२३

यथा वा श्रेष्ठिनं स्वा भुञ्जन्त एवमेवैष
प्राज्ञ आत्मैतैरात्मभिर्भुङ्क्ते कौ. त. ४।२०

यथाविधानं गुरोः कर्मातिशेषेणा-
भिसमावृत्य कुटुम्बे शुचौ
देशे स्वाध्यायमधीयानो...
ब्रह्मलोकमभिसम्पद्यते छान्दो. ८।१५।१

यथा विन्दति तच्छृणु भ. गी. १८।४५

यथा विपणगा लोका विहरन्तोऽप्यसत्समाः । असम्बन्धात्तथा ज्ञस्य ग्रामोऽपि विपिनोपमः	अ. पू. १।२३
यथा विब्रूयादसौ गौरसावश्वः	बृह. ३।४।२
यथा विलीनमेवाङ्गास्यान्तादाचामेति । कथमिति लवणमिति	छां. उ. ६।१३।२
यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति	महाना. ७।९
यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा । तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः	बृह. ३।९।२८
यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतं यदिह वा अप्यनेवंविन्महत्पुण्यं करोति	बृह. १।४।१५
यथा वेदो वानूक्तोऽन्यद्वा..(मा.पा.)	बृह. १।४।१९
यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति	छान्दो. ७।३।१
यथा वै सम्राण्महान्तमध्वानमेष्यन् रथंवानावंवासमाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मा	बृह. ४।२।१
यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति	बृह. ५।६।१
यथाशास्त्रमनुद्वेगमाचरन्को न सिद्धिभाक्	महो. ५।८८
यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः	स्कन्दो. ९
यथा शुद्धसुवर्णस्यकनकमुकुटाङ्गदादिभेदः	त्रि. म. ना. ८।१
यथाऽश्मानमाखणमृत्वाविध्वꣳसत एवꣳ हैव स विध्वंसते	छान्दो. १।२।८
(सः) यथाऽश्मानमृत्वा लोष्टो विध्वꣳसेतैवꣳ हैव विध्वꣳसमाना विष्वञ्चो विनेशुः	बृह. १।३।७
यथा श्येनः खमाश्रित्य याति स्वमालयं कुलायम् , एवं सुषुप्तं ब्रूत	परब्र. ५
यथा श्रमो भवेद्देहे तथा सूर्येण पूरयेत्	योगकुं. १।३५
यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रियः	गोपालो. २।११
यथा श्रेष्ठैः स्वैर्भुङ्क्ते यथा वा श्रेष्ठिनं स्वा भुञ्जन्त एवमेवैष प्राज्ञ आत्मैतैरात्मभिर्भुङ्क्ते	कौ. उ. ४।२०
यथाऽश्वत्थदलेसूक्ष्मास्थूलाश्च(नाड्यः)	त्रि. ब्रा. २।७६
यथाऽश्वत्थादिपत्रं शिराभिर्व्याप्तमेवं शरीरं नाडीभिर्व्याप्तम्	शांडि. १।४।६
यथाऽश्वलायनो भगवन्तं परमेष्ठिनमुपसमेत्योवाच	कैव. १
यथा सकृद्विद्युत्तꣳ सकृद्विद्युत्तेव या वा अस्य श्रीर्भवति..	बृह. २।३।६
यथा सङ्कल्पितं लोकं नयति	प्रश्नो. ३।१०
यथा सङ्कल्पयेद्योगी...तथा तत्तदवाप्नोति	यो. शि. ५।५९
यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्	मुण्ड. १।१।७
यथा समुद्रसलिलस्य स्थूलसूक्ष्मतरङ्गफेनबुद्बुदकरकलवणपाषाणाद्यनन्तवस्तुभेदः	त्रि. म. ना. ८।१
यथा सम्पन्ना मधुत्वं नाना रसा इत्येवं ह्याह	मैत्रा. ६।२२
यथा सम्राडेवाधिकृतान्विनियुङ्क्ते एतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते	प्रश्नो. ३।४
यथा सर्वगतस्य निराकारस्य महावायोश्च तदात्मकस्य...चाभेद एव श्रूयते सर्वत्र	त्रि. म. ना. २।३
यथा सर्वगतं व्योम तत्र तत्र लयं गतः (ज्ञानी)	पैङ्गलो. ४।१३
यथा सर्वगतं सौक्ष्म्यात्	भ. गी. १३।३३
यथा संह्रियते सर्वमस्तं गच्छति भास्करे । कर्मजालं तथा सर्वममनस्के विलीयते	अमन. २।८८
यथाऽसावन्तरिक्षे विद्युदेवमिदमात्मनि हृदयम्	३ ऐत. १।२।२

यथा सिद्धरसस्पर्शात्ताम्रं भवति काञ्चनम् । गुरूपदेशश्रवणाच्छिष्यस्तत्त्वमयो भवेत्	अमन. २।४६
यथाऽसिधारां कर्तेव हितामवक्रामेयद्युवेयुवेह वा विह्वयिष्यामि ...एवमनृतात्मानं जुगुप्सेत्	महाना. ७।९
यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः । तथैव सेवितो वायुरन्यथा हन्ति साधकम् [यो. चू. ११८+	शाण्डि. १।७।६
यथा सिंहो मृगो वाऽपि नीयमानो व्यवस्थितः...परिचीयमानस्य तथा वायुर्वै विश्वतोमुखः	योगो. ११
यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते	मुण्ड. २।१।१
यथा सुनिपुणः सम्यक्परदोषेक्षणे रतः । तथा चेन्निपुणः स्वेषु को न मुच्येत बन्धनात्	वराहो. ३।२५
यथा सुप्तोत्थितः कश्चिद्विषयान् प्रतिपद्यते । जागर्त्येव ततो योगी योगनिद्राक्षये तथा	अमन. २।६२
यथा सुहयः पड्वीशशंकून्सङ्खिदेदेवमितरान्प्राणान्समखिदत्	छां. उ. ५।१।१२
यथा सोमꣳराजानमाप्यायस्वापक्षीयस्वेत्येवमेनाꣳस्तत्र भक्षयन्ति	बृह. ६।२।१६
यथा सोम्य पुरुषं गान्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्	छांदो. ६।१४।१
यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसान्समवहारमेकताꣳ रसं गमयन्ति	छांदो. ६।९।१
यथा सोम्य महतोऽभ्याहतस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्रज्वालयेत्तेन ततोऽपि बहु दहेत्	छांदो. ६।७।५
यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातꣳ स्याद्वाचारम्भणं... कृष्णायसमित्येव सत्यम्	छांदो. ६।१।६
यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्याद्वाचारम्भणं...लोहमित्येव सत्यम्	छांदो. ६।१।५
यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातꣳ स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्	छांदो. ६।१।४
यथा सौक्ष्म्याच्चिदाभास्य आकाशो नोपलक्ष्यते । तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते	महो. ५।९९
यथाऽसौ दिव्यादिव्यादित्य एवमिदं शिरसि चक्षुः	३ ऐतरे. १।२।२
यथाऽसौ द्यावापृथिव्यावन्तरेणाकाशः, तस्मिन्हास्मिन्नाकाशे प्राण आयत्तः	३ ऐत. १।२।२
यथा सौम्य महतोऽभ्याहितस्यैकोऽङ्गारखद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेत्	छांदो. ६।७।३
यथा स्तेनो यथा भ्रूणहैवमेष भवति	सहवै. १२
यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतां	बृह. १।४।३
यथा स्थितमिदं यस्य व्यवहारवतोऽपि च । अस्तं गतं स्थितं व्योम स जीवन्मुक्त उच्यते	वराहो. ४।२१
यथाऽस्या उदरमेवममुष्या अम्भणं	३ ऐत. २।५।२
यथाऽस्यास्तन्त्रय एवममुष्या अङ्गुलयः	३ ऐत. २।५।२
यथाऽस्याःशिर एवममुष्याः शिरः	३ ऐत. २।५।२
यथाऽस्याः स्पर्शा एवममुष्याः स्पर्शाः	३ ऐत. २।५।२
यथाऽस्याः स्वरा एवममुष्याः स्वराः	३ ऐत. २।५।२
यथाऽस्यै जिह्वैवममुष्यै वादनं	३ ऐत. २।५।२
यथा स्वच्छन्दतः प्राणो निपतत्याशु गच्छतः ।...परिचीयमानस्य तथा वायुर्वै विश्वतोमुखः	योगो. ११

यथा स्वप्नमयो जीवः...तथा जीवा अमी सर्वे (मांडूक्योपनिषद् अ. शां. ६८)
यथा स्वप्ने तथा पितृलोके कठो. ६।५
यथा स्वप्ने द्वयाभासं चित्तं चलति मायया । तथा जाग्रद्वयाभासं चित्तं चलति मायया (मां.उ.) अ. शां. ६१
यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः । तथा जाग्रद्वयाभासं स्पन्दते मायया मनः अद्वैत.२९
यथाऽहनि तथा रात्रौ । नास्य नक्तं न (वा) दिवा [१सं.सो.१।३+ कठ. १०
यथाऽहमन्धो न स्यां तथा कल्पय कल्पय, कल्याणं कुरु कुरु चाक्षुषो. २
यथाऽहमेषां नैकञ्चन वेद छांदो. ५।३।५
यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान् भुनक्ति बृह. १।४।१०
यथा ह वै पदेनानुविन्देदेवं कीर्तिꣳ श्लोकं विन्दते बृह. १।४।७
यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठति गोपालो. १६
यथा ह्यग्निः काष्ठेषु, तिलेषु तैलमिव तं विदित्वा मृत्युमत्येति हंसो. ४
यथा ह्येवेयं शब्दवती तर्ध्रवत्येवमसौ शब्दवती तर्ध्रवती ३ ऐत. २।५।२
यथा ह्येवेयं लोमशेन चर्मणा पिहिता भवत्येवमसौ लोमशेन चर्मणा पिहिता ३ ऐत. २।५।२
यथा ह्येवेह प्रजा अन्वाविशन्ति... तं तमेवोपजीवन्ति छांदो. ८।१।५
यथेक्षुरससंव्याप्ता शर्करा वर्तते तथा । अद्वयब्रह्मरूपेण व्याप्तोऽहं वै जगत्त्रयम् आ. प्र. १४
यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः कुण्डिको. २८
यथेच्छसि तथा कुरु भ. गी. १८.६३
यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति छांदो. ५।१०।५
यथेतमेत्य जघनेनाग्निमासीनो वꣳशं जपति बृह. ६।३।६
यथेन्द्रगोपो यथाऽग्न्यर्चिर्यथा पुण्डरीकं...वा अस्य श्रीर्भवति बृह. २।३।६
यथेमे दंशमशकादयस्तृणवनस्पतयोद्भूतप्रध्वंसिनः मैत्रा. १।५
यथेयंनप्राक्त्वत्तःपुराविद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रियस्यैव प्रशासनमभूत् छांदो. ५।३।७
यथेयं न प्राक् त्वत्तु पुरा विद्या ब्राह्मणान्...(मा. पा.) छां. उ. ५।३।७
यथेयं विद्येतः पूर्वं न कस्मिꣳश्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि बृह. ६।२।८
यथेरिणे बीजमुप्तं नरेन्द्र नास्य वप्ता लभते बीजभागम् । एवं श्राद्धमप्रतिष्ठितं विनश्यति इतिहा. २९
यथेष्टधारणा-(णं वा) द्वायोरनलस्य प्रदीपनम् । नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् [यो. चू. ९९+ शाण्डि. १।५।८
यथेष्टधारणाद्वायोः सिद्ध्येत्केवलकुम्भकः । केवले कुम्भके सिद्धे रेचपूरविवर्जिते । न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते १ यो. त. ५०
यथेष्टमेव वर्तेत यद्वा योगी महेश्वरः। अभ्यासभेदतो भेदः फलं तु सममेव हि १ यो. त. १११
यथेह क्षुधिता बाला मातरं पर्युपासते । एवꣳ सर्वाणि भूतान्यग्निहोत्रमुपासते छांदो. ५।२४।५
यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते । न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः अद्वैतो. ५
यथैतत्कूबरस्तक्ष्णापोज्झितो नेङ्गते मनाक् । परित्यक्तोपमात्मानस्तद्वद्देहो विरोचते छाग. ६।४
यथैतं काष्ठभारमानद्धमनुपश्यामस्तथैवावशो भूस्थः स्पन्दते छाग. ६।१

यथैतावेद्स्याष्टावुपनिषदोभवन्ति	...
यथैधांसि समिद्धोऽग्निः	भ. गी. ४।३७
यथैवमवमन्यन्ते जनाः...तथा युक्तश्चरेद्योगी	ना. प. ६।१०
यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलङ्कृते साध्वलंकृतो भवति...एवमेवायमस्मिन्नन्धेऽन्धो भवति	छांदो. ८।९।१
यथैव तु महासिंहः कुञ्जरो वाऽथदुर्मदः...परिचीयमानः कालेन वशत्वं चैव गच्छति । परिचीयमानयोगस्य वशत्वं याति मारुतः	योगो. ८
यथैव तु स्मोपसन्ना अथानसूयवो यथोपश्रद्धिन इति	छाग. ३।५
यथैव तेन न गुरुर्भोजनीयस्तथैव चान्नं न भुनक्ति श्रुतं तत्	शाट्याय. ३५
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् । यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः	यो. शि. ४।२१
यथैव निश्चितः कालः सूर्यचन्द्रनिबन्धनात् । आपूर्य कुम्भितो वायुर्वह्निर्नो याति साधके	यो. शि. १।१२०
यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधातम् । तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः	श्वेता. २।१४
यथैव लोहकाराणां भस्त्रा वेगेन चाल्यते । तथैव स्वशरीरस्थं चालयेत्पवनं शनैः	योगकुं. १।३४
यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः । तथैव रामबीजस्थं जगदेतच्चराचरम् [रामर.५।१०+	रा.पू.ता.२।२
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले । पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि	यो. शि. ४।१९
यथैव शून्यो वेतालो गन्धर्वाणां पुरं यथा । यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः	यो. शि. ४।१६
यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि	वा. र. ४।२०
यथैवापाङ्कतः सेतुः प्रवाहस्य निरोधकः । तथा शरीरगा छाया ज्ञातव्या योगिभिः सदा	वराहो. ५।४१
यथैवासावितश्चेतोऽमुतश्चामुतश्च सम्प्रद्रवत इवोपशुष्यत इवोपस्कन्दमभिगृह्णीताभियातयेदेव	छाग. ५।२
यथैवासौ प्रतिसृत्वरेण समः समेन क्रीडेदेवं हैष संक्रीडतीति	छाग. ५।३
यथैवासौ राजानं वा राजपुरुषं वा निलयनं प्रापयेदेवं हैवैष यन्ता (रं) निलयनं प्रापयतीति	छाग. ५।३
यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ च एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ च	छांदो. ८।८।३
यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि	महो. ५।१८४
यथैवेशस्तथा गुरुः । पूजनीयो महाभक्त्या	यो. शि. ५।५८
यथैवेह बीजस्याङ्कुरा वाऽथ धूमार्चिर्विस्फुलिङ्गा इवाग्नेश्चेत्यत्रोदाहरन्ति	मैत्रा. ६।३१
यथैवैष कपालाष्टकं सन्नयति तमेव स्तन इव लम्बते वेददेवयोनिः	ब्रह्मो. १
यथैवैष देवदत्तो यष्ट्याऽपि ताड्यमानो नयतीत्येवमिष्टापूर्तैः शुभाशुभैर्न लिप्यते	ब्रह्मो. १
यथैवैषा वन्ध्यैवैषा रतिमात्रं फलमस्या वृत्तच्युतस्येव	मैत्रा. ७।९
यथैवोत्पलनालेन तोयमाकर्षयेन्नरः। तथैवोत्कर्षयेद्वायुं योगी योगपथे स्थितः	ध्या. बि. ३८
यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात् [बृह.२।४।२	+४।५।३
यथैवोपसृत्वरो वार्धिरितर्यगुल्ललन्तीभिरिव वीचीभिः शफरीभि-	

रेवोपस्कन्दमुत्प्लवेदेवं हैवैषोऽभिसृत्वराणामेव धुर्याणां चंक्रमतामरीणामुत्प्लवतीति	छाग. ९।३
यथैवैष देवदत्तो यष्ट्या च ताड्यमानो नयति, एवमिष्टापूर्तकर्म शुभाशुभेनै लिप्यते	परब्र. १
यथैषा जन्मदुःखेषु न भूयस्त्वां नियोक्ष्यति । स्वात्मनि स्वपरिस्पन्दैः स्फुरत्यच्छैश्चिदर्णवः	महो. ५।११७
यथैषा देवतैवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति	बृ. उ. १।५।२०
यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोधिकृते नायात्यस्मिञ्छरीरे	प्रश्नो. ३।३
यथैषा वन्ध्यैवैषा रतिमात्रं फलमस्या वृत्तच्युतस्येव नारम्भणीया	मैत्रा. ७।९
यथोक्तं पर्युपासते	भ. गी. १२।२०
यथोदकं गिरौ सृष्टं समुद्रेषु विधावति । एवं धर्मान्पृथक्पश्यंस्तामेवानुविधावति	गुह्यका. ४३
यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति । एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति	कठो. ४।१४
यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम	कठो. ४।१५
यथोदके तोयमनुप्रविष्टं तथात्मरूपो निरुपाधिसंस्थितः	पैङ्गलो. ४।११
यथोन्मेषो जायते तथा चिरंतनातिसूक्ष्मवासनाबलात् पुनरविद्याया उदयो भवति	त्रि. म. ना. ४।६
यथोपपन्नचातुर्वर्ण्यभैक्षाचर्यं चरन्त आत्मानं मोक्षयन्त इति	आश्रमो. ४
यथोपयातमात्मैवाभिचक्षत इति	आर्षे. ५।३
(अथ) यथोर्णनाभिस्तन्तुनोर्ध्वमुत्क्रान्तोऽवकाशं लभतीत्येवं वाव खल्वसावभिध्यातोमित्यनेनोर्ध्वमुत्क्रान्तः स्वातंत्र्यं लभते	मैत्रा. ६।२२
यथोर्णनाभिः सूत्राणि सृजत्यपि गिलत्यपि...उत्पद्यन्ते विलीयन्ते तथा तस्यां जगत्यपि	गुह्यका. २६
यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्	मुंड. १।१।७
यथोल्बेनाऽऽवृतो गर्भः	भ. गी. ३।३८
यदक्षरं नारसिंहमेकाक्षरं तद्भवति	नृ. पू. ५।७
यदक्षरं पञ्चविधं समेति युजो युक्ता अभियत्संवहन्ति	१ ऐत. ३।८।१
यदक्षरंपरंब्रह्म तत्सूत्रमितिधारयेत् [परब्र. ७+	ब्रह्मो. ६ ना. प. ३।७७
यदक्षरं प्राजापत्यं सौम्यं सूक्ष्मं ग्राह्यं ग्राह्येण भावं भावेन सौम्यं सौम्येन सूक्ष्मं सूक्ष्मेण ग्रसति तस्मै महाग्रासाय नमः	चतुर्वे. ८
यदक्षरं वेदविदो वदन्ति	भ. गी. ८।११
यदक्षरादक्षरमेति युक्तं युजो युक्ता अभियत्संवहन्ति	१ ऐत. ३।८।२
यदग्निर्ज्वलत्यथैतन्म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो गच्छति	कौ. त. २।१२
यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्यनत्प्रथमो विदांचकार ब्रह्मेति	केनो. ४।२
यदग्निं न विन्देदप्सु जुहुयादापो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा	ना. प. ३।७७
यदग्नेरभिवर्तनानि [छाग. २।२+	४।२
यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः सन्तिष्ठते	सहवै. १४
यदग्ने चानुबन्धे च	भ. गी. १८।१९
यदग्ने वेदशास्त्राणि तुलसीं तां नमाम्यहम्	तुलस्यु. ९

यद्ज्ञानाद्भवेद्द्वैतमितरत्तत्प्रणश्यति	यो. शि. ४।९
(अथ) यदतः परो दिवा ज्योतिर्दीप्यते विश्वतः पृष्ठेषु..	छांदो. ३।१३।७
यदत्र षष्ठं त्रिशतं सुवीरं यज्ञस्य गुह्यं नवनावमाय्यम् । दशपञ्च त्रिशतं यत्परं च तन्मे मनः शिवसङ्कल्पमस्तु	२ शिवसं. ७
यदत्रैनो अवतत्सुवामि	सहवै. ९
यदथर्वाङ्गिरसो मधोः कूल्या यद्ब्राह्मणानितिहासान्पुराणानि कल्पान्गाथानाराशंसीर्मेदसः कुल्याअस्यपितॄन्त्स्वधाअभिवहंति	सहवै. १४
यदथर्वाङ्गिरसो मध्वाहुतिभिः.... तद्देवांस्तर्पयति, त एनं तृप्ता आयुषा...ब्रह्मवर्चसान्नाद्येन च तर्पयन्ति	सहवै. १४
यददीव्यं नृणामहं बभूवादित्सन्वासंजगरजनेभ्यः । अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुंचताम्	सहवै. ५
(अथ) यदनाकाशायनमित्याचक्षते ब्रह्मचर्यमेव तत्	छांदो. ८।५।३
यदनादि निरामयम् (ब्रह्म)	महो. २।६८
यदनादिभूतं यदनन्तरूपं यद्विज्ञानरूपं यद्देवाः सर्वे ब्रह्म ज्येष्ठमुपासते	गणेशो. ४।१
यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् [रामो. १।१+तारसा.१।१+	जाबालो. १
यदनुक्तमनिष्पन्नं दीपकं तेजसामपि	अ. पू. ३।२२
यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते	छांदो. १।१।८
(अथ) यदनुब्रूते तेन ऋषीणां (लोकप्राप्तिः)	बृह. १।४।१६
यदनुष्टुभैव वा एष उपवसंस्तन्न हि सर्वत्रसर्वदासर्वात्मासन्सर्वमत्ति	नृसिंहो. ४।२
यदनेकमेकं नानावर्णं नानारूपं नानाशब्दं...	शौनको. १।५
यदन्तरा पितरं मातरं चेति नाहमत एकं च न वेद	बृह. ६।२।२
यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरंवाजिहिंसिम [सहवै.१० [+तै. सं. १।८।५।३+	अथर्व. ६।१२०।१ तै. आ. २।६।२
यदन्तरिक्षं यदाशसाऽतिक्रामामि	सहवै. ४
यदन्तर्नोऽसाविह प्राहयात्	छाग. ३।५
यदन्तः पूर्णमिवगत्य पूर्णः	गुह्यका. ४६
यदन्ति यच्च दूरके [३ऐत.२।४।४+ [ऋ. म. ९।६७।२१	वनदु. १२९
यदन्नमग्निर्बहुधा विराद्धि रुद्रैः प्रजग्धं यदि वा पिशाचैः । सर्वं तदीशानो अभयं कृणोतु	प्रा. हो. १।६
यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम्	सहवै. १०
यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन्	सहवै. १०
यदन्नेनातिरोहति [चित्यु.१२।१+ [+ऋ.मं.१०।९०।२+	पु. सू. २ वा. सं. ३१।२
यदन्यद्देवेभ्यश्च प्राणेभ्यश्च तत्सत्	कौ. त. १।६
यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्	महाना. ५।१८
यदपि बहुधाक्षीरन्न किञ्च प्रतिपद्यत इति तन्मे ब्रह्मेति	आर्षे. ७।१
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिव.. [१ शिवसं. २+	२ शिव. सं. ३
यदभावनमास्थाय यदभावस्य भावनम् । तद्यथा वस्तुदर्शित्वं तदचित्तत्वमुच्यते	अ. पू. ४।५०
यदमीषामदःप्रियम्,तदेतूपमामभि..	चित्यु. १५।२
यदमुत्र तदन्विह	कठो. ४।१०
यदमुष्मिन्नादित्ये तपत्यग्नौ चाधूमके...यःपचत्यन्नमित्येवं ह्याह	मैत्रा. ६।१७
यदमुष्मिन्नादित्येऽथ सोमेऽग्नौ विद्युति विभात्यथ खल्वेनं दृष्ट्वाऽमृतत्वं गच्छति	मैत्रा. ६।२४
यदमूर्तं तत्सत्यं तद्ब्रह्म	मैत्रा. ६।३
यदयमात्माऽनेन ह्येतत्सर्वं वेद	बृह. १।४।७

यदयमात्मामायामात्रएषएवोमः..	नृसिंहो. ५।१
यदयमेक इवैव पवते	बृह. ३।९।९
यदयं शवशयितमशायिष्टेति	छाग. ४।२
(अथ) यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत्	छांदो. ८।५।३
यदर्चिमद्यदणुभ्योऽणु च यस्मिँल्लोका निहिता लोकिनश्च	मुण्ड. २।२।२
यदर्थप्रतिभानंतन्मनइत्यभिधीयते	महो. ४।५१
यदर्पयेद्गुरुः किञ्चित्तत्रस्थः पुरतः स्थितः । पाणिद्वयेन गृह्णीयात् स्थापयेत्तच्च सुस्थिरम्	शिवो. ७।११
यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मोक्ष्यध्व इति स एतैर्जुहवुः	सहवै. ११
यदल्पं तन्मर्त्यँ स भगवः कस्मिन्प्रतिष्ठित इति	छांदो. ७।२४।१
यदवश्यं पराधीनैस्त्यजनीयं शरीरकम् । कस्मात्तेन विमूढात्मा न साधयति शाश्वतम्	शिवो. ७।१२१
यदवस्फूर्जति सोनु वषट्कारो वायुरात्मा	सहवै. १८
(अथ) यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इति	छांदो. ३।१५।६
(अथ) यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इति	छांदो. ३।१५।५
(अथ) यदवोचँ स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इति	छांदो. ३।१५।७
यदश्नाति तद्धविः [त्रि. प. ४+	महाना. १८।१०
(अथ) यदश्नाति यत्पिबति यद्रमते तदुपसदैवेति	छांदो. ३।१७।२
यदश्नीयाद्व्रतोमक्षी भवेत	भस्मजा. २।१०
यदश्रुमापातयेत्प्रजां विच्छिन्द्यात्	कठरु. २
यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्	बृह. १।२।७
यदष्टाक्षरपदा तेन गायत्री	अव्यक्तो. ६
यदसक्तं समं स्वच्छं स्थितं तत्तुर्यमुच्यते	अ. पू. ५।१०७

यदसाधु तदसामेति	छांदो. २।१।१
यदसाधु भवत्यसाधु बतेत्येव तदाहुः	छांदो. २।१।३
यदसुरान्तकचक्रं यत्सत्यात्मा तत् षष्ठस्य	नृ. षट्च. ६
यदस्ति तदस्ति यन्नास्ति नास्ति तत्	स्वसंवे. २
यदस्ति सन्मात्रं यद्विभाति चिन्मात्रं...तदेतत्सर्वाकारा महात्रिपुरसुन्दरी	बह्वृचो. २
यदस्तीह तदेवास्ति विज्वरो भव सर्वदा । यथाप्राप्तानुभवतः सर्वत्रानभिवाञ्छनात्	महो. ६।१४
यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति	बृह. ३।८।१२
यदस्मिन्निदँ सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति	बृह. ३।९।९
यदस्य गृहेषु श्वापदा वयाँस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोकः	बृह. १।४।१६
यदस्य त्वं यदस्य च देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्	केनो. २।१
यदस्य प्रथयश्चक्रौ युगमष्टौका (रु) त्रिका	छाग. ७।१
यदस्यविज्ञानंतज्जुहोति [त्रि.सू.४+	म.ना.१८।१०
यदस्याग्रं तच्छान्तमशब्दमभयमशोकमानन्दं.. उपासीत..	मैत्रा. ६।२३
यदस्यान्तरं सूत्रं तद्ब्रह्म	ब्र. मा. २
यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् । तेन देवनिकायानां स्वधामानि प्रपद्यते	मैत्रा. ६।३०
यदहङ्कारमाश्रित्य	भ. गी. १८।५९
यदहमायतनमस्मि त्वं तदायतनमसीति	छांदो. ५।१।१४
यदहरेव विरजेत्तदहरेव प्रव्रजेत् [ना. प. .३।७७+प.हं.प.२+	जाबालो. ४+ याज्ञव. १
यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति	बृह. १।५।२
यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसि	छांदो. ५।१।१३

यदहं स त्वं ममैव रूपेण न्यूङ्खयिष्यन्ति त्वामिति	शौनको. ३।३
यदहं सर्वं भवानि यद्गायत्री वै पुरोगास्तत्किं मे स्यादिति	शौनको. २।२
यदहोरात्राभ्यां पापं करोति स तद्वृङ्क्ते	कौ. त. २।७
यदह्नात् कुरुते पापं तदह्नात् प्रतिमुच्यते	महाना. ११।६
यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना । अहस्तदवलुम्पतु	महाना. ११।३,४
यदा कर्ममार्गे रतिरसतां ते आसुरा भवन्ति	सामर. २
यदा कर्मसु काम्येषु स्त्रियः स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने	छांदो. ५।२।९
यदाक्रन्दितमिव निष्क्रन्दितमिव सा मित्रहूः	संहितो. १।२
यदा चक्रं यदात्मा तत्प्रथमस्य यत्सुचक्रं यत्प्रियात्मा तद्द्वितीयस्य ...यदसुरान्तकचक्रं यत्सत्यात्मा तत् षष्ठस्य	नृ. षट्च. ६
यदा चन्द्रोऽस्तमेति वायुमेवाप्येति	छांदो. ४।३।१
यदा च बाह्यमार्गेण जिह्वा ब्रह्मबिलं व्रजेत् । तदा ब्रह्मार्गलं ब्रह्मन्दुर्भेद्यं त्रिदशैरपि	योगकुं.२।४०
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति	श्वेता. ६।२०
यदाज्यं यन्मरुत्वतीयं [छाग.२।२+	४।२
यदा तदैतद्बीजं यन्मध्यमं तां नारसिंहगायत्रीं..	नृ. षट्च. ३
यदा तमस्तत्र दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः	श्वेता. ४।१८
यदा तमस्तत्र दिवा न रात्रिर्न सन्न चासद्भगवत्येव गुह्या	गुह्यका. ६।१
यदा तालुमूले गाढतमो दृश्यते, तदभ्यासादखण्डमण्डलाकारज्योतिर्दृश्यते	मं. ब्रा. २।२
यदा तु ध्यायते मन्त्रं गात्रकम्पोऽभिजायते	यो. शि. १
यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः । जायन्ते योगिनो देहे	१ यो. त. ४४
यदा तु राजयोगेन निष्पन्ना योगिभिः क्रिया । तदा विवेकवैराग्यं जायते योगिनो ध्रुवम्	१ यो. त. २९
यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् । तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत्	ना. प. ३।१८
यदा ते मोहकलिलं	भ. गी. २।५२
यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् । अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपापैः	श्वेता. २।१५
यदाऽऽत्मनाऽऽत्मानमणोरणीयांसं द्योतमानं मनःक्षयात्पश्यति तदाऽऽत्मनाऽऽत्मानं दृष्ट्वा निरात्मा भवति	मैत्रा. ६।२०
यदात्मनो न विजानीथस्तन्मे प्रब्रूतं	छांदो. ८।८।१
यदात्माशुचिर्यद्देशः समृद्धिर्दैवतानि, य एवंविद्वान्...स्वाध्यायमधीते सर्वांल्लोकाञ्जयति	सहवै. १९
यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता	अ. पू. २।३५.
यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः । आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यति	प्रश्नो. १०
यदादानं पदार्थस्य वासना सा प्रकीर्तिता [अ.पू. ४।४६+	मुक्तिको. २।५७
यदादानेन सह संयुज्यते तदा पश्यति देवलोकान्देवान्स्कन्दं जयन्तं चेति	सुबालो. ४।१
यदादित्यगतं तेजः	भ. गी. १५।१२
यदादित्यस्य मध्ये उदित्वा मयूखे भवतः	मैत्रा. ६।३५
यदादित्यस्य मध्येऽमृतं...एतद्ब्रह्म	मैत्रा. ६।३५
यदादित्यस्य मध्ये यजुर्दीप्यति	मैत्रा. ६।३५

यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्	छांदो. ६।४।२
यदादिशेद्गुरुः किञ्चित्तत्कुर्यादविचारतः	शिवो. ७।३०
यदादेवदत्तस्य द्रव्यादिविषयाजायंते	गर्भो. २
यदा द्रष्टाऽनुपश्यति	भ. गी. १४।१९
यदा न कस्यचन वेद, हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते	बृह. २।१।१९
यदा न कुरुते भावं सर्वभूतेषु पापकम् । कर्मणा मनसा वाचा तदा भवति भैक्षभुक्	ना. प. ३।२३
यदा न भाव्यते किञ्चिन्निर्वासनतयाऽऽत्मनि । बालमूकादिविज्ञानमिव च स्थीयते स्थिरम् ॥ तदा जाड्यविनिर्मुक्तमसंवेदनमाततम् । आश्रितं भवति प्राज्ञो यस्माद्भूयो न लिप्यते	अ. पू. ४।६१
यदा नभाव्यते किञ्चिद्धेयोपादेयरूपि यत् । स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते	अ. पू. ४।४७
यदा न भाव्यते भावः क्वचिज्जगति वस्तुनि । तदा हृदम्बरे शून्ये कथं चित्तं प्रजायते	अ. पू. ४।४९
यदा न मनुते मनः, अमनस्ता तदोदेति	अ. पू. ४।४८
यदा न लभते हेतूनुत्तमाधममध्यमान् । तदा न जायते चित्तं हेत्वभावे फलं कुतः	अ. शां. ७६
यदा न लीयते चित्तं न च विक्षिप्यते पुनः । अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा	अद्वैतो. ४६
यदानुध्यायते मंत्रं गात्रकम्पोऽथ जायते	यो. शि. १।७०
यदाप उच्छुष्यन्ति वायुमेवापियन्ति । वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवतम्	छांदो. ४।३।२
यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् [कठो.६।१०+	मैत्रा. ६।३०
यदा पश्यति चात्मानं केवलं परमार्थतः । मायामात्रं जगत्कृत्स्नंतदाभवतिनिर्वृतिः	जा. द. १०।१२
यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति	मुण्ड. ३।१।३
यदापस्स्रोतस्स्वरण्योरिवाग्निः । एवमात्मात्मनि जायते	इतिहा. ४९
(सः) यदाऽपानेन सह संयुज्यते तदापश्यतियक्षराक्षसगन्धर्वान्	सुबालो. ४।२
यदा पिङ्गलया प्राणः कुण्डलीस्थानमागतः । तदा तदा भवेत्सूर्यग्रहणं मुनिपुङ्गव	जा. द. ४।४७
(अथ) यदा प्रजाः सृष्टा न जायन्ते प्रजापतिः कथं न्विमाः प्रजाः सृजेयमिति चिन्तयन्नुपमितीमामृचं गातुमुपाक्रामत्	अव्यक्तो. ७
यदा प्रस्पन्दते प्राणो नाडी संस्पर्शनोद्यतः । तदा संवेदनमयं चित्तमाशु प्रजायते	अ. पू. ४।४२
यदा भारं तन्द्रयते स भर्तुम् । निधाय भारं पुनरस्तमेति । तमेव मृत्युममृतं तमाहुः	चित्सु. १४।४
यदाभासेन रूपेण जगद्भोज्यं भवेत तत् । मानवः स्वात्मना भातं भक्षितं भवति ध्रुवम्	पा. ब्र. ४७
यदा भूतपृथग्भावं	भ. गी. १३।३१
यदा मनसि चैतन्यं भाति सर्वत्रगं सदा । योगिनोऽव्यवधानेन तदा सम्पद्यते स्वयम् [अ. पू. ५।७८+	जा. द. १०।५

यदा मनसि वैराग्यं जातं सर्वेषु वस्तुषु । तदैव सन्न्यसेद्विद्वानन्यथा पतितो भवेत्	मैत्रे. २।१९
यदा मनसि सञ्जातं वैतृष्ण्यं सर्ववस्तुषु । तदा सन्न्यासमिच्छेत पतितः स्याद्विपर्यये	ना. प. ३।१२
यदा मन्मथकलादिर्भवति तदा निष्कीलिता भवेत्	कामराज. १
यदा यत्र यथा यस्मात्स्थिरं भवति मानसम् । तदा तत्र तथा तस्मान्न तु चाल्यं कदाचन	अमन. २।६९
यदा यदा परिक्षीणा पुष्टा चाहंकृतिर्भवेत् ।...प्रवर्तन्ते रुगादयः	यो. शि. १।३६
यदा यदा हि धर्मस्य	भ. गी. ४।७
यदा यात्यमनीभावं तदा तत्परमं पदम्	मैत्रा. ६।३४
यदा यात्युन्मनीभावस्तदा तत्परमं पदम् । यत्र यत्र मनो याति तत्र तत्र परं पदम्	पैङ्गलो. ४।२१
यदाऽलम्बुद्धिर्भवेत्तदा कुटीचको वा बहूदको वा...सर्वमप्सु विसृज्याथ जातरूपधरश्चरेत्	प. हं. प. ८
यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने । तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेच्छ्रद्धया हुतम्	मुंड. १।२।२
यदा वाव ते स्मरेयुरथ शृणुयुरथमन्वीरन्नथ विजानीरन् स्मरेण वै पुत्रान्विजानाति स्मरेण पशून्स्मरमुपास्वेति	छांदो. ७।१३।१
यदा विनियतं चित्तं	भ. गी. ६।१८
यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति	छान्दो. ७।२१।१
यदा वै चेतयतेऽथ सङ्कल्पतेऽथ मनस्यथ वाचमीरयति	छान्दो. ७।५।१
यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति	छान्दो. ७।२०।१
यदा वै पुरुषोऽस्माल्लोकात्प्रैति, स वायुमागच्छति	बृह. ५।१०।१
यदा वै बहिर्विद्वान्मनो नियम्येन्द्रियार्थांश्च प्राणोनिवेशयित्वा निस्सङ्कल्पस्ततस्तिष्ठेत्	मैत्रा. ६।१९
यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति	छांदो. ७।१८।१
यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्	छान्दो. १।१।६
(सः) यदा वैरम्भेण सह संयुज्यते तदा पश्यति दृष्टं च श्रुतं च भुक्तं चाभुक्तं च सच्चासच्च सर्वं पश्यति	सुबालो. ४।२
यदा वै विजानाति, अथ सत्यं वदति नाविजानन्सत्यं वदति	छान्दो. ७।१७।१
यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते	छान्दो. ७।१९।१
यदा वै सङ्कल्पयतेऽथ मनस्यथ वाचमीरयति	छान्दो. ७।४।१
यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वाकरोति सुखमेव लब्ध्वा करोति	छान्दो. ७।२२।१
[सः] यदा व्यानेनसहसंयुज्यते तदा पश्यति देवांश्च ऋषींश्च	सुबालो. ४।२
यदा शेते रुद्रस्तदा संहरते प्रजाः	बटुको. २७
यदाऽस्य षोडशीकस्य सार्धत्रिकोटीर्जपतितदाब्रह्महत्यांतरति	कलिसं. ५
यदा सङ्क्षीयते चित्तमभावात्यन्तभावनात् । चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा	अ. पू. १।२३
शक्रेण हैमं यक्षराजेन विश्वेदेवै रौप्यं वसुभिः कांस्यकं च । यद्दारुकूटं वायुना पार्थिवं तदश्विभ्यामासीत्स्फाटिकं पाशिनाथ	सि. शि. २२
शङ्करो भगवानाद्यो ररक्ष सकलाः प्रजाः	शरभो. १६
शङ्कुना सर्वाणिपर्णानि संतृण्णान्येवमोङ्कारेण सर्वावाक्सन्तृण्णोङ्कार एवेद९ सर्वम्	छांदो. २।२३।३
शङ्खचक्रगदाखड्गधारिणं वनमालिनम् ।...कर्मणा मनसा वाचा संस्मरेत्प्रजपेत्सुधीः	ना.पू.ता. ४।१३
शङ्खचक्रगदापाणे द्वारकानिलयाच्युत । गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् [वासुदे.३	गोपीचं. ३
शङ्खचक्रमहामुद्रापुस्तकाढ्यं चतुर्भुजम् । सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे	हयग्री. ४
शङ्खचक्रोर्ध्वपुण्ड्रादिधारणं स्मरणं हरेः । तदीयाराधनं चैव भक्तिर्बहुविधा स्मृता	सुदर्श. ८

शङ्खतोयेन मूलेन भस्मना मिश्रणं भवेत्। योजितं चन्दनेनैव वारिणा भस्मसंयुतम्। चन्दनेन समालिम्पेज्ज्ञानदं चूर्णमेव तत्	बृ. जा. ४।९
शङ्खदुन्दुभिनादं च न शृणोति कदाचन (मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः)	ना. बि. ५२
शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः [बृह.२।४।८+	४।५।५
शङ्खं चक्रं च संसिद्धिं बिन्दुं च सर्वमूर्धनि	कृष्णो. २१
शङ्खं दध्मौ प्रतापवान्	भ. गी. १।१२
शङ्खान्दध्मुः पृथक्पृथक्	भ. गी. १।१८
शङ्खिनी चैव गान्धारी तदन्तरयोः स्थिते। उत्तरे तु सुषुम्नाया इडाख्या निवसत्यसौ	वराहो. ५।२६
शङ्खिनी नाम या नाडी सव्यकर्णान्तमिष्यते। गान्धारा सव्यनेत्रान्ता प्रोक्ता वेदान्तवेदिभिः	जा. द. ४।२२
शङ्खिन्याश्चन्द्रमास्तद्वत्पयस्विन्याः प्रजापतिः	जा. द. ४।३८
शठे शठ इव स्थितः	अ. पू. २।२९
शठो नैष्कृतिकोऽलसः	भ.गी. १८।२८
शतकृत्वः प्रयुक्ताशतपर्वणावज्रेण सम्मिता सर्वाꣳ ल्लोकानभिजयति	सन्ध्यो. २
शतरुद्रियेणेत्येतान्येव ह वा अमृतस्य नामानि	जाबालो. ३
शतरुद्रेण मन्त्रेण भस्मोद्धूलितविग्रहाः। निर्धूतरजसः सर्वे तत्क्षणाच्च वयं मुने	बृ. जा. ६।६
शतशो गोपभार्या वेदऋचः	सामर. ३२
शतशोऽथ सहस्रशः	भ. गी. ११।५
शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि (चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुद्ध्यति)	जा. द. ४।५४
शतं कुलानां प्रथमं बभूव तथा पराणां त्रिशतं समग्रम्। एते भवन्ति सुकृतस्य लोके येषां कुले संन्यसतीह विद्वान्	शाट्याय. ३०
शतंचदशचैकश्च सहस्राणिचविंशतिः	छांदो. ७।२६।२
शतं च नव शाखासु यजुषामेव जन्मनाम्। साम्नः सहस्रशाखाः स्युः पञ्चशाखा अथर्वणः	सीतो. १६
शतं च दश चैकं च सहस्राणि च...(मा.पा.)	छां.उ. ७।२६।२
शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति	कठो. ६।१६
[छां. उ. ८।६।६+	यो. शि. ६।४
शतं नियुतः परिवेद विश्वा विश्ववारः	चित्त्यु. ११।३
शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भे एवैतच्छयानो वामदेव एवमुवाच	२ ऐत. ५।५
शतं मालाहस्ताः शतमाञ्जनहस्ताः शतं चूर्णहस्ताः शतं वासोहस्ताः शतं कणाहस्तास्तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति	कौ. ब. १।४
शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बलीभवत्यथोत्थाता भवति	छांदो. ७।८।१
शतं शरद आयुषो जीव पुत्र	कौ. त. २।११
शतꣳ शता अस्य युक्ता हरीणाम्	चित्त्यु. ११।७
शतꣳ शुक्राणि यत्रैकं भवन्ति, सर्वे वेदा यत्रैकं भवन्ति, सर्वे होतारो यत्रैकं भवन्ति, स मानसीन आत्मा जनानाम्	चित्त्यु. ११।१
शतꣳ सहस्राणि प्रयुतानि नाव्यानाम्	चित्त्यु. ११।१०
शताक्षरी परमा विद्या त्रयीमयी साष्टार्णा त्रिपुरा परमेश्वरी	त्रि. ता. १।४
शतायुषः पुत्रपौत्रान्वृणीष्व बहून् पशून्हस्तिहिरण्यमश्वान्। भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि	कठो. १।२३

शतारं शतपत्राढ्यं विकीर्णाम्बुजकर्णिकम् । तत्रार्कचन्द्रवह्नीनामुपर्युपरि चिन्तयेत्	ध्या. बि. ३४
शताह्वशतशरः शतशक्रऋजीषिणाम् । शतं ब्रह्म तपस्विनां कूपोऽरण्यस्य तिष्ठति	इतिहा. १९
शतैर्महाप्रस्थैरखण्डैस्तण्डुलैरभिषिच्य चंद्रलोककामश्चंद्रलोकमवाप्नोति	भस्मजा. २।१२
शत्रून्निहत्य गुरुषट्कगणान्निपाताद्गन्धद्विपो भवति केवलमद्वितीयः	वराहो. २।६५
शनिराहुकेतूरगरक्षोयक्षनरविहगशरभेभादयोऽधस्तादुद्यन्ति	मैत्रा. ७।६
शनैरेवं प्रकर्तव्यमभ्यासं युगपन्न हि । युगपद्वर्तते यस्य शरीरं विलयं व्रजेत्	योगकुं. २।३९
शनैः पिङ्गलया तत्र द्वात्रिंशन्मात्रया पुनः । प्राणायामो भवेदेवं ततश्चैवं समभ्यसेत्	जा. द. ६।६
शनैः शनैरुपरमेत्	भ. गी. ६।२५
शनैः शनैर्यदा प्राणस्तुन्दसन्धि निगच्छति । तुन्ददोषं विनिर्धूय कर्तव्यं सततं शनैः	योगकुं. १।५०
शनैः समस्तमाकृष्य हृत्सरोरुहकोटरे । प्राणापानौ च बद्ध्वा तु प्रणवेन समुच्चरेत	ध्या. बि. १००
शनैः सुमथनं कुर्याद्भ्रूमध्येन्यस्य चक्षुषी । षण्मासं मथनावस्था भावेनैव प्रजायते	योगकुं. २।४६
शबलाच्छ्यामं प्रपद्ये	छांदो. ८।१३।१
शब्द एक आकाशस्य (गुणः)	शारीरको. ४
शब्दकाललयेन दिवारात्र्यतीतो भूत्वा सर्वपरिपूर्णज्ञानेनोन्मन्यवस्थावशेन ब्रह्मैक्यं भवति	मं. ब्रा. २।४
शब्दमायावृतो यावत्तावत्तिष्ठति पुष्करे(ले)। भिन्ने तमसि चैकत्वमे(क एवा-)कमेवानुपश्यति	ब्र. बि. १५
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति [मैत्रा. ६।२२+	ब्र. बि. १७ त्रि. ता. ५।१७
शब्दब्रह्मातिवर्तते	भ. गी. ६।४४
शब्दब्रह्माहम् । क्रियायोगोऽहम् । ब्रह्माहम् । विष्णुरहम् । सौरोऽहम् । ब्राह्मोऽहम्	अद्वै. भा. १
शब्दवानाकाशः शब्दाकाशाभ्यां भिन्नः	गोपालो. १।४
शब्दस्पर्शमया येऽर्था अनर्था इव ते स्थिताः । तेषां सक्तस्तु भूतात्मा न स्मरेच्च परं पदम्	मैत्रे. १।५
शब्दस्पर्शरसरूपगन्धवर्जितो निर्विकल्पो निराकाङ्क्षः सर्वव्यापी सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि	१ आत्मो. ३
शब्दस्पर्शरूपरसगन्धा अग्निकार्यज्ञानेन्द्रियविषया अत्राश्रिताः	त्रि. ब्रा. १।४
शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा	महाना. १४।१२
शब्दस्पर्श-रूप-रसाश्चापां गुणाः	शारीरको. ४
शब्दस्पर्शरूपरसगन्धास्तद्विषयाः	पैङ्गलो. २।४
शब्दस्पर्शरूपरसगन्धाः, पञ्चतन्मात्राः, पञ्चपुष्पबाणाः, मन इक्षुधनुः	भावनो. ६
शब्द-स्पर्श-रूप-रस-गन्धाः पृथिवीगुणाः	शारीरको. ४
शब्दस्पर्शरूपरसगन्धाः सुखदुःखहेतवः	सर्वसारो. ५
शब्द-स्पर्श-रूपाण्यग्निगुणाः	शारीरको. ४
शब्दस्पर्शस्वरूपाभ्यां सङ्घर्षाज्जन्यतेऽनलः	महो. ५।१४९
शब्दस्पर्शादयो येऽर्था अनर्था इव ते स्थिताः । येष्वासक्तस्तु भूतात्मा न स्मरेच्च परं पदम्	मैत्रा. ४।२
शब्द-स्पर्शाविति वायुगुणौ	शारीरको. ४
शब्दं बधिरवच्छृणु । काष्ठवत्पश्य वै देहं प्रशान्तस्येति लक्षणम्	अ. ना. १९
शब्दं सर्वमसद्विद्धि स्पर्श सर्वमसत्सदा	ते. बि. ३।५७
शब्दः खे पौरुषं नृषु	भ. गी. ७।८

शब्दाक्षरं परं ब्रह्म यस्मिन्क्षीणे यदक्षरम् । तद्विद्वानक्षरं ध्यायेद्यदिच्छेच्छान्तिमाप्नुयात्	ब्र. बि. १६
शब्दादिविषयान् पञ्च मनश्चैवातिचञ्चलम् । चिन्तयेदात्मनो रश्मीन्प्रत्याहारः स उच्यते	अ. ना. ५
शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् । कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः	भवसं. ३।२७
शब्दादीन् विषयानन्ये	भ. गी. ४।२६
शब्दादीन् विषयांस्त्यक्त्वा	भ.गी. १८।५१
शब्दाद्यैर्विषयैस्त्यक्तो लयस्थो दृश्यते तथा (निर्वातस्थो यथा दीपो भासते निश्चलो यथा)	अमन. १।२७
शब्दानां ज्ञानरूपिणी	देव्यु. २१
शब्दार्णमक्षरं ब्रह्म तस्मिन्क्षीणे यदक्षरम् । तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः	त्रि. ता. ५।१६
शब्देनैवाशब्दमाविष्क्रियते	मैत्रा. ६।२२
शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते	महाना.१६।१२
(ॐ ऐं ह्रीं श्रीं) शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः	वनदु. ३३
[ऋ. मं. ८।१८।९+तै.ब्रा.	३।७।१०।५
शमदमादिदिव्यशक्त्याचरणे क्षेत्रपात्रपटुता	निर्वाणो. ५
शमदमादिसम्पन्नो भावमात्सर्यतृष्णाशामोहादिरहितो दम्भाहङ्कारादिभिरसंस्पृष्टचेता वर्तत एवमुक्तलक्षणो यः स एव ब्राह्मणः	व. सू. उ. ९
शमवान्याति मुक्तताम्	महो. ५।९४
शमश्च स्वाध्यायप्रवचने च	तैत्ति. १।९।१
शमं विषं विषेणैति रिपुणा हन्यते रिपुः । ईदृशी भूतमायेयं या स्वनाशेन हर्षदा	महो. ५।१११
शमः कारणमुच्यते	भ. गी. ६।३
शमादिषट्कसम्पत्तिर्मुमुक्षा, तां समभ्यसेत्	वराहो. २।३
शमायान्तु ब्रह्मचारिणः स्वाहा	तै. उ. १।४।४

शमेन शान्ताः शिवमाचरन्ति, शमेन नाकं मुनयोऽन्वविन्दन् , शमो भूतानां दुराधर्ष; शमे सर्वं प्रतिष्ठितम्	महाना. १७।४
शमेनापिहिता गुहा	इतिहा. १६
शमो दमस्तपः शौचं	भ. गी. १८।४२
शमो मित्रं सुदामा च सत्याक्रूरोद्धवो दमः	कृष्णोप. १९
शरणागतदीनानां कृपां कुर्वन्तिसाधवः	सामर. २३
शरत्प्रतिहारः	छांदो. २।१६।१
शरदि क्रीडते तुभ्यं नम आनन्दशालिने	सामर. ४२
शरं धनुषि सन्धाय तिष्ठन्तं रावणोन्मुखम् । वज्रपाणि रथारूढं रामं ध्यात्वा जपेन्मनुम्	रामर. २।७२
शरा जीवास्तदङ्गेषु भाति नित्यं हरिः स्वयम् । ब्रह्मैव शरभः साक्षान्मोक्षदोऽयं महामुने	शरभो. २८
शरीरत्रयतादात्म्यात्कर्तृत्वभोक्तृत्वतामगमत्	पैङ्गलो. १।५
शरीरत्रयसंयुक्तजीवः सङ्गी तृतीयकः (भ्रमः)	अ. पू. १।१४
शरीरपुरुष इति यमवोचाम स एवाहं दैहिक आत्मा	३ ऐत. २।३।१
शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुष इति	३ ऐन. २।३।१
शरीरपोषणादिकं समानकर्म	शांडि. १।४।९
शरीरप्रादेशाङ्गुष्ठमात्रमणोरप्यणुं ध्यात्वाऽतः परमतां गच्छति	मैत्रा. ६।३८
शरीरभेदा द्विविधाः	सामर. १०१
शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि	छांदो. ८।१३।१
शरीरमन्नादम्	तैत्ति. ३।७
शरीरमस्थिमांसं च त्यक्त्वा युक्ताद्यशोभनम् । भूतमुक्तावलीतन्तुं चिन्मात्रमवलोकयेत्	महो. ४।२३
शरीरमिदं मैथुनादेवोद्भूतं संविदपेतं निरय एव ..	मैत्रे. १।४
शरीरमिध्मम् (शारीरयज्ञस्य)	महाना. १८।१

शरीरमेवास्या एकमङ्गमुदूढं, तस्य सुखदुःखे परस्तात्प्रतिविहिता भूतमात्रा	कौ. त. ३।५
शरीरयज्ञसंशुद्धचित्तसञ्जातबोधतः। मुनयो यत्परं यान्ति तद्रामपदमाश्रये	प्रा. हो. शीर्षकं
शरीरयात्राऽपि च ते	भ. गी. ३।८
शरीरलघुता दीप्तिर्जाठराग्निविवर्धनम् (नाडीशुद्धिचिह्नानि)	यो. त. ४५
शरीरलघुता विप्र पादाङ्गुष्ठनिरोधनात्	जा. द. ६।२४
शरीरवाङ्मनोभिर्यत्	भ.गी. १८।१५
शरीरस्थं प्राणमग्निना सह योगाभ्यासेन समं न्यूनं वा यः करोति, स योगिपुङ्गवो भवति	शांडि. १।४।२
शरीरस्थोऽपि कौन्तेय	भ.गी. १३।३२
शरीरस्य देहिनो जाग्रत्स्वप्नसुषुप्तितुरीयावस्थाः सन्ति	ना. प. ५।१
शरीरं तावदेव स्यात्षण्णवत्यङ्गुलात्मकम्	जा. द. ४।१
शरीरं तु एकादशेन्द्रियात्मकम्	सामर. १०१
शरीरं ध्रियते येन वर्तते तत्र कुण्डली	वराहो. ५।२२
शरीरं मे विचर्षणम् [ना.प.४।४५+	तैत्ति. १।४।१
शरीरं यदवाप्नोति	भ. गी. १५।८
शरीरं यज्ञशमलं कुसीदं	महाना. ५।९
शरीरं वेदिः (शारीरयज्ञस्य)	प्रा. हो. ४।२
शरीरं सर्वजन्तूनां षण्णवत्यङ्गुलात्मकम्। तन्मध्ये पायुदेशात्तु द्व्यङ्गुलात्परतः परम्	वराहो. ५।१९
(तथा) शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही	भवसं. २।३७
शरीरात्प्राणो द्वादशाङ्गुलोऽधिको भवति	शांडि. १।४।२
शरीरान्तर्गताः सर्वे रोगा विनश्यन्ति (स्वस्तिकाद्यष्टासनैः)	शांडि. १।३।१२
शरीराभिमानेन जीवत्वम्	ना. प. ६।७
शरीरेण जिताः सर्वे शरीरं योगिभिर्जितम्। तत्कथं कुरुते तेषां सुखदुःखादिकं फलम्	यो. शि. १।३८
शरीरे पाण्डवस्तदा	भ.गी. १७।१३
शरीरे पाप्मनो हित्वा सर्वान्कामान् समश्नुते	तैत्ति. २।५
शरीरे सकलं विश्वं पश्यत्यात्माविभेदतः	योगकुं. २।४९
शरीरे प्राणः प्रतिष्ठितः	तैत्ति. ३।७
शरीरेष्वशरीर्येव परिच्छिन्नोऽपि सर्वगः	२ आत्मो. १४
शर्म मे भव यत्पापं तन्निवारय	आरुणि. ३
शर्वः सर्वस्य जगतो विधाता धर्ता हर्ता विश्वरूपत्वमेति	त्रिपुरो. १५
शर्वो विश्वं मायया त्रिदधार	ग. पू. ता. २।८
शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम्	महाना.१३।१२
शवपिण्डवदेकत्रान्नं (त्यजेद्यतिः) [ना. प. ७।१+	१ सं.सो. २।७९
शशपृष्ठाद्गौतमः, वसिष्ठ उर्वश्यां, अगस्त्यः कलशे जातः	व. सू. उ. ९
शशशृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति तत्	ते. बिं. ६।७४
शशिमध्यगतो वह्निर्वह्निमध्यगता प्रभा	ध्या. बिं. २७
शशिरवी जायेते पुरुषोत्तमात्	सि. वि. २
शशिस्थाने वसेद्बिन्दुस्तयोरैक्यं सुदुर्लभम्	ध्या. बिं. ८८
शश्वच्छान्तिं निगच्छति	भ. गी. ९।३१
शश्वत् सूयमानत्वात्सूर्यः	मैत्रा. ६।७
शश्वदमितानन्दाचलोपरिविहारिणीं मूलप्रकृतिजननीमविद्यालक्ष्मीमेवं ध्यात्वा...तया चानुज्ञातश्चोपर्युपरि गत्वा महाविराट्पदं प्राप	त्रि.म.ना. ६।३
शश्वद्ब्रह्ममयं रूपं क्रियाशक्तिरुदाहृता	सीतो. २४
शश्वद्विश्वमिदं जगत्	बृ. जा. २।६
शं न इन्द्राग्नी भवतामवोभिः [ऋ.मं.७।३५।१+ [अथर्व. १९।१०।१	प्रवर्ग्या. ११ वा. सं. ३६।११

शं न इन्द्रापूषणा वाजसातौ [+ऋ. मं. ७।३५।१+	प्रवर्ग्या. ११ वा. सं. ३६।११
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः [तैत्ति. [प्रवर्ग्या. ९+	१।१।१,१३+ वा. सं. ३६।९
शं नः कुरु प्रजाभ्योऽभयं पशुभ्यः [प्रवर्ग्या. २२+	वा. सं. ३६।२२
शं नः कौलिकः, शं नो वारुणी, शं नः शुद्धिः शं नोऽग्निः	कौलो. शां.
शं नः शीक्षाꣳ सहनौ यशश्छन्दसां भूः स यः पृथिव्योमित्युतं चाहं वेदमनूच्य शं नो द्वादश	तैत्ति. १।१२।१
शं नो अस्तु द्विपदे शं चतुष्पदे [प्रवर्ग्या. ८+ ऋ. मं. [+वा.सं.३६।८+अथर्व.६।२७।१	सहवै. शां.पा. १०।१६५।१
शं नो दिशतु श्रीर्देवी महामाया वैष्णवी शक्तिराद्या	लक्ष्म्यु. ४
शं नो देवीरभिष्टय आपो भवन्तु पीतये [प्रवर्ग्या. १२+ [वा.सं.३६।१२+अथर्व.१।६।१	ऋ.मं. १०।९।४
'शं नो देवीरभिष्टये' इत्येवमादिं कृत्वाऽथर्ववेदमधीयते	२ प्रणवो. २१
शं नो भवतु भुवनस्य यस्पतिः [प्रवर्ग्या. २+	वा. सं. ३६।२
शं नो मह इत्यादयो नो इतराणि त्रयोविꣳशतिः	तैत्ति. १।१३।१
शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा [प्रवर्ग्या. ९+	तैत्ति. १।१।१ वा. सं. ३६।९
शंसन्तमनुशंसन्ति बह्वृचाः शास्त्रकोविदाः	मंत्रिको. ९
शाकल्येति होवाच याज्ञवल्क्यस्त्वाꣳ स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता ३ इति	बृह. ३।९।१८
शाकायन्यस्य चरणावभिमृश्यमानो राजेमां गाथां जगाद	मैत्रे. १।२
शाक्वरैवते तिरश्ची	कौ. त. १।५
शाखान्तरोपनिषत्स्वरूपमेव निरूपितम्	त्रि.म.ना. ४।२

शाङ्करीयं महाशाक्तं न देयं यस्य कस्यचित्	ते. बिं. ६।१०८
शाटीद्वयं कुटीचकस्य, बहूदकस्यैकशाटी...	ना. प. ७।८
शाट्यायनीब्रह्मविद्याखण्डाकारसुखाकृति । यतिवृन्दहृदागारं रामचन्द्रपदं भजे	शाट्या. शीर्षकं
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडम्	मुक्तिको. १।३९
शाण्डिल्यो ह वा अथर्वाणं पप्रच्छाऽऽत्मलाभोपायभूतमष्टाङ्गयोगमनुब्रूहीति	शांडि. १।१।१
शान्त एव चिदाकाशे स्वच्छे शमसमात्मनि । समग्रशक्तिखचिते ब्रह्मेति कलिताभिधे ॥ सर्वमेव परित्यज्य महामौनी भवानघ	अ. पू. ५।११३
शान्तमेकं समृद्धं चैकम् (ब्रह्मरूपके)	मैत्रा. ६।३६
शान्तसङ्कल्पः सुमना यथा स्यात्	कठो. १।१०
शान्तसन्देहदौरात्म्यं गतकौतुकविभ्रमम् । परिपूर्णान्तरं चेतः पूर्णेन्दुरिव राजते	महो. ५।६८
शान्तसम्यक्प्रबुद्धानां यथास्थितमिदं जगत्	अ. पू. ५।११०
शान्तसंसारकलनः कलावानपि निष्कलः । यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते	महो. २।६१
शान्तं तपो दमस्तपः शमस्तपो दानं तपो यज्ञं तपः	महाना. ७।८
शान्तं ब्रह्मेदमक्रमम्	अ. पू. ५।११२
शान्तं शिवमक्षरमव्ययं	भस्म. २।४
शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते, स आत्मा स विज्ञेयः [माण्डू.७+	रामो. २।४
शान्तः प्रसन्नवदनो ह्यक्रोधो भक्तवत्सलः । अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते	रामो.ता. ६।२७
शान्तः प्राणोऽनीशात्मा	मैत्रा. २।४
शान्ता दान्ता उपरतास्तितिक्षवः समाहिताः...आत्मानन्दाः...	नृसिंहो. ६।३
शान्ता विद्वांसो भैक्षचर्यां चरन्तः	मुण्ड. १।२।११

शान्ताशान्तादिहीनात्मा नादान्तज्योतिरूपकः	ते. बिं. ५।५
शान्तिमाप्नोति नैष्ठिकीम्	भ. गी. ५।१२
शान्तिसमृद्धममृतम्	तैत्ति. १।६।२
शान्तिं निर्वाणपरमां	भ. गी. ६।१५
शान्तिसंसृजन्तिपशुपाशविमोक्षणम्	अ.शिरः. ३।१०
शान्तिस्त्वं, पुष्टिस्त्वं	अ. शिरः. ३।१
शान्तो दान्त उपरतस्तितिक्षुर्योऽनूचानो ह्यभिजज्ञौ समानः	शाट्याय. ५
शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति बृह. 4-4-23,	सुबालो. ९।१४
शान्तो दान्तोऽतिविरक्तः सुशुद्धो गुरुभक्तः	त्रि.म.ना. १।२
शान्तोऽपि व्यवहारस्थः कुर्वन्नपि न लिप्यते	१सं.सो. २।३३
शान्तोऽप्राणो निरात्माऽनन्तः	मैत्रा. ७।४
शान्तोऽस्मि पुरुषोत्तमः	मैत्रे. ३।२४
शान्तो सुषुप्तविश्वः, शान्त्यतीते सुषुप्ततैजसः	प. हं. प. १०
शान्त्यतीतं स्वराद्बहिः	पं. ब्र. १५
शान्त्या चित्तं (शुद्धं भवति)	महाना. १७।१२
शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम्	बृह. २।५।९
शाम्भवस्थानमेतत्ते वर्णितं पद्मसंभव	यो. शि. ५।१६
शाम्यतीदं कथं दुःखमिति तप्तोऽस्मि चेतसा	महो. ३।६
शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा	बृह. २।५।१
शारीरं केवलं कर्म	भ. गी. ४।२१
शारीरं तप उच्यते	भ.गी. १७।१४
शारीरोऽग्निर्नाम जराप्रणुदाहविरवस्कन्दति	प्रा. हो. २।४
शार्कराक्ष्य कं त्वमात्मानमुपास्से	छांदो. ५।१५।१
शालावंशे सर्वेऽन्ये वंशाः समाहिताः स्युः	३ ऐत. २।१।१
शाश्वतस्य च धर्मस्य	भ. गी. १४।२७
शाश्वतं पदमव्ययम्	भ. गी. १८।५६

शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठति	मैत्रे. २।४
शाश्वतं ध्रुवमच्युतम्	ते. बिं. १।८
शाश्वतं परमं पदम्	त्रि.म.ना. ७।७
शाश्वतं वै रुद्रमेकत्वमाहुः	बटुको. २३
शाश्वतꣳ शिवमच्युतम्	महाना. ९।२
शाश्वतं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं परमं पदम्	गणेशो. ५।६
शास्ताऽच्युतो विष्णुर्नारायणः	मैत्रा. ७।७
शास्त्रज्ञानात्पापपुण्यलोकानुभवश्रवणात्प्रपञ्चोपरतः...साधनचतुष्टयसम्पन्नो यः सन्न्यस्यति स एव ज्ञानसन्न्यासी [१ सं. सो. २।१३+	ना. प. ५।३
शास्त्रमेतत्प्रयत्नेन सदाऽभ्यस्यं मुमुक्षुभिः । यस्य धारणमात्रेण स्वयं तत्त्वं प्रकाशते	अमन. २।१०६
शास्त्रसज्जनसम्पर्कवैराग्याभ्यासरूपिणी । प्रथमा भूमिकैषोक्ता मुमुक्षुत्वप्रदायिनी	अ. पू. ५।८१
शास्त्रसज्जनसम्पर्कवैराग्याभ्यासयोगतः	शांडि. १।७।२६
शास्त्रसज्जनसम्पर्कवैराग्याभ्यासपूर्वकम् । सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा [महो. ५।२८+	वराहो. ४।४
शास्त्रसज्जनसम्पर्कैः प्रज्ञामादौ विवर्धयेत्	अ. पू. ५।७१
शास्त्रं विनापि सम्बोद्धुं गुरवोऽपि न शक्नुयुः	योगकुं. २।१०
शास्त्रं सर्वमसद्विद्धि ह्यहं सत्यचिदात्मकः	ते. बिं. ३।५०
शास्त्राण्यधीत्यमेधावी अभ्यस्य च पुनः पुनः । परमंब्रह्म (विद्यायाः) विज्ञायउल्कावत्ता(शा)न्यथोत्सृजेत्	अ. ना. १
शास्त्रीयेणैव मार्गेण वर्तेऽहं मम का क्षतिः	१ अवधू. २३
शास्त्रेण न स्यात्परमार्थदृष्टिः कार्यक्षमं पश्यति चापरोक्षम् ।	

प्रारब्धनाशात्प्रतिभाननाश एवं त्रिधा नश्यति चात्ममाया	वराहो. २।६९
शान्ते मयि त्वयीशे च ह्यखण्डैकरसो भवान्	ते. बिं. २।४२
शास्त्रैः सज्जनसम्पर्कपूर्वकैश्च तपोदमैः । आदौ संसारमुक्त्यर्थं प्रज्ञामेव विवर्धयेत्	महो. ४।४
शांडिल्यंपैङ्गलंभिक्षुंमहच्छारीरकंशिखा	मुक्ति. १।३५
शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं वृश्चनं वा तरूणां (वातरज्जूनां)	मैत्रा. १।८
शिखण्डी च महारथः	भ. गी. १।१७
शिखा च दीपसङ्काशा	१ प्रणवो. ९
शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम् । ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः (वेदानुशासनम्–नेतरेषां तु किञ्चन)[परब्र.१८+शाट्या.१७	+ना.प. ३।८६
शिखा ज्ञानमयी वृत्तिर्यमाद्यष्टांगसाधनैः	त्रि. ब्रा. २।२३
शिखा तु दीपसङ्काशा	ब्र. वि. ९
शिखा प्राणमयी वृत्तिर्यमाद्यष्टाङ्गसाधनम् । देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः	२ अवधू. १
शिखायामेकरुद्राक्षं त्रिशतं शिरसा वहेत्	रु. जा. १५
शिखा वर्णाश्रमिणामेककैव	परब्र. ६
शिखाऽस्य मनस्तमोलक्षणं भित्त्वा तमोऽतमाविष्टमागच्छति	मैत्रा. ६।२४
शिखां यज्ञोपवीतं छित्त्वा संन्यस्तं मयेति त्रिवारमुच्चरेत्	याज्ञव. १
शिखां यज्ञोपवीतं...विसृज्यैव परिव्रजति	ना. प. ३।७७
शिखी मुण्डी चोपवीती कुटुम्बी यात्रामात्रं प्रतिगृह्णन्मनुष्यात्	शाट्याय. १८
शिथिलीकृतसर्वाङ्ग आनखाग्रशिखामतः ।...स्वयं प्रकाशिते तत्त्वे स्वानन्दस्तत्क्षणाद्भवेत्	अमन. २।५०
शिरसि बाणं बाहुनाभिपीठप्रकृतिरूपकं देहे धारणं यस्य न विद्यते तद्देहं न पश्येत्	लिङ्गोप. २
शिरसीशानमन्त्रेण कण्ठे तत्पुरुषेण तु । अघोरेण गले धार्यं तेनैव हृदयेऽपि च (रुद्राक्षधारणं)	रु. जा. २१
शिरः कपालं केशान् न कुर्यात्	लिङ्गोप. २
शिरःपीठं लिङ्गात्मकं सर्वम्	लिङ्गोप. २
शिरःपाणिपादपायूपस्थं सर्वं लिङ्गस्वरूपम्	लिङ्गोप. १
शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवो मे शुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा	महाना.१४।१०
शिरा नद्धयोऽस्थीन्युपग्रहाः	छाग. ६।२
शिरासु तत्पृष्ठगतासु नित्यं समातृकाः शक्तिगणा वसन्ति	१ बिल्वो. ५
शिरोमध्यगते वायौ	जा. द. ६।३७
शिरो रक्षतु वाराही चैन्द्री रक्षेद्भुजद्वयम् । चामुण्डा हृदयं रक्षेत्कुक्षिं रक्षतु वारुणी	वनदु. ८९
शिरोव्रतं विधिवद्यैस्तु चीर्णम् (तेषामेवैतां ब्रह्मविद्यां वदेत)	मुण्ड. ३।२।१०
शिव एकः स्वेन भासेदं सर्वं दृष्ट्वा तप्तायःपिण्डवदेकं भिन्नवदवभासते	त्रि. ब्रा. १।१
शिव एको ध्येयः शिवंकरः	अ. शिखो. ३
शिव एव जङ्गमरूपः	रुद्रोप. २
शिव एव प्राणलिङ्गी	रुद्रोप. २
शिव एव रुद्रः प्राणलिङ्गी, नान्यो भवति	रुद्रोप. २
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः [महो. ४।८५+	२ आत्मो. २०
शिव एव सदा ध्येयः सर्वसंसारमोचकः	शरभो. ३२
शिवगुरुस्वरूपो महेश्वरः	रुद्रोप. ३
शिवज्ञानविदं तस्मात्पूजयेद्विभवैर्गुरुम	शिवो. १।३५

शिवज्ञानं परं ब्रह्म तदारभ्य न सन्त्यजेत् । ब्रह्मासाद्य च यो गच्छेद्ब्रह्महा स प्रकीर्तितः	शिवो. ७।६२
शिवज्ञानं समभ्यसेत्	शिवो. ७।६१
शिवज्ञानात्महस्तेन कस्तं न प्रतिपूजयेत् । (अज्ञानपङ्कनिर्मग्नं यः समुद्धरते जनम्)	शिवो. ७।४१
शिवज्ञानार्थतत्त्वज्ञं प्रसन्नमनसं गुरुम् । शिवः शिवं समास्थाय ज्ञानं वक्ति न हीतरः	शिवो. ७।४
शिवधर्माच्छिवज्ञानं प्राप्य मुक्तिमवाप्नुयात्	शिवो. १।३०
(यद्वा) शिवभक्तिसम्पुष्टं सदापि तद्रसितं देवताधार्यम्	रुद्रोप. १
शिवशक्तिसमायोगे जायते परमा स्थितिः	यो.शि. १।११७
शिवभक्तिविहीनश्चेत् स चण्डाल उपचण्डालः	रुद्रोप. १
शिवमक्षरमव्ययं हरिहरहिरण्यगर्भस्रष्टारं	भस्मजा. २।४
शिवमद्वैतं चतुर्थं मन्यन्ते[गणेशो.१।४	+रामो. २।४
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः	जा. द. ४।५९
शिवयाऽनुषक्तो मध्ये दलेऽहं निवसामि नित्यम्	१ बिल्वो. ३
शिवयोगनिद्रा च	निर्वाणो. २
शिवयोगी शिवज्ञानी शिवजापी तपोधिकः । क्रमशः कर्मयोगी च पञ्चैते मुक्तिभाजनाः	शिवो. १।३६
शिवरूपः प्राणलिङ्गी	रुद्रोप. २
शिवलिङ्गधरं विप्रं विपन्नं न तु दाहयेत् । यदि ना दाहयेत्तस्य ब्रह्महत्या तदा भवेत्	सदानं. १३ .
शिवलिङ्गं त्रिसन्ध्यमभ्यर्च्यैकुशेष्वासीनो ध्यात्वा (जुहुयात्)	भस्मजा. २।४
शिवलिङ्गार्चनयुतश्चाण्डालोऽपि स एव ब्राह्मणाधिको भवति	रुद्रोप. १

शिवव्रतधरं दृष्ट्वा समुत्थाय सदा द्रुतम् । शिवोऽयमिति सङ्कल्प्य हर्षितः प्रणमेत्ततः	शिवो. ५।७२
शिवशक्तिमयं मन्त्रं मूलाधारात्समुत्थितम् । तस्य मन्त्रस्य वै ब्रह्मञ्छ्रोता वक्ता च दुर्लभः	यो. शि. २।५
शिवशक्त्यमृतस्पर्शे लब्ध एव कुतो मृतिः	बृ. जा. २।१५
शिवशक्त्यात्मकं रूपं चिन्मयानन्दवेदितम्	पा. ब्र. ९
शिवश्च नारायणः शक्रश्च नारायणः [त्रि.म.ना. २।८+	नारा. २+ ना.पू.ता. ५।४
शिवश्चोर्ध्वमयः शक्तिरूर्ध्वशक्तिमयः शिवः	बृ. जा. २।१०
शिवसायुज्यमवाप्नोति	रु. जा. ४५
शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते । यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता	यो.शि. १।१६९
शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः	स्कन्दो. ८
शिवं तुरीयं यज्ञोपवीतम्	निर्वाणो. ६
शिवं प्रशान्तममृतं ब्रह्मयोनिम्	कैव. १।६
शिवं शक्तिं च सादाख्यामीशं विद्याख्यमेव च	बृ. जा. ४।२०
(यत्) शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स ब्रह्मप्रणवः...	ना. प. ८।२३
शिवः क्षरति लोकान् वै विष्णुः पाति जगत्त्रयम्	ते. बिं. ५।८७
शिवः पुरुष ईशानो नित्यमात्मेति कथ्यते	महो. ६।६१
शिवः शिव इमे शान्तनाम चाद्यं मुहुर्मुहुः । उच्चारयन्ति तद्भक्त्या ते शिवा नात्र संशयः	शिवो. १।९
शिवः शिवाय भूतानां यस्माज्ज्ञानं प्रयच्छति । गुरुमूर्तिः स्थितस्तस्मात्पूजयेत्सततं गुरुम्	शिवो. ७।२
शिवः शैवागमस्थानां कालः कालैकवादिनाम्	अ. पू. ३।२१
शिवः सर्वजगत्पतिः	शिवो. १।१४

शिवः संसारमोचकः	पञ्चब्र. ३६
शिवाग्निना तनुं दग्ध्वा शक्तिसोमामृतेन यः । प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते	बृ. जा. २।१
शिवाय विष्णुरूपाय शिवरूपाय विष्णवे..	स्कन्दो. ८
शिवालयस्थमकल्पं शतकल्पं च	बृ. जा. ३।३४
शिवालयस्थं तल्लिङ्गलिप्तं वा मन्त्रसंस्कारदग्धं वा (भस्म)	बृ. जा. ५।७
शिवां तां कुरु मोत्क्रमीः	प्रश्नो. २।१२
शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्	नीलरु. १।६+
[वा. सं. १६।४+	तै.सं. ४।५।१।२
शिवे भक्तिं प्राप्य तद्भक्तसङ्गान्न संसृतौ घोरदुःखात्प्रमज्जेत्	सि. शि. ७
शिवेन मे सन्तिष्ठस्व स्योनेन मे संतिष्ठस्व	म. ना. १६।११
शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः । शिवोऽस्म्यहं शिवः सर्वं शिवादन्यन्न किञ्चन	वराहो. ४।३२
शिवोऽद्वैत ओङ्कार आत्मैव	नृसिंहो. २।७
शिवो भवेदित्येकः	गुह्यषोढा. १
शिवोमायुतः परमात्मा वरदो देवता	ग. पू. २।८
शिवोमाविशाप्रदाहाय	महाना. १६।३
शिवोऽयं परमं देवं शक्तिरेषा तु जीवजा । सूर्याचन्द्रमसोर्योगाद्धंसस्तत्पदमुच्यते	त्रि. ता. १।११
शिवोऽहं, नानाशक्तयोऽहम्	अद्वै. भा. १
शिशिरे शिशिरं मथ्यमानं फेनं भवति	अ.शिरः.३।१५
शिशुमेवाप्येति, यः शिशुमेवास्तमेति	सुबालो. ९।१०
शिश्नं निरभिद्यत, शिश्नाद्रेतः	२ ऐत. १।४
शिष्टसंवर्गवर्ज्यं तु	दुर्वासो. २।५
शिष्टाहंकारवासन्तुः	महो. ५।९४
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्	भ. गी. २।७
शिष्याश्च स्वस्वकार्येषु प्रार्थयन्ति... स्वाभ्यासेऽविस्मृतौ...	१ यो. त. ७८
शिष्याणां न तु कारुण्याच्छिष्यसङ्ग्रह ईरितः	१सं.सो. २।८३
शीतवातोष्णत्राणकरं कौपीनमोमिति	ना. प. ४।५०
शीतोष्णसुखदुःखदाः	भ. गी. २।१४
शीतोष्णसुखदुःखमानावमानवर्जितः	प. हं. प. ११
शीतोष्णसुखदुःखमानावमानं निर्जित्य...प्रणवात्मकत्वेन देहत्यागं करोति यः, सोऽवधूतः	तुरीया. ३
शीतोष्णसुखदुःखाद्यैर्व्याधिभिर्मानसैस्तथा । अन्यैर्नानाविधैर्जीवैः शस्त्राग्निजलमारुतैः ॥ शरीरं पीड्यते तैस्तैश्चित्तं संक्षुभ्यते ततः [यो. शि.	१।२८,२९
शीतोष्णसुखदुःखेषु [भ.गी.६।७+	१२।१८
शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणा वशिन्यादिशक्तयोऽष्टौ	भावनो. ६
शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनिग्रहश्चैते यमाः	मं. ब्रा. १।१
शीतोष्णे क्षुत्पिपासे च सङ्कल्पकविकल्पकम् ।...एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परम्	ते.बिं.१।१३,१४
शीर्यन्ते तारका अपि	महो. ३।४९
शीर्यते ह वा अस्य द्विषन् पाप्मा भ्रातृव्यः, परास्य द्विषन् पाप्मा भ्रातृव्यो भवति	१ऐत. १।४।४
शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति	सुबालो. ११।२
शीर्षके च ललाटे च कर्णे कण्ठेंऽसकद्वये । कूर्परे मणिबन्धे च हृदये नाभिपार्श्वयोः ॥ पृष्ठं चैकं प्रतिस्थानं जपेत्तत्राधिदेवताः	बृ. जा. ४।१९
शीर्षान्तर्गतमण्डलमध्यगं पञ्चवक्त्रमुमासहायं नीलकण्ठं प्रशान्तमन्तर्लक्ष्यमिति केचित्	मं. ब्रा. १।५
शीर्षे कण्ठे वक्षसि कक्षदेशे नाभौ हस्ते सर्वदा प्राणलिङ्गम् । धार्यं यथासम्प्रदायं पुरस्ताद्गुरोर्विदित्वा हृदये मुख्यमुक्तम्	सि. शि. १२

शीर्षोपरि द्वादशाङ्गुलिमानं ज्योतिः पश्यति तदाऽमृतत्वमेव	मं. ब्रा. १।३
शीर्षोपरि द्वादशाङ्गुलसमीक्षितुरमृतत्वं भवति	अद्वयता. ३
शीर्ष्णो द्यौः समवर्तत [पु.सू. १३	चित्यु. १२।६
शीर्ष्णो द्यौः (अजायत)	गणेशो. ३।११
शुक पश्यन्न पश्येस्त्वं साक्षी सम्पूर्णकेवलः	महो. २।७३
शुकमार्गं येऽनुसरन्ति धीराः सद्योमुक्तास्ते भवन्तीह लोके	वराहो. ४।३४
शुकश्च वामदेवश्च द्वे सृती देवनिर्मिते	वराहो. ४।३६
शुकेषु मे हरिमाणं रोपणाकासुदध्मसि [ऋ. मं. १।५०।१२+तै.आ.	सूर्यता. २।१+ ३।७।६।२२
शुको नाम महातेजाः स्वरूपानन्दतत्परः	महो. २।१
शुको मुक्तो वामदेवोऽपि मुक्तस्ताभ्यां विना मुक्तिभाजो न सन्ति	वराहो. ४।३४
शुको विहङ्गमः प्रोक्तो वामदेवः पिपीलिका	वराहो. ४।३६
शुक्तिकाया यथा तारं कल्पितं मायया तथा । महदादि जगन्मायामयं मय्येव केवलम्	वराहो. ३।१५
शुक्तिकारजतंसत्यंभूषणंचेज्जगद्भवेत्	ते. बिं. ६।७६
शुक्रभिन्नेन यमो भवति	निरुक्तो. १।३
शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंसः	वृह. ४।३।११
शुक्रशोणितसंयोगादावर्तते गर्भः	गर्भो. २
शुक्रशोणितसंयोगान्मातृपितृसंयोगाच्च कथमिदं शरीरं परं संयम्यते	निरुक्तो. १।३
शुक्रः शुक्रस्य पुरोगाः	चित्यु. ३।१
शुक्रः शुशुक्वां उषो न जारः पप्रा समीची दिवो न ज्योतिः [वनदु. ३२+	ऋ.मं. १।६९।१
शुक्रातिरेके पुमान् भवति । शोणितातिरेके स्त्री भवति । द्वाभ्यां समेन नपुंसको भवति	निरुक्तो. १।३

शुक्रेण ज्योतींषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः [महाना. १।१+	तै.आ. १०।१।१
शुक्लकृष्णे गती ह्येते	भ. गी. ८।२६
शुक्लदन्तो भस्मदिग्धो मन्त्रेणानेन मन्त्रवित् । ॐ तद्ब्रह्मेति चोच्चार्य पौल्कं भस्म सन्त्यजेत्	बृ. जा. ३।२४
शुक्लध्यानपरायणः... सन्न्यासेन देहत्यागं करोति स परमहंसपरिव्राजको भवति	प. हं. प. ८
शुक्लध्यानपरायणोऽध्यात्मनिष्ठोऽशुभकर्मनिर्मूलनपरः सन्न्यासेन देहत्यागं करोति स परमहंसो नाम	जाबालो. ६
शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति तासु तदा भवति, यदा सुप्तः स्वप्नं न कञ्चन पश्यति	कौ. त. ४।१९
शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णाः (नाड्यः)	बृह. ४।३।२०
शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः	छांदो. ८।६।१
शुक्लं चन्द्रेण संयुक्तं रजः सूर्यसमन्वितम् (सूर्येण सङ्गतम्) [यो. चू. ६४+	ध्या. बिं. ९०
शुक्लो रक्तः कृष्णो धूम्रः पीतः कपिलः पाण्डर इति	गर्भो. २
शुचिर्वाऽप्यशुचिर्वाऽपि यो जपेत्प्रणवं सदा । न स लिप्यति पापेनपद्मपत्रमिवाम्भसा	यो. चू. ८८
शुचिःशुचौ देशे गुप्ततीर्थायतनेषु सुप्रक्षालितपाणिपादवदनः.. इत्यप उत्सृजेत्	सन्ध्यो. १
शुचीनां श्रीमतां गेहे	भ. गी. ६।११
शुचौ देशेऽप्यासीनो दर्भान्धारयमाणः प्राङ्मुख उपविश्य..	सूर्यता. १।८
शुचौ देशे प्रतिष्ठाप्य	भ. गी. ६।४१
(ॐ) शुचौ देशे शुचिः सत्त्वस्थः सदधीयानः सद्वादी सद्ध्यायी सद्याजी स्यात्	मैत्रा. ६।३०

शुचौ देशे स्वाध्यायमधीयानः धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं यावदायुषं ब्रह्मलोकमभिसम्पद्यते	छांदो. ८।१५।१
शुद्धचिदानन्दब्रह्मविलासानन्दाश्चानन्तपरमानन्दविभूतयश्चानन्तवैकुण्ठाश्चानन्तपरमानन्दसमुद्रादयः सन्त्येव	त्रि.म.ना. ८।३
शुद्धचेतन एवाहं कलाकलनवर्जितः	१सं.सो. २।२०
शुद्धज्ञानामृतं प्राप्य परमाक्षरनिर्णयम् । गुह्याद्गुह्यतमं गोप्यं ग्रहणीयं प्रयत्नतः	ब्र. बिं. ४६
(अथ) शुद्धबुद्धमुक्तसत्यानन्दस्वरूपत्वाच्च	त्रि.म.ना. ३।२
शुद्धबोधमनोदृशम (पाठगतं)	अध्यात्मो. ६३
शुद्धबोधसौधावलिविशेषैरलङ्कृतं	त्रि.म.ना. ७।८
शुद्धबोधानन्दलक्षणकैवल्यं भवति	त्रि.म.ना. ४।१
शुद्धबोधानंदविभूतिविशेषं... शाश्वतं परमं पदं...स्वयम्प्रकाशमनिशं ज्वलति	त्रि.म.ना. ७।७
शुद्धबोधानन्दविशेषाकारं (ब्रह्म)	त्रि.म.ना. ४।१
शुद्धब्रह्मास्मि सोऽस्म्यहम्	मैत्रे. ३।९
शुद्धमात्मानमालिङ्ग्य नित्यमन्तस्थया धिया । यः स्थितस्तं क आत्मेह भोगो बाधयितुं क्षमः	अ. पू. २।४२
शुद्धमानसः शुद्धचिद्रूपः सहिष्णुः सोऽहमस्मि	पैङ्गलो. ४।९
शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च । प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥ इति सप्तविधं प्रोक्तं भिद्यते व्यवहारतः	कठरु. ४०
शुद्धरूपोऽस्म्यहं सदा	ते. बिं. ३।५
शुद्धशौचमिति प्रोक्तं मृज्जलाभ्यां तु लौकिकम्	मैत्रे. २।८
शुद्धसत्त्वप्रधानायां मायायां बिम्बितो ह्यजः	सरस्व. ३८
शुद्धसत्त्वे परे लीनो जीवः सैन्धवपिण्डवत्	त्रि.ब्रा. २।१६४
शुद्धसन्मात्रसंवित्तेः स्वरूपान्न चलन्ति ये । रागद्वेषादयो भावास्तेषां नाज्ञत्वसम्भवः	महो. ५।३
शुद्धसंविन्मयानन्दरूपा भवति पञ्चमी (भूमिका)	अ. पू. ६।८३
शुद्धस्फटिकसङ्काशं केवलं मोक्षकाङ्क्षया । चिन्तयन्परमात्मानं भानुलक्षं जपेन्मनुम्	रामर. २।५
शुद्धस्फटिकसङ्काशं चन्द्रकोटिसमप्रभम् । एवं ध्यायेन्महाविष्णुमेवं वा विनयान्वितः	ध्या. बिं. २९
शुद्धस्फटिकसङ्काशं किञ्चित्सूर्यमरीचिवत् । लभते योगयुक्तात्मा पुरुषोत्तमतत्परः	२ योगत. ११
शुद्धस्फटिकसङ्काशं स वै ब्रह्म परमात्मेत्युच्यते	हंसो. ४
शुद्धं बुद्धमनीदृशम्	अध्यात्मो. ६३
शुद्धं बुद्धं सदामुक्तमनामकमरूपकम्	ते. बिं. ६।७०
शुद्धं ब्रह्म शुभाशुभम्	ते. बिं. ६।३७
शुद्धं शुद्धेनेतिसम्मृज्यसंशोध्य(भस्म)	भस्मजा. १।४
शुद्धं सदसतोर्मध्यं पदं बुद्ध्वाऽवलम्ब्य च । सबाह्याभ्यन्तरं दृश्यं मा गृहाण विमुञ्च मा	महो. ५।१७२
शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम् । अनन्तमपरिच्छेद्यमनूपममनामयम् ॥ आत्ममन्त्रसदाभ्यासात्परतत्त्वं प्रकाशते	यो. शि. २।१७
शुद्धः पूतः पुण्यलोको भवति	छां. ५।१०।१०
शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तः	[मैत्रा. ६।२८+७।४
शुद्धाकाशे वने जाते चलिते तु तदा जगत्	ते. बिं. ६।९८
शुद्धाकाशो मनुष्येषु पतितश्चेत्तदा जगत्	ते. बिं. ६।९७
शुद्धाद्वैतब्रह्माहमिति भिदागन्धं निरस्य स्वान्तर्विजृम्भितभानुमण्डलध्यानदाकारा-	

कारितपरंब्रह्मकारितमुक्तिमार्गमारूढः परिपक्वो भवति	मं. ब्रा. २।७
शुद्धाद्वैताजाड्यसहजामनस्कयोगनिद्राखण्डानन्दपदानुवृत्त्या जीवन्मुक्तो भवति	मं. ब्रा. २।५
शुद्धा ध्यानेन योगिनः	दुर्वासो. १।१०
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः	शांडि. १।७।१
शुद्धाभ्यासस्य शांतस्य सदैव गुरुसेवनात् । गुरुप्रसादात्तत्रैव तत्त्वज्ञानं प्रकाशते	अमन. २।१११
शुद्धां संविदमाश्रित्य वीतरागः स्थिरो भव	अ. पू. ४।९०
शुद्धे चेतसि तस्यैव स्वात्मज्ञानं प्रकाशते	यो. शि. १।६९
शुद्धो ज्ञानमयोऽमलः । आत्माऽहं सर्वभूतानां विभुः साक्षीनसंशयः	सर्वसारो. १०
शुद्धो देव एको नारायणः । न द्वितीयोऽस्ति कश्चित्	[त्रि.म.ना. १।५+२.८
शुद्धो निरवयवात्मा...सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि	आत्मोप. ६
शुद्धो बुद्धो नित्यो निरञ्जनः शान्तः प्रकाशते	हंसो. ११
शुद्धो बोधस्वरूपोऽहं केवलोऽहं सदाशिवः	अध्यात्मो. ६९
शुद्धो भास्वरो गुणभुग्भयोऽनिर्वृतिः (आत्मा)	मैत्रा. ७।१
शुद्धोऽस्मि परमोऽस्म्यहम्	मैत्रे. उ. ३।२
शुद्धोऽस्मि शुक्रः शान्तोऽस्मि शाश्वतोऽस्मि शिवोऽस्म्यहम्	ब्र. वि. १०४
शुद्धोऽहमान्तरोऽहं शाश्वतविज्ञानसमरसात्माऽहम्	आ. प्र. ११
शुद्धोऽहमद्वयोऽहं संततभावोऽहमादिशून्योऽहम्	आ. प्र. १०
शुद्धौ यतेत नाडीनां पूर्वोक्तज्ञानसंयुतः	त्रि. ब्रा. २।८९
शुना वीर्येण सिंहस्तु जितो यदि जगत्तदा	ते. बिं. ६।९९
शुनि चैव श्वपाके च	भ. गी. १८।५
शुभं यदशुभं विद्धि अशुभाच्छुभमिष्यते	ते. बिं. ५।२३
शुभं वाऽशुभमन्यद्वा यदुक्तं गुरुणा भुवि । तत्कुर्यादविचारेण शिष्यः सन्तोषसंयुतः	ब्र. वि. २७
शुभाशुभकर्मनिर्मूलनपरः सन्न्यस्य ...शरीरत्रयमुत्सृज्य सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति	ना. प. ३।८७
शुभाशुभकर्मनिर्मूलनपरः सन्न्यासेन देहत्यागं करोति स परमहंसः	याज्ञव. ३
शुभाशुभपरित्यागी	भ.गी. १२।१७
शुभाशुभफलं कर्ममनोवाग्देहसम्भवम् । कर्मजा गतयो नृणामुत्तमाधममध्यमाः	भवसं. ५।१
शुभाशुभफलैरेवं	भ. गी. ९।२८
शुभाशुभं च कर्म विन्दति	गर्भो. ३
शुभाशुभातिरिक्तः शुभाशुभैरपि कर्मभिर्न लिप्यते	परब्र. २
शुभाशुभाभ्यां मार्गाभ्यां वहती वासनासरित् । पौरुषेण प्रयत्नेन योजनीया शुभे पथि	भवसं. १।४७
शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् । पौरुषेण प्रयत्नेन योजनीया शुभे पथि	मुक्तिको. २।५
शुभाशुभैः कर्मभिर्यो न लिप्यति कदाचन	ना. महो. १५
शुभेच्छादित्रयं भूमिभेदाभेदयुतं स्मृतम् । यथावद्वेद बुद्ध्येदं जगज्जाग्रति दृश्यते	वराहो. ४।११
शुभेच्छा प्रथमा भूमिका भवति	वराहो. ४।१
शुभोऽस्मिशोकहीनोऽस्मि चैतन्योऽस्मि समोऽस्म्यहम्	मैत्रे. ३।१
शुभ्रवर्णमाजायतेश्वरात्	परब्र. २
शुष्कभृङ्गारस्तदगित्युपासीत	कौ. उ. २।६
शुष्के मले तु योगी च स्याद्गतिश्चलिता ततः ।	योगकुं. १।६३

शुष्को वृक्षः पल्लवैरेति शोभां द्रवीभावं गण्डशैला लभन्ते । निश्चेष्टाः स्युः शार्दूलस्था हरिण्यो गानानन्दे लीयते विश्वमेतत्	गान्धर्वो. ९
शुष्यन्ते केवला भावाः	महो. ३।५
शुष्यन्त्यपि समुद्राश्च ध्रुवोऽप्यध्रुवजीवनः	महो. ३।५०
शूद्रस्यापि स्वभावजम्	भ. गी. १८।४४
शूद्राणां च परन्तप	भ.गी. १८।४१
शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवं (भस्म)	बृ. जा. ५।५
शूद्रायां सृजते रेतः श्राद्धं भुक्त्वाऽथ यो द्विजः । स शूद्रयोनिसञ्छिन्नं रेतसा सिञ्चते पितॄन्	इतिहा. २३
शूद्राः किमु स्वक्रियया विहीनाः	भवसं. २।६४
शूद्रेण शूद्रः	बृह. १।४।१५
शून्यं तत्प्रकृतिर्मायाब्रह्मविज्ञानमित्यपि	महो. ६।६१
शून्यं न सङ्केतः परमेश्वरसत्ता	निर्वाणो. ३
शून्यं वै परं ब्रह्म, तत्र सतारं समायं सामयसन्निरेखं भवति	ग. पू. ता. ३।१
शून्याकृतिः शून्यभवः शब्दो नाहमचेतनः	१ सं.सो.२।१५
शून्यागारदेव-(मंदिर-)वासिनः (परमहंसाः)	आश्रमो. ४
शून्यागार-देवगृह-तृणकूट-वल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थण्डिलेषु तेष्वनिकेतवास्यप्रयत्नो...सन्न्यासेन देहत्यागं करोति स परमहंसो नाम [जाबालो. ६+	याज्ञ. ३
शून्यागार-देवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रशालानदीपुलिनगिरिकन्दरकुहरकोटरनिर्झरस्थण्डिले... परमहंसाचरणेन सन्यासेन देहत्यागं कुर्वन्ति ते परमहंसा नाम	भिक्षुको. ६
शून्यागार-वृक्षमूल-देवगृह-तृणकूट-कुलालशालाग्निहोत्रशालाग्निदिगन्तरनदीतटपुलिनभूगृहकंदरनिर्झरस्थण्डिलेषु...देहत्यागं करोति स कृतकृत्यो भवति	ना. प. ३।८७
शून्यानां शून्यसाक्षिणी	देव्यु. २१
शून्या प्रेतपुरी तत्र यावद्वृश्चिकदर्शनात्	इतिहा. ९२
शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः	ते. विं. ४।४३
शून्याशून्यप्रभावोऽस्मि शोभनाशोभनोऽस्म्यहम्	मैत्र. उ. ३।५
शून्येन शून्यमपि विप्र यथाऽम्बरेण, नीलत्वमुल्लसति चारुतराभिधानम्	महो. ५।५२
शून्येष्वेवावकाशेषु गुहासु च वनेषु च । नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्रमेत्	ना. प. ६।८
शूरा नाम महानाडी	यो. शि. ५।२२
शूरो वीरः पुरुषो भूतसंस्थो विश्वोविश्वेशःप्राणदश्चाव्ययात्मा	२ रुद्रो. ५७
शृङ्गप्रोतान् पादान् स्पृष्ट्वा हत्वा तानग्रसात्स्वयम् । नत्वा च बहुधा दृष्ट्वा नृसिंहः स्वयमुद्बभौ	नृसिंहो. ४।३
शृङ्गमिन्द्रः सखा सुरः	कृष्णो. ८
शृङ्गं शृङ्गार्धमाकृष्य शृङ्गेणानेन योजयेत् । शृङ्गमेनं परे शृङ्गे तमनेनापि योजयेत्	नृसिंहो. ७।६
शृङ्गारकलेति विज्ञायते	बह्वृचो. १
शृङ्गेष्वशृङ्गं संयोज्य सिंहं शृङ्गेषु योजयेत् । शृङ्गाभ्यां शृङ्गमाबध्य त्रयो देवा उपासते	नृसिंहो. ६।३
शृणु मे भरतर्षभ	भ. गी. १८।३६
शृणुयादपि यो नरः	भ. गी. १८।७१
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम् [प्रवर्ग्या. २४+	वा. सं. ३६।२४
शृण्वतः श्रोत्रेण [बृह. ६।१।८,	९,११,१२

शृणु मे परमं वचः	भ.गी. १८।६४
शृण्वतो नास्ति मेऽमृतम्	भ.गी. १०।१८
शृण्वन्ति विश्वे अमृतस्य पुत्रा आये धामानि दिव्यानि तस्थुः	श्वेताश्व. २।५
शृण्वन्तोऽपि बहवो यं न विद्युः	कठो. २।७
शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्माच्छृणोम्यहम् । मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः	अवधू. १६
शृण्वन्वै तन्न शृणोति नहि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वात्	बृह. ४।३।२७
शेमुषी दक्षिणा प्रोक्ता सा यस्यामीक्षणे मुखम् । दक्षिणाभिमुखः प्रोक्तः शिवोऽसौ ब्रह्मवादिभिः	द. मू. २१
शेषकर्मप्रसिद्ध्यर्थं केशान्सप्ताष्ट वा द्विजः । सञ्छिद्य वापयेत्पूर्वं केशश्मश्रुनखानि च	ना. प. ४।३९
शेषनागोऽभवद्रामः कृष्णो ब्रह्मैव शाश्वतम्	कृष्णो. १२
शेषस्थिरसमाधानो येनत्यजसि तत्त्यज । चिन्मनःकलनाकारं प्रकाशतिमिरादिकम्	महो. ६।६
शेषायुतफणाजालविपुलच्छत्रशोभितं...निरतिशयाद्वैतपरमानन्दलक्षणमादिनारायणं ध्यायेत्	त्रि.म.ना. ७।१२
शेषो ह वै वासुदेवात्सङ्कर्षणो नाम जात आसीत्	सङ्कर्षणो. १
शैब्यश्च नरपुङ्गवः	भ. गी. १।५
शैला अपि विशीर्यन्ते शीर्यन्ते तारका अपि	महो. ३।४९
शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् । तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः	२ आत्मो. २१
शैशवे गुरुतो भीतिर्मातृतः पितृतस्तथा । जनतो ज्येष्ठबालाच्च शैशवं भयमन्दिरम्	महो. ३।३३
शोकमोहविनिर्मुक्तो विष्णुं ध्यायन्न सीदति	आ. प्र. १
शोकसंविग्नमानसः	भ. गी. १।४७

शोकस्थानसहस्राणि हर्षस्थानशतानि च । दिवसे दिवसे मूढमाविशंति न पण्डितम्	भवसं. १।९
शोकातिगो मोदते स्वर्गलोके	कठो.१।१२,१८
शोणितातिरेके स्त्री भवति	निरुक्तो. १।३
शोणितान्मांसं, मासान्मेदः [गर्भो. १२+	निरुक्तो. १।२
शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः । रसानां शोषणं चैव महामुद्राऽभिधीयते	यो. चू. ६५
शोधनं मलजालानां घटनं चन्द्रसूर्ययोः । रसानां शोषणं सम्यङ्महामुद्राऽभिधीयते	ध्या. बिं. ९१
शोभनः शोभमानः कल्याणः	नृ. पू. २।७,११
शोभनाशोभनोऽस्म्यहम्	मैत्रे. ३।५
शोषयाशु यथा शोषमेति संसारपादपः	मुक्तिको. २।३८
शौचमिन्द्रियनिग्रहः [मैत्रे. २।२+	स्कन्दो. ११
शौचं नामद्विविधंबाह्यमाभ्यन्तरंचेति	शांडि. १।१।३
शौनको ह वै महाशालोऽङ्गिरसं भगवन्तं पिप्पलादमपृच्छत्	प्रश्नो. १
शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ	मुण्ड. १।३
शौर्यं तेजो धृतिर्दाक्ष्यं	भ. गी. १८।४३
श्मशानेषु दिगन्तेषु स एव ललनास्तनः। श्वभिरास्वाद्यते काले लघुपिण्ड इवान्धसः [महो.३।४२+	याज्ञव. ११
श्यामवर्णे मध्यदले यदा विश्राम्यते मनः । तदा सर्वगुणं ज्ञानं चैतन्यं च मतिर्भवेत्	विश्रामो. १०
श्यामवर्णे वायुदले यदा विश्राम्यते मनः । निद्रालस्यभयं देवि मत्सरे च मतिर्भवेत्	विश्रामो. ६
श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ।...चिन्तयन्परमात्मानं भानुलक्षं जपेन्मनुम्	रामर. २।४
श्यामाच्छबलंप्रपद्ये, शबलाच्छ्यामं..	छांदो. ८।१३।१

श्यामां श्यामवपुर्धरां ऋक्स्वरूपां ...भक्षणाद्युनप्रदां...य एवं वेद स वैष्णवो भवति (तुलसी)	तुलस्यु. २
श्यालाः सम्बन्धिनस्तथा	भ. गी. १।३४
श्येतमद्त्कमद्त्कं श्वेतं लिन्दुमाभिगाम्	छांदो. ८।१४।१
श्येनमेवाप्येति यः श्येनमेवास्तमेति	सुबालो. ९।१०
श्येनस्त एकं मुखं तेन मुखेन पक्षिणोऽसि तेन मुखेन मामन्नादं कुरु	कौ. त. २।९
श्येनो गृध्राणां स्वधृतिर्वनानां सोमः पवित्रमत्येतिरेभन् [महाना.	८।४+१२।३
श्रद्धदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्या	छांदो. ७।१९।१
श्रद्दधाना मत्परमाः	भ. गी. १२।२०
श्रद्धया देयम् । अश्रद्धया देयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम्	तैत्ति. १।११।३
श्रद्धया परया तप्तं	भ. गी. १७।१७
श्रद्धया परयोपेताः	भ. गी. १२।२
श्रद्धया मेधा	महाना. १७।१३
श्रद्धयाऽर्चितुमिच्छति	भ. गी. ७।२१
श्रद्धत्स्व सोम्येति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा	छांदो. ६।१२।३
श्रद्धानुरूपा धीर्देवता	भावनो. ७
श्रद्धा पत्नी (यज्ञस्य)	महाना. १८।१
श्रद्धा भवति भारत	भ. गी. १७।३
श्रद्धामयोऽयं पुरुषः	भ. गी. १७।३
श्रद्धा माता, पितरं सत्यमाहुः	इतिहा. ११
श्रद्धामेधे प्रजाः सन्ददातु स्वाहा	महाना. १४।५
श्रद्धामेधे प्रज्ञा तु जातवेदः सन्ददातु स्वाहा	महाना. १४।६
श्रद्धायामपाने निविश्यामृतं हुतं, अपानमन्नेनाप्यायस्व...	महाना. १६।४
श्रद्धायामपाने निविष्टोऽमृतंजुहोमि	म. ना. १६।२,३
श्रद्धायामुदाने निविश्यामृतं हुतं, उदानमन्नेनाप्यायस्व	महाना. १६।४
श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि	म. ना. १६।२,३

श्रद्धायां प्राणे निविश्यामृतं हुतं, प्राणमन्नेनाप्यायस्व	महाना. १६।४
श्रद्धायां प्राणे निविष्टोऽमृतंजुहोमि	म.ना. १६।२,३
श्रद्धायां व्याने निविश्यामृतं हुतं, व्यानमन्नेनाप्यायस्व	महाना. १६।४
श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि	म.ना. १६।२,३
श्रद्धायां समाने निविश्यामृतं हुतं, समानमन्नेनाप्यायस्व	महाना. १६।४
श्रद्धायां समानेनिविष्टोऽमृतंजुहोमि	म.ना. १६।२,३
श्रद्धायां ह्येव दक्षिणा प्रतिष्ठिता	बृह. ३।९।२१
श्रद्धालुर्मुक्तिमार्गेषु वेदान्तज्ञानलिप्सया । उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत्	ना. प. ६।२३
श्रद्धावन्तोऽनसूयन्तः	भ. गी. ३।३१
श्रद्धावाननसूयश्च	भ. गी. १८।७१
श्रद्धावान् भजते यो मां	भ. गी. ६।४७
श्रद्धावाँल्लभते ज्ञानं	भ. गी. ४।३९
श्रद्धाविरहितं यज्ञं	भ. गी. १७।१३
श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च	मुंड. २।१।७
श्रद्धासत्यो महस्वान् तपसो वरिष्ठाः	महाना. १७।१४
श्रद्धां भगवो विजिज्ञासे	छांदो. ७।१९।१
श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति	बृह. ४।३।२२
श्रवणकीर्तनस्मरणवन्दनसेवनोपकरणदास्यभावेनात्मसमर्पणम्	सामर. २
श्रवणमनननिर्विचिकित्सेऽर्थे वस्तुन्येकतानवत्तया चेतःस्थापनं निदिध्यासनं भवति	पैङ्गलो. ३।२
श्रवणं चिन्तनं सेवा सत्कृत्यकरणं तथा । असत्कृत्यपरित्यागो उपायान्तरवर्जनम् ॥ ... आनृशंस्यं सतां सङ्गः पारमैकान्त्यहेतवः	भवसं. ५।१९
श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम् । निदिध्यासनमित्येतत्पूर्णबोधस्य कारणम्	शु. र. ३।१३

श्रवणं नास्ति मे सिद्धेर्मननं च चिदात्मनि	ते. बिं. ३।४६
श्रवणाङ्कुष्ठयोगेनान्तर्हृदयाकाशशब्दमाकर्णयन्ति	मैत्रा. ६।२२
श्रवणादेवं प्रतिपद्यन्ते	२ प्रणवो. १७
श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः	कठो. २।७
श्रातास्त इन्द्रसोमाः	चित्यु. ३।१
श्राद्धकर्ता परश्राद्धं यत्तु भुञ्जीत लोलुपः । नष्टं भवति तच्छ्राद्धं रौरवं नरकं व्रजेत्	इतिहा. ४१
श्राद्धं दत्त्वा च भुक्त्वा च अध्वानं योऽधिगच्छति । पितरस्तस्य तन्मासं भवन्ते पांसुभोजनाः	इतिहा. ३४
श्राद्धं दत्त्वा च भुक्त्वा च भारमुद्वहते द्विजः । पितरस्तस्य तन्मासं भवन्ते भारपीडिताः	इतिहा. ३३
श्राद्धं दत्त्वा च भुक्त्वा च सङ्गमं न समाचरेत् । पितरस्तस्य तन्मासं भवन्ते रेतभोजनाः	इतिहा. ३०
श्राद्धं दत्त्वा च भुक्त्वा च सपङ्क्तिः सहभोजनम् । षण्मासान्पितरोऽश्नन्ति कर्तुरुच्छिष्टभोजनम्	इतिहा. ३१
श्राद्धं भुक्त्वा पुनः श्राद्धं भुञ्जीयाल्लोभमोहितः । नष्टं भवति तच्छ्राद्धं रौरवं नरकं व्रजेत्	इतिहा. ४२
श्राद्धे सप्त पवित्राणि दौहित्रः कुतपस्तिलाः (उच्छिष्टं शिवनिर्माल्यं वमनं मृतकर्पटम्)	इतिहा. ५६
श्राम्यत्येव वाक्, श्राम्यति चक्षुः, श्राम्यति श्रोत्रम्..	बृह. १।५।२१
श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं चानृण्यताम्	महाना. १४।५
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् [श्रीसू. ३	ऋ.खि.५।८७।३
श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुस्तां विद्यां ब्रह्मयोनिं सरूपामिहायुषे शरणं प्रपद्ये	नृ. पू. ३।४
श्रियं वासय मे कुले मातरं पद्ममालिनीम् [श्रीसू.११+ऋ.	खि. ५।८७।११
श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम्	तैत्ति. १।११।३
श्रिया हैवाऽभिषिच्यते [+नृ. पू. १।३+४।३	सूर्यता. ३।१
श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर । संसारसागरे मग्नं मामुद्धर जगद्गुरो	गो. पू. ४।१४
श्रीकृष्णाख्यं परं ब्रह्म गोपिकाः श्रुतयोऽभवन् । एतत्सम्भोगसम्भूतं चन्दनं गोपिचन्दनम्	गोपीचं. २९
(ॐ) श्रीकृष्णाय गोविंदाय गोपीजनवल्लभाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः	गोपालो. ३।३
(ॐ) श्रीकृष्णाय देवकीनन्दनाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः	गोपालो. ३।९
(ॐ) श्रीकृष्णाय रामाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः	गोपालो. ३।७
(ॐ) श्रीकृष्णायानिरुद्धाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः	गोपालो. ३।५
श्रीकृष्णो भगवान् नारायणः परमात्मा पुरुषोत्तमः त्रिगुणरहितः स्वयम्	वि. सि. ३
श्रीकृष्णो वै परमं दैवतम्	गो. पू. १।१
श्रीगणपतेरेनं मन्त्रराजमन्योन्याभावात् प्रणवरूपस्यास्य परमात्मनोऽङ्गानि जानीते, स जानाति	ग. शो. ५।१
(ॐ)श्रीगुरुः सर्वकारणभुता शक्तिः	भावनो. २
श्रीचूर्णं श्रीकरं दिव्यं श्रियश्चाङ्गे समुद्भवम् । पुण्ड्रं च यस्य मध्ये तु धार्यं मोक्षार्थिभिः स्मृतम्	ऊर्ध्वपुं. ४
(ॐ) श्रीगोपालाय निजस्वरूपाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः	गोपालो. ३।११

श्रीतुलस्यै विद्महे विष्णुप्रियायै धीमहि। तन्नो अमृता प्रचोदयात्	तुलस्यु. ३
श्रीतुलस्यै स्वाहा विष्णुप्रियायै स्वाहा। अमृतायै स्वाहा	तुलस्यु. २
श्रीदेवी त्रिविधं रूपं कृत्वा भगवत्सङ्कल्पानुगुण्येन लोकरक्षणार्थं रूपं धारयति	सीतो. ९
श्रीपरमधाम्ने स्वस्ति चिरायुष्योन्नम इति	स्कन्दो. १३
श्रीपर्वतं शिरस्स्थाने केदारं तु ललाटके। वाराणसी महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे	जा. द. ४।४८
श्रीभूमिर्नीलात्मिका भद्ररूपिणी प्रभावरूपिणी सोमसूर्याग्निरूपा भवति	सीतो. ८
श्रीमत्पुरुषसूक्तार्थं पूर्णानन्दकलेवरम्। पुरुषोत्तमविख्यातं परं ब्रह्म भवाम्यहम्	मुद्गलो. शीर्षकं
श्रीमदूर्जितमेव वा	भ. गी. १०।४१
श्रीमन्नारायणचरणौ शरणं प्रपद्ये	त्रि.म.ना.७।१०
श्रीमन्नारायणाकारमष्टाक्षरमहाशयम्। स्वमात्रानुभवात्सिद्धमात्मबोधं हरिं भजे	आत्मप्र.शीर्षकं
श्रीमन्नारायणाष्टाक्षरानुस्मरणेन गायत्र्याः शतसहस्रं जप्तं भवति	तारसा. ३।९
श्रीमन्नारायणे मय्यचला भक्तिश्च भवति	वासुदे. १७
श्रीमन्नारायणो ज्योतिरात्मा नारायणः परः। नारायणपरं ब्रह्म नारायण नमोऽस्तु ते	त्रि.म.ना.७।११
श्रीमहालक्ष्म्यै नम इति सप्ताक्षरो मन्त्रः	ना.पू.ता.२।१
श्रीमहाविष्णवे तुभ्यं नमो नारायणाय च। गोविन्दाय च रुद्राय हरये ब्रह्मरूपिणे	ना.पू.ता. ३।५
श्रीमानजो धीमाननिर्देश्यः सर्वसृक् सर्वस्यात्मा	मैत्रा. ७।१
श्रीरामचन्द्रसेवक ॐ हां हां हां आसय आसय	लाङ्गूलो. ८

श्रीरामतापिनीयार्थं भक्तध्येयकलेवरम्। विकलेवरकैवल्यं श्रीरामब्रह्म मे गतिः	रा. पू. शीर्षकं
श्रीरामतारकपरब्रह्मविश्वरूपदर्शन..स्थलजलाग्निमर्मभेदिन् सर्वशत्रून् छिन्धि छिन्धि	लांगूलो. ३
श्रीरामसन्निधौ मौनी मन्त्रार्थमनुचिन्तयन्। व्याघ्रचर्मासने स्थित्वा स्वस्तिकाद्यासनक्रमात्॥ ...अभ्यर्च्य वैष्णवे पीठे जपेदक्षरलक्षकम्	रामर. ४।५
श्रीरामसान्निध्यवशाज्जगदा(नन्द)धारकारिणी। उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम्॥ सीता भगवती ज्ञेया मूलप्रकृतिसंज्ञिता [सीतो. ४+	रामो. १।५,६
श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः	रामो. ता. ३।४
श्रीरामः शरणं मम (अष्टारम ::)	रामर. २।३८
श्रीरामः सामात्मकोऽपि अकारः। श्रीकृष्णः अर्धमात्रात्मकोऽपि	राधो. २।२
श्रीरामो ब्रह्म तारकम्	रामर. १।६
श्रीरिति लक्ष्मीरिति लक्ष्यमाणा भगवतीति विज्ञायते	सीतो. ९
श्रीर्मे भजतु, अलक्ष्मीर्मे नश्यतु	महाना. ५।८
श्रीर्ह वा एषां स्त्रीणां यन्मलोद्वासाः, तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमंत्रयेत	बृह. ६।४।६
श्रीलक्ष्मीर्वरदा विष्णुपत्नी वसुप्रदा हिरण्यरूपा	सौभाग्य. ४
श्रीवत्सकौस्तुभवनमालाङ्कितवक्षसं...निरतिशयाद्वैतपरमानन्दलक्षणमादिनारायणं ध्यायेत्	त्रि.म.ना.७।१४
श्रीवत्सकौस्तुभोरस्कं मुक्तामणिविभूषितम्।...एवं ध्यायेन्महाविष्णुमेवं वा विनयान्वितः	ध्या. बिं. २८
श्रीवत्सस्य स्वरूपं तु वर्तते लाञ्छनैः सह। श्रीवत्सलक्षणं तस्मात्कथ्यते ब्रह्मवादिभिः	गोपालो. २।२७

श्रीविष्णुं सर्वेश्वरं भजन्ति	यज्ञोप. १
श्रीवैष्णवा भुवनमाशु पवित्रयन्ति	सुदर्श. १३
श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्तिं चानृण्यतां ब्रह्मण्यं बहुपुत्रताम् ! श्रद्धामेधे प्रज्ञा तु जातवेदः सन्ददातु स्वाहा	महाना. १४।६
श्रीसखि त्वं सदानन्दे मुकुन्दस्य सदा प्रिये । वरदाभयहस्ताभ्यां मां विलोकय दुर्लभे !	तुलस्यु. ५
श्रीसरस्वतिरूपा पदक्रममन्त्रब्राह्मणकल्पशरीरा सावित्री गोत्रे ब्रह्मदेया भवति	सन्ध्यो. २.३
श्री पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धिया वसु [सरस्व. १०+	ऋ.मं. १।३।१०
श्री श्री सोऽहमर्कमहमहं ज्योतिरहं शिवः । आत्मज्योतिरहं शुक्रः सर्वज्योतीरसोऽस्म्यहम्	वनदु. १२२
श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति	प्रश्नो. ४।५
श्रुतं मे गोपाय [तैत्ति. १।४।१+	ना. प. ४।४२
श्रुतं मे मा प्रहासीः	२ऐत. शां.पा.
श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति	प्रश्नो. ४।५
श्रुतं सर्वमसद्विद्धि वेदं सर्वमसत्सदा । शास्त्रं सर्वमसद्विद्धि, ह्यहं सत्यचिदात्मकः	ते. बिं. ३।५०
श्रुतꣳ ह्येव मे भगवद्दृशेभ्यः [छांदो. ४।९।३+	७।१।३
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्	भत्रसं. ३।५
श्रुतिविप्रतिपन्ना ते	भ. गी. २।५३
श्रुतिशास्त्राण्यहम् । मन्त्रोऽहम्	अद्वै. भा. २
श्रुतिस्मृतिसदाचारधारणध्यानकर्मणः । मुख्यया व्याख्यया ख्याताञ्छ्रयति श्रेष्ठपण्डितान्	अक्ष्युप. १४
श्रुतेनापिहिता गुहा	इतिहा. १६

श्रुतो विस्तरशो मया	भ. गी. ११।२
श्रुत्याचार्योपदेशेन मुनयो यत्पदं ययुः । तत्स्वानुभूतिसंसिद्धं स्वमात्रं ब्रह्म भावये	मैत्रे. शीर्षकं
श्रुत्या यदुक्तं परमार्थमेव तत्संशयो नात्र ततः समस्तम् । श्रुत्या विरोधे न भवेत्प्रमाणं भवेदनर्थाय विनाप्रमाणम्	ब्र. वि. ३२
श्रुत्युत्पन्नात्मविज्ञानप्रदीपो बाध्यते कथम् । अनात्मतां परित्यज्य..	वराहो. २।४९
श्रुत्वा दृष्ट्वा न कम्पेत शोकहर्षौ त्यजेद्यतिः	ना. प. ४।१०
श्रुत्वाऽन्येभ्य उपासते	भ. गी. १३।२६
श्रुत्वाऽप्येनं वेद न चैव कश्चित्	भ. गी. २।२९
श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा घ्रात्वा च यो नरः। न हृष्यति ग्लायतिवासविज्ञेयोजितेन्द्रियः	ना. प. ३।३९
श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा ज्ञात्वा शुभाशुभम् । न हृष्यति ग्लायति यः स शान्त इतिकथ्यते	महोप. ४।३२
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् । वर्धमाने तथाभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः	ना. बिं. ३३
श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयोमन्दोयोगक्षेमाद्वृणीते	कठो. २।२
श्रेयस्त्वं मनसा प्राप्तं तावत्तत्त्वस्य का कथा	अमन. २।५६
श्रेयः परमवाप्स्यथ	भ. गी. ३।११
श्रेयान् द्रव्यमयाद्यज्ञात्	भ. गी. ४।३३
श्रेयान् वस्यसोऽसानि स्वाहा	तैत्ति. १।४।९
श्रेयान् स्वधर्मो विगुणः [भ. गी.	३।३५+१८।४७
श्रेयो धीरोऽभिप्रेयसो..(मा.पा.)	कठो. २।२
श्रेयो भोक्तुं भैक्ष्यमपीह लोके	भ. गी. २।५
श्रेयोविघ्नाः सर्वे प्रलयं यान्ति	त्रि.म.ना. ५।४
श्रेयो हि ज्ञानमभ्यासात्	भ. गी. १२।१२
श्रेष्ठं सर्वधातमित्याचामति	छांदो. ५।२।७

श्रोता सर्वगता ह्येषा तृतीया भूमिकाऽत्र हि	अक्ष्युप. ३२
श्रोतव्यमेवाप्येति यः श्रोतव्यमेवास्तमेति	सुबालो. ९।२
श्रोतव्यस्य श्रुतस्य च	भ. गी. २।५२
श्रोता मन्ता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता । सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात्	३ ऐत. २।४।८
श्रोता मन्ता द्रष्टा देष्टा स्प्रष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां पुरुषाणामन्तःपुरुषः स आत्मा विज्ञेय इति	त्रि. ता. ५।१
श्रोता घ्राता रसयिता नेता कर्ता विज्ञानात्मा पुरुषः	१ आत्मो. २
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वम्पदेरितम्	शु. र. ३।६
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणास्तद्वृत्तयः	पैङ्गलो. २।४
श्रोत्रपतिर्विज्ञानपतिः, एतत्ततो भवति	तैत्ति. १।६।२
श्रोत्रमध्यात्मं शब्दश्रवणमितीन्द्रियाण्यन्वभवन्	२ प्रणवो. ३
श्रोत्रमयः पृथ्वीमय आपोमयः	बृह. ४।४।५
श्रोत्रमस्मात्सर्वाञ्छब्दानभिविसृजते	कौ. त. ३।४
श्रोत्रमाकाशे वायौ त्वगग्नौ चक्षुरप्सु जिह्वा पृथिव्यां घ्राणमिति	शारीरको. १
श्रोत्रमात्मनि चाध्यस्तं स्वयं पशुपतिः पुमान् । अनुप्रविश्य श्रोत्रस्य ददाति श्रोत्रतां शिवः	पा. ब्र. १६
श्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव	१ ऐत. १।४।४
श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्धासुराः पाप्मना विविधुः	छांदो. १।२।५
(अथ ह) श्रोत्रमूचुस्त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायत्: श्रोत्रे भोगस्तं देवेभ्य आगायत्	बृह. १।३।५
श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः	छांदो. ३।१८।६
श्रोत्रमेवाप्येति यः श्रोत्रमेवास्तमेति	सुबालो. ९:२
श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्त इत्येनदुपासीत	बृह. ४।१।५
श्रोत्रमेवास्या एकमङ्गमुदूढं, तस्य शब्दः परस्तात्प्रतिविहिता भूतमात्रा	कौ. त. ३।५
श्रोत्रयोः शब्दग्रहणं, जिह्वायाः...	ना. प. ६।३
श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचꣳ स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रत्यास्माल्लोकादमृता भवन्ति	केनो. १।२
श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः	बृह. ४।४।१८
श्रोत्रं चक्षुः स्पर्शनं च	भ. गी. १५।९
श्रोत्रं च श्रोतव्यं च नारायणः	सुबालो. ६।१
श्रोत्रं ते मयि जुहोम्यसौ स्वाहा	कौ. त. २।४
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमम्	दुर्वासो. २।१३
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चमम् (षोडश विकाराः)	शारीरको. १३
श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोति	बृह. १।४।१७
श्रोत्रं नाम देवतावरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यैवस्वाहा	कौ. त. २।३
श्रोत्रं परस्तान्मन आरुन्धे	कौ. त. २।२
श्रोत्रं प्राविशदशयदेव	१ ऐत. १।४।६
श्रोत्रं मे त्वयि दधानीति पिता, श्रोत्रं ते मयि दध इति पुत्रः	कौ. त. २।१५
श्रोत्रं लोको मनो ज्योतिः, यो.. पुरुषं विद्यात्...	बृह. ३।९।१३
श्रोत्रं वाव सम्पत्	छांदो. ५।१।४
श्रोत्रं वै ग्रहः, स शब्देनातिग्रहेण गृहीतः श्रोत्रेणहिशब्दाञ्छृणोति	बृह. ३।२।६
श्रोत्रं वै ब्रह्म	बृह. ४।१।५
श्रोत्रं वै सम्पत्	बृह. ६।१।४
श्रोत्रं वै सम्राट् परमं ब्रह्म	बृह. ४।१।५
श्रोत्रं शृण्वत् सर्वे प्राणा अनुशृण्वन्ति	कौ. त. ३।२
(यः) श्रोत्रं संश्रावयितृ संश्रावयितृमान्भवति (प्राणस्य ब्रह्मणः)	कौ. त. २।१
श्रोत्रं सर्वैः शब्दैः सहाप्येति (पुरुषं) [कौ. त. ३।३+	४।१९

श्रोत्रꣳ होच्चक्राम, तत्संवत्सरं प्रोष्य (आगत्य)पर्येत्योवाच... [छांदो. ५।१।१०+	बृह. ६।१।१०
श्रोत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषः	बृह. २।५।६
श्रोत्राक्षिकटिगुल्फप्राणगलस्फिग्देशेषु व्यानः सञ्चरति	शांडि. १।४।७
श्रोत्रादीनि ज्ञानेन्द्रियाणि	शारीरको. १
श्रोत्रादीनीन्द्रियाण्यन्ये	भ. गी. ४।२६
श्रोत्राद्दिशः (निरभिद्यन्त)	२ ऐत. १।४
श्रोत्राद्वायुश्च प्राणश्च हृदयात्सर्वमिदं जायते	सुबालो. १।९
श्रोत्राय स्वाहाऽऽयतनाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति...	बृह. ६।३।२
श्रोत्रियस्य चाकामहतस्य, ते ये शतं मनुष्यगन्धर्वाणामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य चाकामहतस्य ते ये शतं देवगन्धर्वाणामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतमाजानजानां देवानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं देवानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं कर्मदेवानां देवानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं पितृणां चिरलोकलोकानामानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतमिन्द्रस्यानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं प्रजापतेरानन्दाः	तैत्ति. २।८
श्रोत्रियस्य...ते ये शतं बृहस्पतेरानन्दाः	तैत्ति. २।८
श्रोत्रियस्य दारेण नोपहासमिच्छेत्	बृह. ६।४।१२
श्रोत्रियस्य...स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः	तैत्ति. २।८
श्रोत्रियं ब्रह्मनिष्ठं स्वगुरुं गच्छेद्यथाविधि	रुद्रहृ. ३५

श्रोत्रियान्नं न भिक्षेत श्रद्धाभक्तिबहिष्कृतम् । व्रात्यस्यापि गृहे भिक्षेच्छ्रद्धाभक्तिपुरस्कृते	१ सं.सो.२।६४
श्रोत्रे आघारौ (शारीरयज्ञस्य)	प्रा. हो. ४।२
सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं परमं पदं, यत्र गत्वा न निवर्तन्ते योगिनः	नृ. पू. ५।१६
सदा नादानुसन्धानात् संक्षीणा वासना भवेत् (तु या)	
[ना. बिं. ४९+	यो. शि. ६।७१
सदा बुद्धिमता भाव्यं योगिना योगसिद्धये	१ यो. त. ७५
सदाभ्यासे स्थिरीभूते न विधिर्नैव च क्रमः	अमन. २।५२
सदाऽमनस्कमर्घ्यम् [मं.ब्रा. २।५+	आत्मपू. १
सदा योगं समभ्यसेत्	अ. ना. २३
सदा रसनया योगी मार्गं न परिसङ्क्रमेत्	यो. कुं. २।४८
सदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये । न ते संसारिणो नूनं राम एव न संशयः	रामो. २।९
सदाविचाररूपोऽस्मि निर्विचारोऽस्मि सोऽस्म्यहम्	मैत्रे. ३।१०
सदा वेदान्तवाक्यार्थं शृणुयात्सुसमाहितः	ना. प. ६।२४
सदाशिवः शक्त्यात्मा सर्वत्रावस्थितः स्वयञ्ज्योतिः शुद्धो बुद्धो नित्यो निरञ्जनः शान्तः प्रकाशत इति	हंसो. ११

(अथ) सदाशिवः संहारकाले संहारं कृत्वा संहाराक्षं मुकुलीकरोति	रु. जा. ४४
सदाशिवाय विद्महे सहस्राक्षाय धीमहि। तन्नः साम्बः प्रचोदयात्	वनदु. १४१
सदाशिवोऽहं, परमप्रकृतिरहम्	अद्वै. भा. १
सदाऽसङ्गस्वरूपोऽस्मि निर्विकारोऽहमव्ययः	ते. बिं. ३।६
सदा सच्चिन्मयोऽस्म्यहम्	मैत्रे. ३।१६
सदासन्तोषो विसर्जनम्	आत्मपू. १
सदा समाधि कुर्वीत हंसमन्त्रमनुस्मरन्	ब्र. वि. ६२
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः। इति धीर्या मुनिश्रेष्ठ स समाधिरिहोच्यते	जा. द. १०।५
सदा साङ्ग्रहणेष्ट्याऽश्वमेधमन्तं योगं यजते, स महामखो महायोगः	अवधू. ६
स दिग्भिर्ज्योतिषा भाति च तपति च	छांदो. ३।१८।६
सदिति प्राणः, तीत्यन्नम्, यमित्यसावादित्यः। (तत्सत्यम्)	१ ऐत. १।५।३
सदित्येतत् स युज्यते	भ. गी. १७।२६
सदित्येवाभिधीयते	भ.गी. १७।२७
सदृशं चेष्टते स्वस्याः	भ. गी. ३।३३
सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्	२ प्रणवो. १५
सदेवद्राधिका गान्धर्वीति	गाथिको. ५
सदेव पुरस्तात् सिद्धं हि ब्रह्म	नृसिंहो. ९।६
सदेव समः स मुनिसमः स नागसमः	गणेशो. ५।४
सदेव सोम्येदमग्र आसीत् [छां. उ. ६।२।१+	पैङ्गलो. १।१
स देवानपि गच्छति स ऊर्जमुपजीवति	बृह. २।५।२
स देवानपि गच्छति स ऊर्जमुपजीवति	बृह. १।५।१
स देवानाकर्षयति, स यक्षानाकर्षयति, स नागानाकर्षयति, स महानाकर्षयति	नृ. पू. ५।१२
स देवानां निधनमनिधनम्	ब्रह्मो. १
सदैकरसरूपोऽस्मिसदाचिन्मात्रविग्रहः	ते. बिं. ३।७
सदैवात्मा विशुद्धोऽस्मि	यो. शि. ४।२०
सदैवानुज्ञैकरसो ह्ययमोङ्कारः,	नृसिंहो. ८।५
सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्ध-(रहितः)-हरः [गणेशो. १।४+नृसिंहो. २।८+	रामो. २।४
सदोपनिषदं विद्यामभ्यसेन्मुक्तिहैतुकीम्	ना. प. ३।७२
सदोषमपि न त्यजेत्	भ. गी. १८।४८
सद्गुरुसमीपे सकलविद्यापरिश्रमज्ञो भूत्वा... ब्रह्मचर्यं समाप्य गृही भवेत्	प. हं. प. १
सद्घनं चिद्घनं नित्यमानन्दघनमव्ययम्	अध्यात्मो. ६१
सद्धीदं सर्वं सत्सदिति	नृसिंहो. ७।३
सद्भावभावनादार्ढ्याद्वासनालयमश्नुते	अध्यात्मो. १३
सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै	अ. शां. ५७
सद्भावे साधुभावे वा	भ. गी. १७।२६
सद्यःकुमारिकारूपैः पाके सिद्धे जगद्भवेत्	ते. बिं. ६।७९
सद्योजातमुत जहात्येषः	चित्यु. १४।१
सद्योजातशिशुज्ञानं	अ. पू. ३।१६
सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः [महाना.१०।४+तै.	आ. १०।४३।१
सद्योजातं मही पूषा रमा ब्रह्मा त्रिवृत्स्वरः	पञ्चब्र. १
सद्योजाता तु या कन्या भोगयोग्या भवेज्जगत्	ते. बिं. ६।९१
सद्योजातात्पृथिवी	बृ. जा. १।५
सद्योजातादिपञ्चब्रह्ममंत्रैः परिगृह्य ...रेखाः प्रकुर्वीत	का. रुद्रो. २
सद्योजातादिपञ्चब्रह्ममन्त्रैर्भस्म सङ्गृह्य...रेखाः प्रकुर्वीत	जाबाल्यु. ६
सद्योजातादिभिर्मंत्रैर्नमस्कृत्य पुनः पुनः। प्रदक्षिणत्रयं कृत्वा शिवरूपामति स्फुटम्	१ बिल्वो. ८

सद्योजाताद्ब्राह्मणाः सम्बभुवुः	सि. शि. ९
सद्योजातेन वै पादान् सर्वाङ्गं प्रणवेन तु [बृ. जा. ३।३२+	४।१
सद्रूपस्त्वं सदा मम	वराहो. ३।९
सद्रूपया माययोत्पादिताः कामक्रोधादयो गुणाः संसारोत्पत्तिप्रयोजका भवन्ति	सामर. १०२
सद्रूपं परमं ब्रह्म त्रिपरिच्छेदवर्जितम्	कठरु. ३०
सद्वाऽसद्वा स्थितिर्वापि यस्य नास्ति क्षराक्षरम्	ते. बिं. ५।११
सद्वैतमनिर्वाच्यं ब्रह्म	त्रि.म.ना. १।३
स द्वितीयमैच्छत्	बृह. १।४।३
सद्वृत्तमिव सर्वे देवास्तं सेवन्ते	त्रि.म.ना. ८।७
स ध्यातपूर्वामुखो भूत्वा भूरिति व्याहृतिर्गायत्रं छन्द ऋग्वेदः	चतुर्वे. १
स न इन्द्रः कामवरं ददातु	चित्यु. ११।८
सनत्सुजातादिसनातनाद्यैरीड्यो महेशो भगवानादिदेवः	शरभो. २०
स न दह्यतेऽथ मुच्यते	छांदो. ६।१६।२
स न साधुना कर्मणा भूयान्, नो एवासाधुना कनीयान्	बृह. ४।४।२२
स नः पर्षदतिदुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यग्निः	महाना. ६।१७
स नः सुवः संशिशाधि	महाना. ६।६
सनातनस्त्वं पुरुषो मतो मे	भ.गी. ११।१८
स नात्मतैकः स आत्मानमभिध्यायन् बह्वीः प्रजा असृजत्	मैत्रा. २।६
स नारायणो भवतीत्युपनिषत्	त्रि.म.ना. २।९
स नारायणो विराट्पुरुषो भवति	ना.उ.ता. ३।१
स नाराशꣳसीरधीते स प्रणवमधीते	ग. शो. ५।४
स निधीनां त्वं निधिपतिः	ग. शो. २।१
स निन्दामर्षसहिष्णुः । स षडूर्मिवर्जितः	प. हं. प. ११
स नियच्छति मधुकरः श्वेत्र विकर्मकः	पैप्प. १
स निर्गुणः स निरहङ्कारः स निर्विकल्पः स निरीहः स निर्विकारः...	गणेशो. २।४
स निर्देष्टुमशक्यो यो वेदवाक्यैरगम्यतः । यस्य किञ्चिद्बहिर्नास्ति किञ्चिदन्तः कियन्न च	ते. बिं. ५।९
स निश्चयेन योक्तव्यः	भ. गी. ६।२३
स निष्कर्ममार्गीयो भवति	सामर. ९८
स नैव व्यभवत्, स शौद्रं वर्णमसृजत	बृह. १।४।१३
स नैव व्यभवत्, स विशमसृजत	बृह. १।४।१२
स नैव व्यभवच्छ्रेयोरूपमसृजत	बृ. उ. १।४।१४
स नोत्तस्थौ, तं पाणिनापेषं बोधयाञ्चकार	बृह. २।१।१५
स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा	महाना. २।५
स नो बुद्ध्या शुभया संयुनक्तु [श्वेता.	४।१+४।१२
स नो भूतो यो वाऽमृतात्मा सुपुष्टिमस्मत्पितरं पवित्रं स नोऽस्तु भूत्यैकमलं परायस्वाहा	पारमा. ९।९
स नो मुञ्चतु दुरितादवद्यात्	सहवै. ९
स नो मृत्योस्त्रायतां पात्वꣳहसो ...ज्योग्जीवा जरामशीमहि	महाना. १३।९
स नो हि मायया जन्म युज्यते न तु तत्त्वतः	अद्वैत. २७
सन्ततꣳ शिलाभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्	महाना. ९।८
सन्तमेनं ततो विदुः	तैत्ति. २।६
सन्ति पुत्राः सुबहवो दरिद्राणामनिच्छताम् । नास्ति पुत्रः समृद्धानां विचित्रं विधिचेष्टितम्	भवसं. १।१२
सन्तिष्ठेन्नियमेन	लिङ्गोप. १
सन्तीन्द्रियाणि सन्त्यर्था...योगो न च नास्ति रुक्	आयुर्वे. ३
सन्तुष्ट इति कथ्यते	महो.४।३६,३७
सन्तुष्टः सततं योगी	भ.गी. १२।१४
सन्तुष्टो येन केनचित्	भ.गी. १२।१९

सन्ते पयांसि समु यन्तु वाजा..	कौ. त. २।८
सन्तोषामृतपानेन ये शान्तास्तृप्तिमागताः । आत्मारामा महात्मानस्ते महापदमागताः	महो. ४।३५
सन्तोषामोदमधुरा प्रथमोदेति भूमिका । भूमिप्रोदितमात्रोऽन्तरमृताङ्कुरिकेव सा	अक्ष्युप. ३०
सन्तोषो नाम यदृच्छालाभसन्तुष्टिः	शांडि. १।२।१
सन्त्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम्	मुक्तिको.२।२१
सन्त्यजेत्सर्वकर्माणि लोकाचारं च सर्वशः । कृमिकीटपतङ्गांश्च तथा योगी वनस्पतीन्	ना. प. ६।४१
सन्त्यज्य हृद्गुहेशानं देवमन्यं प्रयन्ति ये । ते रत्नमभिवाञ्छन्ति त्यक्तहस्तस्थकौस्तुभाः	महो. ६।२०
सन्त्वा सिञ्चामि मन्त्रेण गोमूत्रं गोमये क्षिपेत्	बृ. जा. ३।९
सन्दिग्धः सर्वभूतानां वर्णाश्रमविवर्जितः । अन्धवज्जडवच्चापि मूकवच्च महीं चरेत्	ना. प. ४।३६
सन्दिग्धायामपि भृशं शुभामेव समाचर । शुभायां वासनावृद्धौ न दोषाय मरुत्सुत	मुक्तिको. २।९
सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः	भ.गी. ११।२७
सन्देहस्त्वेव आत्मन इति होवाच	छांदो. ५।१५।२
सन्देहस्ते व्यशीर्यद्यन्मां नागमिष्य इति	छांदो. ५।१५।२
सन्धां च याꣳ सन्धे ब्रह्मणैषः	चित्यु. १४।२
सन्धिनी तु धामभूषणशय्यासनादिमित्रभृत्यादिरूपेण परीता	राधिको. ९
सन्धिं कृत्वा तु मनसा चिन्तयेदात्मनाऽऽत्मनि	अ. ना. ३२
सन्धिं समाधावात्मन्याचरेत्	आरुणि. २
सन्धीयते प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन	तैत्ति. १।३।९
सन्धुः सन्धुक्षणानां संयोगः सन्दधानः	पात्मा. ४।६
सन्धौ जीवात्मनोरैक्यं सन्न्यासः परिकीर्तितः	मैत्र. २।१७
सन्धौ सन्धौ मिश्रितानां यदा विश्राम्यते मनः । तदा देहो गृहं राज्यं निर्दोषा च मतिर्भवेत्	विश्रामो. ९
सन्ध्ययोर्ब्राह्मणः काले वायुमाकृष्य यः पिबेत् । त्रिमासात्तस्य कल्याणी जायते वाक्सरस्वती	शांडि. १।७।४६
सन्ध्ययोर्ब्रह्मकालेऽपि मध्याह्ने वाऽथवा सदा । बाह्यं प्राणं समाकृष्य पूरयित्वोदरेण च । नासाग्रे नाभिमध्ये च पादाङ्गुष्ठे च धारयेत् ।। सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं नरः	जा. द. ६।२१
सन्ध्यं तृतीयꣳ स्वप्नस्थानम्	बृह. ४।३।९
सन्ध्याक्रिया मनोयागस्य लक्षणम्	पा. ब्र. ३
सन्ध्यामुपास्य कुर्वीत नित्यं देहप्रसाधनम् । स्पृशेद्वन्देच्च कपिलां प्रदद्याच्च गवां हितम्	शिवो. ७।९२
सन्निधानात्समस्तेषु जन्तुष्वपि च सन्ततम् । सूचकत्वाच्च रूपस्य सूत्रमित्यभिधीयते	यो. शि. २।१०
सन्नियम्येन्द्रियग्रामं	भ. गी. १२।४
सन्मात्रमहमेव हि	ते. बिं. ३।५९
सन्मात्राभास्म्यहं सदा	मैत्रे. ३।२३
सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयानन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगतः	नृसिंहो. ९।५
सन्मात्रोनिरस्ताविद्यातमोमोहोऽहं..	नृसिंहो. २।८
सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः	छांदो.६।८।४,६
सन्न्यस्तमिति यो ब्रूयात्कण्ठस्थप्राणवानपि । तारिताः पितरस्तेन इति वेदानुशासनम्	शाट्याय. ३२
सन्न्यस्तसर्वेन्द्रियवर्गोऽनेकजन्मार्जितपुण्यपुञ्जपक्वकैवल्यफलो-	

ऽखण्डानन्दनिरस्तसर्वक्लेशकश्मलो ब्रह्माहमस्मीति कृतकृत्यो भवति	मं. ब्रा. २।३
सन्न्यस्तसर्वसङ्कल्पः समः शान्तमना मुनिः। सन्न्यासयोगयुक्तात्मा ज्ञानवान्मोक्षवान्भव	अ. पू. ५।४७
सन्न्यस्तं मया सन्न्यस्तं मया सन्न्यस्तं मयेति मन्द्रमध्यमतारध्वनिभिस्त्रिवारं त्रिगुणीकृतप्रेषोच्चारणं कृत्वा...तत्त्वमस्यादिवाक्यार्थस्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत्	प. हं. प. ५
सन्न्यस्तं मया, सन्न्यस्तं मया, सन्न्यस्तं मयेति त्रिरुक्त्वाऽभयं सर्वभूतेभ्यो मत्तः प्रवर्तते	आरुणि. ३
सन्न्यस्तं मयेति त्रिवारमभिमंत्रयेत्	१ सं. सो. २।६
सन्न्यस्तं मयेति त्रिवारमुच्चरेत्	याज्ञव. १
सन्न्यस्ता यद्यपि महावाक्योपदेशे नाधिकारिणः [ना.प. ३।१+	१ सं. सो. २।३
सन्न्यस्याग्निं न पुनरावर्तनं यन्मन्युर्जायामावहदिति	२सन्न्यासो. १०
सन्न्यस्याग्निं न पुनरावर्तयन्मृत्युर्जयमावहमित्यध्यात्ममन्त्रान्पठेत्	कठरु. ४
सन्न्यस्याग्निं न पुनरावर्तयेत्। यन्मन्युर्जायामावहेदित्यध्यात्ममन्त्राञ्जपेत्	कठश्रु. २२
सन्न्यस्यास्ते सुखं वशी	भ. गी. ५।१३
सन्न्यस्याध्यात्मचेतसा	भ. गी. ३।३०
सन्न्यासकालेऽप्यलंबुद्धिपर्यन्तमधीत्य तदनन्तरं कटिसूत्रं कौपीनं दण्डं वस्त्रं कमण्डलुं सर्वमप्सु विसृज्याथ जातरूपधरश्चरेत्	ना. प. ५।६
सन्न्यासभेदैराचारभेदः कथं ? इति चेत्—तत्त्वतस्त्वेक एव सन्न्यासः, अज्ञानेनाशक्तिवशात्कर्मलोपश्च त्रैविध्यमेत्य... चातुर्विध्यमुपागतः	ना. प. ५।२
सन्न्यासयोगयुक्तात्मा	भ. गी. ९।२८
सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः	मुण्ड. ३।२।६
सन्न्यासयोगिनौ दान्तौ विद्धि शान्तौ मुनीश्वर	महो. ६।४७
सन्न्यासस्तु महाबाहो	भ. गी. ५।६
सन्न्यासस्य महाबाहो	भ. गी. १८।१
सन्न्यासं कर्मणां कृष्ण	भ. गी. ५।१
सन्न्यासं कवयो विदुः	भ. गी. १८।२
सन्न्यासं पातयेद्यस्तु पतितं न्यासयेत्तु यः। सन्न्यासविघ्नकर्ता च त्रीनेतान्पतितान्विदुः	१ सं. सो. २।२
सन्न्यासः कर्मयोगश्च	भ. गी. ५।२
(सः) सन्न्यासः षड्विधो भवति कुटीचक-बहूदक-हंस-परमहंस-तुरीयातीतावधूताश्चेति	१ सं.सो. २।१३
सन्न्यासः षड्विधो भवति—कुटीचको बहूदको हंसः परमहंसः तुरीयातीतोऽवधूतश्चेति	ना. प. ५।५
सन्न्यासिनं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः। एष मे मण्डलं भित्त्वा परं ब्रह्माधिगच्छति	१ सं. सो. २।६
सन्न्यासिनां पण्डितशास्त्रिणां च पाण्डित्यमस्तीह परोपदेशे। स्वयं न कुर्वन्ति विधिं न सान्ध्यं भवन्तु लोकाः खलु सावधानाः	भवसं. १।५८
सन्न्यासिनोऽपि दृश्यन्ते देवसन्दूषिताशयाः	याज्ञव. ५
सन्न्यासेन देहत्यागं करोति स परमहंसपरिव्राजको भवति	प. हं. प. ८
सन्न्यासेन देहत्यागं करोति स परमहंसो नामेति	याज्ञव. ३
सन्न्यासेनाधिगच्छति	भ. गी. १८।४९
सन्न्यासे निश्चयं कृत्वा पुनर्न च करोति यः। स कुर्यात्कृच्छ्रमात्रं तु पुनः संन्यस्तुमर्हति	१ सं. सो. २।१
सन्न्यासोपनिषद्वेद्यं संन्यासिपटलाश्रयम्। सत्तासामान्यविभवं स्वमात्रमिति भावये	१सं.सो. शीर्षकं
सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यो भवति	ना. प. ३।८७

स पञ्चधाऽऽत्मानं प्रविभज्योच्यते यः प्राणोऽपानः समान उदानो व्यान इति	मैत्रा. २।६
स पञ्चभूतानां रजोंशांश्चतुर्धा कृत्वा भागत्रयात्पञ्चवृत्त्यात्मकं प्राणमसृजत्	पैङ्गलो. १।४
स परमहंसः सोऽवधूतः स ब्राह्मणः	निरा. ३२
स परमानन्दस्य ब्रह्मणो नाम ब्रह्मेति	नृसिंहो. ७।३
स परिव्राद् सर्वक्रियाकारकनिवर्तकः	ना. प. ९।२२
स परेऽक्षरे आत्मनि सम्प्रतिष्ठते	प्रश्नो. ४।९
सपर्परीरमतिं बाधमानां बृहन्मिमाय जमदग्निदत्ता । आ सूर्यस्य दुरिता ततानश्रवो देवेष्वमृतमजुर्यम् [ऋक्सं.३।३।२२।१+	हयग्री. ९
स पर्यगाच्छुक्रमकायमव्रणं मस्नाविरꣳ शुद्धमपापविद्धम्	ईशा. ८
स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वम्	छांदो. ७।२५।१
स पुत्र-मित्र-कलत्राप्तबन्ध्वादीनि... संन्यस्य...कटिसूत्रं च कौपीनं दण्डं वस्त्रं कमण्डलुं सर्वमप्सु विसृज्याथ जातरूपधरश्चरेदात्मानमन्विच्छेत्	ना. प. ३।८७
स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठति	बृह. १।५।१७
स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति	बृह. १।५।१७
स पुनर्द्विविधो बिन्दुः पाण्डरो लोहितस्तथा । पाण्डरं शुक्लमित्याहुर्लोहिताख्यं महारजः	यो. चू. ६०
स पूजितः सन् सुमुखोऽभिभूत्वा दन्तीमुखोऽभीष्टमनन्तशक्तिः	हेरम्बो. १०
स पूर्णः खलु वा अद्धाऽविकलः सम्पद्यते यज्ञः	मैत्रा. १।१
स पूर्ववज्जनयज्जन्तवे धनम्	चित्यु. १०।४
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया नि-(मि-)-हिताः सप्त सप्त [मुण्ड. २।८+	महाना. ८।२
सप्तकोटियोजनविस्तीर्णो विष्णुलोकः	राधोप. १।३

सप्तकोटिमहामन्त्रं जन्मकोटिशतप्रदम्	ते. बिं. ३।७३
सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः	३ ऐत. २।१।२
सप्तजन्मकृतात्पापान्मुच्यते यस्तु पर्वभिः । कन्यागते यदा सूर्ये तिष्ठन्ति पितरो गृहे	इतिहा. ८८
सप्तद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया यां काञ्चिद्गांदद्यात्सा दक्षिणाभवति	नृ. पू. ५।८
सप्तधातुमयं देहमग्निना रञ्जयेद्ध्रुवम् । व्याधयस्तस्य नश्यन्ति..	यो. शि. १।५६
सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समि(धा)-धः सप्त होमाः [मुण्ड. २।१।८+	महाना. ८।२
सप्तभूमिषु जीवन्मुक्ताश्चत्वारः	वराहो. ४।१
सप्तमभूम्यां विहरन्ब्रह्मविद्वरिष्ठो भवति	वराहो. ४।१
सप्तमं परमं तत्त्वं यो जानाति स मोक्षभाक्	अमन. १।१३
सप्तमं भ्रूचक्रमंगुष्ठमात्रम्	सौभाग्य. ३०
सप्तमः सूर्यो भवति	ना.पू.ता. १।१
सप्तमी तुर्यगा स्मृता (ज्ञानभूः)	महो. ५।२५
सप्तमे गूढविज्ञानं परावाचा तथाऽष्टमे	हंसो. ९
सप्तमे चलनसमर्थो भवति	निरुक्तो. १।४
(ॐ) सप्तमे जम्बूद्वीपः सम्यग्ज्ञानं शिखा	मठाम्ना. ९
सप्तमे धामनि तृतीयमेतस्या एव पूर्वोक्तायाः कामाद्यं द्विधाधःकं मदनकलाद्यं शक्तिबीजं वाग्भवाद्यं तयोरर्धविशिरस्कं कृत्वा नन्दिदविद्येयम्	त्रि. ता. १।१६
सप्तमेन तु पिण्डेन दीर्घमायुः प्रजायते	पिण्डो. ७
सप्तमे मासे जीवेन संयुक्तो भवति	गर्भो. ३
सप्तमे रक्तवर्णो विष्णुरिति द्वारपालाः	राधोप. २।१
सप्तयुञ्जन्ति रथमेकचक्रम् [ऋ.मं.१।१६४।२+अथर्व.९।९।२+	चित्यु. ११।८ तै.आ. ३।११।८

सप्तरात्रलयेनापिपरेलीनस्य योगिनः। स्या ब्रह्मविश्वनेतृत्वं श्रुतिज्ञानं च वर्तते	अमन. १।५७
सप्तरात्रोषितं बुद्बुदं भवति	गर्भो. ३
सप्तर्षीणां ध्रुवस्यापि लोका ऊर्ध्वरदावली	गुह्यका. १६
सप्तवक्त्रं तु रुद्राक्षं सप्तमालाधिदैवतम् । तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम्	रु. जा. ३१
(अथ) सप्तविधस्य वाचि सप्तविधं सामोपासीत	छांदो. २।८।१
सप्तविंश इति प्रोक्तः शिवः सर्वजगत्पतिः	शिवो. १।१४
सप्तशतं पुरुषस्य मार्गाणि	निरुक्तो. २।१
सप्त सागरा जायन्ते पुरुषोत्तमात्	सि. वि. २
सप्तस्वरमयो नादो लौकिकालौकिकात्मकः । ब्रह्मानन्दानुसन्धायी येनेदं धार्यते जगत्	गान्धर्वो. २
सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि	बृह. २।२।१
सप्तहोता सप्तधा विक्लृप्तः	चित्यु. ११।६
सप्तात्मानं चतुरात्मान चतुस्सप्तात्मानमोङ्कारं (सर्वेश्वरं द्वादशान्ते) तुरीयमानन्दामृतरूपं षोडशान्ते	नृसिंहो. ३।४
सप्तार्चिषः समिधः सप्त होमाः	मुण्ड. २।१।८
सप्तात्मानं चतुरात्मानं मकारं ब्रह्माणं नाभौ	नृसिंहो. ३।४
सप्तात्मानं चतुरात्मानं मकारं रुद्रं भ्रूमध्ये	नृसिंहो. ३।४
सप्तात्मानं चतुरात्मानमुकारं विष्णुं हृदये	नृसिंहो. ३।४
सप्तार्चिषः समिधा सप्त जिह्वाः	महाना. ८।२
सप्तास्यासन् परिधयः[मुद्गलो.१।६+ [ऋ. मं. १०।९०।१५+	चित्यु. १२।३ वा. सं. ३१।१५
स प्रजानन्प्रतिगृभ्णीत विद्वान्	सहवै. ९
स प्रजापतिरानुष्टुभाभ्यामर्धर्चाभ्यामहोरात्रावकल्पयत्	अव्यक्तो. ६
स प्रजापतिरेकः पुष्करपर्णे समभवत् [बृ. जा. १।१+	नृ. पू. १।१

स प्रणवमधीते, यः प्रणवमधीते स सर्वमधीते	नृ. पू. ५।१५
स प्रणवमेवास्याः पुरोगमकरोत्	शौनको. १।३
स प्रणवया तयैवर्चा हविर्ध्यात्वाऽऽत्मानमात्मन्यग्नौ जुहुयात्	अव्यक्तो. ५
स प्रणवं सर्वं पञ्चमं भवति	नृ. पू. २।२
स प्रयोजनता तेषां स्वप्ने विप्रतिपद्यते [वैतथ्य. ७+	अ. शां. ३२
स प्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः	अद्वैतो. ३७
स प्राणमसृजत, प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम्	प्रश्नो. ६।४
स प्राणस्तदु वाङ्मनः	मुण्ड. २।२।२
स प्राणस्य प्राणः	चित्यु. ७।३
स प्रियाणां त्वं प्रियपतिः	गणेशो. २।१
स बाह्यमभ्यन्तरनिश्चलात्मा ज्ञानोल्कया पश्यति चान्तरात्मा	पैङ्गलो. ४।१२
स बाह्याभ्यन्तरव्यापि निष्कलोऽहं निरञ्जनः	१ सं.सो.२।२१
स बाह्याभ्यन्तरान्भावान् स्थूलान् सूक्ष्मतरानपि । तुर्यमालम्ब्य कायान्तस्तिष्ठामि स्तम्भितस्थितिः	अ. पू. ३।१३
स बाह्याभ्यन्तरे देहे ह्यध ऊर्ध्वं च दिक्षु च । इत आत्मा ततोऽप्यात्मा नास्त्यनात्ममयं जगत्	महो. ६।१०
स बाह्याभ्यन्तरेऽपरिमितद्युतिनिभं तत्त्वं महाकाशम्	मं. ब्रा. ४।१
स बाह्याभ्यन्तरे सूर्यनिभंसूर्याकाशम्	मं. ब्रा. ४।१
स बाह्याभ्यन्तरो ह्यजः	मुण्ड. २।१।२
स बिन्दुः सोऽपि पुरुषः शिवसूर्येन्दुरूपवान्	रामर. ५।८
स बुद्धिमान्मनुष्येषु	भ. गी. ४।१८
स ब्रह्म, अयमात्मा	गणेशो. २।१
स ब्रह्मचारिवृत्तिश्च स्तम्भोऽथ फलितस्तथा	मंत्रिको. ११
स ब्रह्मणः पर एता भवति	मैत्रा. ४।४
स ब्रह्मयोगयुक्तात्मा	भ. गी. ५।२१
स ब्रह्मवित्स लोकवित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति	बृह. ३।७।१

स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्	मुण्ड. १।१।१
स ब्रह्म स ब्रह्म स ब्रह्म गणेशः	गणेशो. २।४
स ब्रह्म स हरिः स इन्द्रः स कालाग्निरुद्रः	गान्धर्वो. २
स ब्रह्माणमेव विवेश, स मानसान् सप्तपुत्रानसृजत्	सुबालो. १।३
स ब्रह्मालङ्कारेणालङ्कृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति	कौ. त. १।४
स ब्रह्मा स ईशानः (सेन्द्रः) सोऽक्षरः परमः स्वराट् [महो. १।९+	चतुर्वे. ६
स ब्रह्मा, स मुक्तिः, साऽतिमुक्तिः	बृह. ३।१।६
स ब्रह्मा स विष्णुः स इन्द्रः स शमनः स सूर्यः स चन्द्रः	निरालं. १०
स ब्रह्मा स विष्णुः स रुद्रः स इन्द्रः स सर्वे देवाः सर्वाणि भूतानि	शांडि. ३।१।३
स ब्रह्मा स विष्णुः स शिवः स प्रजापतिः स इन्द्रः सोऽग्निः समभवत्	ग. पू. १।३
स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् [कैव.८+ [कालिको. ६+	ना.पू.ता. ३।१ सूर्यता. १।२
स ब्रह्मा स शिवः....स्वराट् तस्माम्नश्चतुर्थं पादं जानीयाद्यो जानीते सोऽमृतत्वं गच्छति	नृ. पू. १।४
स ब्रह्मा स हरिः सेन्द्रः स कालाग्निरुद्रः स चन्द्रमाः स नक्षत्राणि स चराचरात्मकं जगत्	गान्धर्वो. २
स ब्रह्मेति हि विज्ञेय ऋषिर्ब्रह्ममयो महान्	कौ. त. १।७
स ब्रूयात्प्राणा वसव इदं मे प्रातःसवनम्	छांदो. ३।१६।२
स ब्रूयाद्यावान् वा अयमाकाशस्तावानेषः	छांदो. ८।१।३
स ब्रूयान्नास्य जरयैतज्जीर्यति, न वधेनास्य हन्यते	छांदो. ८।१।५
स भगवान् युगसन्धिकाले स्वेन रूपेण युगे युगे तेनैव जायमानः स्वयमेव सौमित्रिरैक्ष्वाके वंशे जायमानो रक्षांसि सर्वाणि विनिघ्नंश्चातुर्वर्ण्यधर्मान्प्रवर्तयति	सङ्कर्षणो. २
स भाणकरोत्सैव वागभवत्	वृह. १।२।४
स भाणमकरोत्सैववागभवत्(मा.पा.)	बृ. उ. १।२।४
सभास्थलं श्मशानमिव...कारागृहविनिर्मुक्तचोरवत्पुत्राप्तबन्धुभवस्थलं विहाय दूरतो वसेत्	ना. प. ७।१
(एवं) स भिक्षुः सौवर्णादीनां नैव परिग्रहेत्	प. हं. ९
स भूतꣳ स भव्यं जिज्ञासक्लृप्त ऋतजारयिष्ठा श्रद्धा सत्यो महस्वान् तपसो वरिष्ठा	महाना. १७।१३
स भूतानामधिपतिः	१ ऐत. ३।७।१
स भूतेषु च सर्वात्मा वासुदेवस्तथा स्मृतः	भवसं. २।५३
स भूमिकावानित्युक्तः शेषस्त्वाय इति स्मृतः। विचारनाम्नीमितरामागतो योगभूमिकाम्	अक्ष्युप. १३
स भूमिं विश्वतो (स्पृत्वा) वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् [ऋ. मं. [वा.सं.३१।१+श्वेताश्व.३।१४+	१०।९०।१ चित्यु. १२।१
स भूय एवेन्धनयोर्निगृह्यः	श्वेताश्व. १।१३
स भृतो ध्रियमाणो बिभर्ति	चित्यु. १४।१
स भो ३ इति प्रतिशुश्राव	बृह. ६।२।१
सम आत्मा न संशयः	ते. बिं. ५।१२
सम आत्मेति विद्यात्	कौ. त. ३।९
समक्लृपतां द्यावापृथिवी समकल्पेतां वायुश्चाकाशं च समकल्पन्तामापश्च तेजश्च तेषाꣳ सङ्क्लृप्त्यै वर्षꣳ सङ्कल्पते	छांदो. ७।४।२
समग्रं प्रविलीयते	भ. गी. ४।२३
समग्रीवशिरोकायः संवृतास्यः सुनिश्चलः	जा. द. ५।५
(विद्वान्) समग्रीवशिरोनासाग्रभ्रूमध्ये शशभृद्बिम्बं पश्यतु	शांडि. १।५।२
(तद्यथा-)समश्वनवता पूर्णरवेण (समाहितेन) रथेन यं कामं कामयते तमभ्यश्नुते...	संहितो. १।६,७

(तद्यथा-)समञ्जनवता रथेन यं कामं कामयते तमभ्यश्नुते एवमेवैतया..	संहितो. १।९
समता सर्वभावेषु याऽसौ सत्यपरा स्थितिः । तस्यामवस्थितं चित्तं न भूयो जन्मभाग्भवेत्	महो. ६।४
समता स्वच्छता सौम्या सप्तमी भूमिका भवेत्	अ. पू. ५।८५
समतैवावशिष्यते	महो. ६।२,३
समत्वं योग उच्यते	भ. गी. २।४८
समदुःखसुखं घोरं	भ. गी. २।१५
समदुःखसुखः क्षमी	भ.गी. १२।१३
समदुःखसुखः क्षान्तो हस्तप्राप्तं च भक्षयेत्	ना. प. ५।४८
समदुःखसुखः स्वस्थः	भ. गी. १४।२४
स मनसा वाचं...अशनायां मृत्युः...(मा. पा.)	बृह. १।२।४
स मनसा वाचं मिथुनं समभवत्	बृह. १।२।४
स मनुष्याणां परम आनन्दः	बृह. ४।३।३३
स मनुष्यानाकर्षयति सर्वानाकर्षयति	नृ. पू. ५।१२
समन्ताद्देवताः सर्वाः सिद्धचारणपन्नगाः । यन्मूले सर्वतीर्थानि यन्मध्ये ब्रह्म देवताः ।। यदग्रे वेदशास्त्राणि तुलसीं तां नमाम्यहम्	तुलस्यु. ९
समप्रधानौ समसत्त्वौ समोजौ तयोः शक्तिरजरा विश्वयोनिः	त्रिपुरो. १४
समबुद्धिर्विशिष्यते	भ. गी. ६।९
समभ्यसेत्तथा ध्यानं घटिकाषष्टिमेव च	१ यो.त. १०४
समर्घं धनमुद्धृत्य महार्घं यः प्रयच्छति । स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः	इतिहा. ७०
समर्प्य बिल्वं च सहस्रनामभिर्मामर्चयत्यूर्ध्वरवेण बिल्वैः..	१ बिल्वो. १०
समलं समनस्कं च साभासं च सदा त्यज	अमन. २।२६
समलोष्टाश्मकाञ्चनः	ना. प. ३।३५
[भ. गी. ६।८+१४।२४	
समवस्थितमीश्वरम्	भ.गी. १३।२९
समवेतान् कुरूनिति	भ. गी. १।२५
समवेता युयुत्सवः	भ. गी. १।१
समस्तपातकोपपातक...समस्तपापहरणार्थं (गायत्रीं)संस्मरेत्	गायत्रीर. ९
समस्तभुवनस्याधोभागे जलाकारात्मिका मण्डूकमयेति भुवनाधारेति विज्ञायते	सीतो. १०
समस्तयातायातवर्ज्यं नैवेद्यम्	भावनो. ८
समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः सुराः सर्वे त्वद्रूपज्ञानान्मुक्तिमाहुः	वराहो. १।१
समस्तवेदान्तसारसिद्धान्तार्थकलेवरम् । विकलेवरकैवल्यं रामचन्द्रपदं भजे	सर्वसा. शीर्षकं
समस्तसाक्षिं तमसः परस्तात्	कैव. ७
समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम्	कैव. २४
समस्तसाक्षी सर्वात्मा सर्वभूतगुहाशयः	ब्र. वि. १०७
समस्तस्य खलु साम्न उपासनꣳ साधु	छांदो. २।१।१
समस्तस्वरूपविरोधकारिण्यपरिच्छिन्नतिरस्करिण्याकारा वैष्णवी महायोगमाया	त्रि.म.ना. ६।५
समस्तयागानां रुद्रः पशुपतिः कर्ता	पा. ब्र. २
समस्तविषयाणां मनसः स्थैर्येणानुसन्धानं कुसुमम्	भावनो. ८
समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम्	महो. ६।१२
समस्तावयवेभ्यस्त्वं पृथक् भूप व्यवस्थितः	भवसं. २।२९
समस्ता वासनास्त्यक्त्वा निर्विकल्पसमाधितः । तन्मयत्वादनाद्यन्ते तदप्यन्तर्विलीयते	अ. पू. ४।६२
समस्ताविद्याण्डव्यापको भवति	त्रि.म.ना. २।६
स महत्तत्त्वाभिमानी स्पष्टास्पष्टवपुर्भवति	पैङ्गलो. १।३

समहन्यन्त सा पृथिव्यभवत्	बृह. १।२।२
स महात्मा सुदुर्लभः	भ. गी. ७।१९
स महामखो महायोगः	१ अवधू. ६
समं कायशिरोग्रीवं	भ. गी. ६।१
समं पश्यति योऽर्जुन	भ. गी. ६।३२
समं पश्यन् हि सर्वत्र	भ.गी. १३।२९
समं सर्वेषु भूतेषु	भ.गी. १३।२८
समः शत्रौ च मित्रे च	भ. गी. १२।१८
समः सङ्गविवर्जितः	भ. गी. १२।१८
समः समरसाभासस्तिष्ठामि स्वच्छतां गतः	अ. पू. ३।१२
समः सर्वेषु भूतेषु	भ. गी. १८।५४
समः सिद्धावसिद्धौ च	भ. गी. ४।२२
समागमस्तयोरेव हृदयान्तर्गते सुषौ	मैत्रा. ७।११
समागादिती३ँ तत्सायमभवत्	१ ऐत. १।५।१
स मा ज्यैष्ठ्य९ श्रैष्ठ्य९ राज्यमाधिपत्यं गमयत्वहमेवेद९ सर्वमसानीति	छांदो. ५।२।६
समाधाय स सात्त्विकः	भ.गी. १७।११
समाधावचला बुद्धिः	भ. गी. २।५३
समाधिकालात्प्रागेव विचिन्त्यातिप्रयत्नतः । स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत्	अक्ष्युप. ४८
समाधिनिर्धू(र्धौ)तमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् । न शक्यते वर्णयितुं गिरातदा स्वयंतदन्तःकरणेन गृह्यते [मैत्रा. ६।३४+	भवसं. ३।३१
समाधिमथ कार्याणि मा करोतु करोतु वा । हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः	मुक्तिको. २।१९
समाधिमेकेन सममृतं यान्ति योगिनः	योगकुं. ३।१४
समाधिस्थ आत्मकाम आमकामो निष्कामोजीर्णकामो हस्तिनि सिंहे दंशे मशके नकुले सर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चनेति	सुबालो. १३।२
समाधिं सर्वदा कुर्याद्धृदये वाऽथवा बहिः	सरस्व. ४९
समाधिः समतावस्था साष्टांगो योग उच्यते	१ यो. त. २५
समाधिः संविदुत्पत्तिः परजीवैकतां प्रति	अ. पू. ५।७५
समाधिस्त्वेकरूपः	शांडि. १।१।२
समाधिस्थस्य केशव	भ. गी. २।५४
(अथ) समाधिः—जीवात्मपरमात्मैक्यावस्थात्रिपुटीरहिता परमानन्दरूपा शुद्धचैतन्यात्मिका भवति	शांडि. १।८।४
समाधिः समतावस्था जीवात्मपरमात्मनोः । यदि स्वदेहमुत्स्रष्टुमिच्छा चेदुत्सृजेत्स्वयम्	१ यो. त. १०७
समाधिः संविदुत्पत्तिः परजीवैकतां प्रति	जा. द. १०।१
समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात्	ते. बिं. १।४०
समाधौ न विधीयते	भ. गी. २।४४
समाधौ परमं ज्योतिरनन्तं विश्वतोमुखम्	यो. चू. १०
समाधौ मृदिततमोविकारस्य तदाकाराकारिताखण्डाकारवृत्त्यात्मकसाक्षिचैतन्ये प्रपञ्चलयः सम्पद्यते	मं. ब्रा. २।६
समाधौ मोक्षमाप्नोति त्यक्त्वा कर्म शुभाशुभम्	यो. चू. ११०
समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वरः	छांदो. १।३।२
समानप्राण एकस्तु जीवः स एक एव हि । रेचकादित्रयं कुर्याद्दृढचित्तः समाहितः	ध्या. बिं. ९९
समान मउमापरियाति जागृविः	चित्यु. १०।४
समानमशीतयोऽध्यात्मं चाधिदैवतं चान्नमेव	१ ऐत. १।२।६
समानमेवाप्येति समानमेवास्तमेति	सुबालो. ९।५
समानवायुना सह सर्वासु नाडिषु रसं व्यापयञ्छ्वासरूपेण देहे वायुश्चरति	शांडि. १।४।८

स मानसान्सप्त पुत्रानसृजत	सुबालो. १।३
समानस्तु द्वयोर्मध्ये गोक्षीरधवलप्रभः । आपाण्डर उदानश्च व्यानो ह्यर्चिःसमप्रभः	अ. ना. ३८
समानः सर्वगात्रेषु सर्वव्यापी व्यवस्थितः	त्रि. ब्रा. २।८१
समानः सर्वदेहेषु व्याप्य तिष्ठत्यसंशयः	जा. द. ४।२९
समानः सर्वसामीप्यं करोति मुनिपुङ्गव	जा. द. ४।३१
समानसीन आत्मा जनानाम्	खिरयु.११।१।२
(ॐ) समानात्मने ॐ तत्सद्भूर्भुवस्तस्मै समानात्मने नमो नमः	गोपालो. ३।१०
समाने तृप्यति मनस्तृप्यति	छांदो. ५।२२।२
समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः[मुण्ड.३।१।२+	श्वेताश्व. ४।७
समाने वै तत्परिहृतो मेन इत्यागस्त्यः	२ ऐत. १।१।१
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः	अ. ना. ३५
समानो मैत्रावरुणः	प्रा. हो. ४।१
समान्स्निग्धान्दृढान्स्थूलान्क्षौमसूत्रेण धारयेत् (रुद्राक्षान्)	रु. जा. १३
स मा भग प्रविश स्वाहा	तैत्ति. १।४।६
समासक्तं तथा (यथा-यदा-सदा) चित्तं जन्तोर्विषयगोचरे (रं) । यदेवं ब्रह्मणि स्यात्तत्को न मुच्येत बन्धनात् [+शाट्या. २+भवसं. ३।१५	मैत्रा. ६।३४ मैत्रे. १।१२
समासेनैव कौन्तेय	भ.गी. १८।५०
समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी । ब्रह्मन्समाधिशब्देन परा प्रज्ञोच्यते बुधैः	अ. पू. १।४८
समाः स्निग्धा दृढाः स्थूलाः कण्टकैः संयुताः शुभाः (रुद्राक्षाः)	रु. जा. ११
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्	मुण्ड. १।२।१२
समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणा (भस्म)	बृ. जा. ५।५

समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विस्फुलिङ्गाः	बृह. ६।२।१४
समिधꣳ सौम्याहरोप त्वा नेष्ये न सत्यादगाः	छांदो. ४।४।५
समीकरणोन्नयनग्रहणश्रवणोच्छ्वासा वायुकार्यप्राणादिविषयाः	त्रि. ब्रा. १।४
स मुक्तः परमेश्वरः	महो. ६।८
स मुक्तः स पूज्यः स योगी स परमहंसःसोऽवधूतः स ब्राह्मणइति	निरा. ३२
स मुक्तो भवति, स स्वप्रकाशोभवति	गणेशो. ५।८
स मुक्तो भवति तस्मै स्वात्मानं तु ददामि वै	गोपालो. २।३६
स मुक्तोऽहमस्मि	गोपालो. २।१४
स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत	बृह. १।४।६
समुदस्ताश्रमितोऽहं प्रविततसुखपूर्णसंविदेवाहम्	आ. प्र. ३
समुदेति परानन्दा या तनुः पारमेश्वरी । मनसैव मनश्छित्वा सा स्वयं लभ्यते गतिः	अ. पू. १।५३
समुद्धर मनो ब्रह्मन् मातङ्गमिव कर्दमात्	महो. ५।१३९
समुद्र एवास्य बन्धुः, समुद्रो योनिः	बृह. १।१।२
समुद्रमापः प्रविशन्ति यद्वत्	भ. गी. २।७०
समुद्रमेवाभिमुखा द्रवन्ति	भ.गी. ११।२८
समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनम्	मैत्रा. ४।२
समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः। चातुर्थिकं ज्वरं हन्ति लिखित्वा यस्तु पश्यति	वनदु. ९८
समुद्रादर्णवादधि संवत्सरो अजायत [महाना.६।२+ऋ.मं.	१०।१९०।२
समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमानः[महाना.८।८ [+वा. सं. १७।८९+तै. आ.	ऋ.मं. ४।५८।१ १०।१०।२
समुद्रान्सरितः पर्वतान्वनानि मही पातालं च...ततो वै सृष्टिमचीकरत्	गणेशो. ३।६

समुद्रे अन्तः कवयो विचक्षते	चित्यु. ११।११
समूलोन्मूलिते पुण्यपापाख्ये कर्मसञ्चये	अध्यात्मो. ३९
समूलो वा एष परिशुष्यति योऽनृतमभिवदति	प्रश्नो. ६।१
स मृत्युं तरति स संसारं तरति सोऽमृतत्वं च गच्छति	नृ. पू. ३।२
स मृत्युं तरति स पाप्मानं तरति स ब्रह्महत्यां तरति	नृ. पू. ५।१०
स मृत्युं तरति स पाप्मानं तरति स संसारं तरति	नृ. पू. २।१
स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके	कठो. १।१८
स मेन्द्रो मेधया स्पृणोतु [तैत्ति. १।४।१+	ना. प. ४।४५
स मे युक्ततमो मतः	भ. गी. ६।४७
समेष्यामि शिलासाम्यं निर्विकल्पसमाधिना	१ सं.सो. २।५३
स मोदते मोदनीयꣳ हि लब्ध्वा विवृतꣳ सद्म नचिकेतसं मन्ये	कठो. २।१३
समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः । मनोनुकूले, न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत् [श्वेताश्व. २।१०+	भवसं. ३।२३
समोऽहं सर्वभूतेषु	भ. गी. ९।२९
सम्पत्सुतस्त्रीप्रलये स्वगेहाद्विनिर्गता मुण्डितशीर्षका ये । स्वार्चां द्विजैस्ते भुवि कारयन्ति भवन्तु लोकाः खलु सावधानाः	भवसं. १।५५
(यो ह वै) सम्पदं वेद सꣳ हास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च, श्रोत्रं वाव सम्पत्	छांदो. ५।१।४
सम्पदः परमापदः	अक्ष्युप. २६
सम्पदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्	छांदो. ५।२।५
सम्पन्नमेवैतत्सम्मितमेव	आर्षे. ५।३
सम्परेतोऽस्यात्मा न चिरमिव जीविष्यतीति विद्यात्	२ ऐत. २।४।४

सम्पर्कादुदरे न्यस्तः शुक्रबिन्दुश्चेतनः । स पित्रा केन यत्नेन गर्भस्थः केन पालितः	शिवो. ७।१०६
सम्पश्यध्वा एव मा प्रमदत	छाग. २।४
सम्पश्यन्कर्तुमर्हसि	भ. गी. ३।२०
सम्पीड्य सीविनीं सूक्ष्मां गुल्फेनैव तु सव्यतः । सव्यं दक्षिणगुल्फेन मुक्तासनमुदीरितम	शांडि. १।३।९
सम्पूजकः पञ्चमहोपपातकैर्युक्तो विमुक्तः शिवरूपमेति	१ बिल्वो. १२
सम्पूर्ण इव शीतांशुरतिष्ठदमलःशुकः	महो. २।२७
सम्पूर्णकुम्भवद्देहं कुम्भयेन्मातरिश्वना	त्रि. ब्रा. २।९८
सम्पूर्णकुम्भवद्वायोर्धारणं कुम्भको भवेत्	जा. द. ६।१३
सम्पूर्णहृदयः शून्ये त्वारम्भे योगवान्भवेत्	सौ. ल. १०
सम्पूर्णे परमात्मनि । भिन्नाभिन्नं न पश्यन्ति तस्याहं पञ्चमाश्रयः	तत्त्वो. ४
सम्पूर्णानन्दैकबोधो ब्रह्मैवाहमस्मि	प. हं. प. ११
सम्प्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः	मुक्तिको. २।५३
सम्प्रत्यवसितानां च महापातकिनां तथा । व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत्	१ सं. सो. २।४
सम्प्रसूतकलत्राणि गृहाण्युग्रापदामिव	महो. ३।७
सम्प्राप्यैनमृषयोज्ञानतृप्ताः कृतात्मानो वीतरागाःप्रशान्ताः । ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवापियन्ति	मुण्ड. ३।२।५
सम्प्रेक्ष्य नासिकाग्रं स्वं	भ. गी. ६।१३
सम्बद्धासनमेढ्रमङ्घ्रियुगलं कर्णाक्षिनासापुटद्वाराद्यङ्गुलिभिर्नियम्य पवनं वक्त्रेण वा पूरितम् । बध्वा वक्षसि बह्नयानसहितं मूर्ध्नि स्थिरं धारयेदेवं यान्ति विशेषतत्त्वसमतां योगीश्वरास्तन्मनः	यो. चू. ११४

सम्बन्धे द्रष्टृदृश्यानां मध्ये दृष्टिर्हि यद्वपुः । द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं पदम्	महो. ५।४८
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः	श्वेता. २।३
सम्बाहुभ्यां नमति सम्पतत्रैर्द्यावा पृथिवी जनयन्देव एकः	त्रि. म. ना. ६।४
[२ शि. सं. २६+	महाना. २।२
सम्भक्ष्य सिंहेन स एष वीरः	नृसिंहो. ४।३
सम्भवत्युत्तमे प्राज्ञः प्राणायामे सुखी भवेत्	जा. द. ६।१५
सम्भवः सर्वभूतानां	भ. गी. १४।३
सम्भवामि युगे युगे	भ. गी. ४।८
सम्भवाम्यात्ममायया	भ. गी. ४।६
सम्भवे हेतुफलयोरेषितव्यः क्रमस्त्वया	अ. शां. १६
सम्भावितस्य चाकीर्तिः	भ. गी. २।३४
सम्भाषणं च चिन्मात्रं यद्यच्चिन्मात्रमेव हि	ते. बिं. २।३०
सम्भाषणं सह स्त्रीभिरालापः प्रेक्षणं तथा । नृत्तं गानं सहासं च परिवादांश्च वर्जयेत्	ना. प. ६।३८
सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह । विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते	ईशा. १४
सम्भूतेरपवादाच्च सम्भवः प्रतिषिध्यते । को न्वेवं जनयेदिति कारणं प्रतिषिध्यते	अद्वैत. प्र. २५
सम्भूतैर्वायुसंश्रावैर्हृदयं तप उच्यते	कुंडिको. २१
सम्भृततमेनायक्ष्यसे	चित्युप. २।१
सम्भृतं पृषदाज्यम् [चित्यु.१२।४+	पु. सू. ६
[ऋ. मं. १०।९०।८+	वा. सं. ३१।६
सम्भोजनी नाम पिशाचभिक्षा नैषा पितॄन्गच्छति नोत देवान् । इहैव सा चरति क्षीणपुण्या शालान्तरे गौरिव नष्टवत्सा	इतिहा. २२
सम्माननं परां हानिं योगर्द्धेः कुरुते यतः । जनेनावमतो योगी योगसिद्धिं च विन्दति	ना. प. ५।४०
सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव । अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा	ना. प. ३।४१
सम्मायमग्निः सिंचत्वायुषा च बलेन चायुष्मंतं करोतमेति प्रतिहास्मै मरुतः प्राणान्दधति	सहवै. २२
सम्मूढत्वादात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यत्	मैत्रा. ३।२
सम्मा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः	ना. प. ४।४१
सम्मोहमौली तृष्णेर्ष्याकुण्डली तन्द्रीराघवेऽयभिमानाध्यक्षः	मैत्रा. ६।२८
सम्मोहात्स्मृतिविभ्रमः	भ. गी. २।६३
सम्मोहो भयं विषादो निद्रा तन्द्री प्रमादो व्रणो जराशोकः क्षुत्पिपासा...नास्तिक्यमज्ञानं...निकृतत्वमुद्धतत्वमसमत्वमिति तामसान्वितः	मैत्रा. ३।५
सम्यगालोकिते रूपे काष्ठपाषाणवाससाम् । मनागपि न भेदोऽस्ति क्वासि सङ्कल्पनोन्मुखः	अ. पू. २।३८
सम्यगालोचनात्सत्याद्वासना प्रविलीयते । वासनाविलये चेतः शममायाति दीपवत्	मुक्तिको. २।१७
सम्यगुपनयनपूर्वकं चतुश्चत्वारिंशत्संस्कारसम्पन्नः...सर्वविद्याभ्यासं कृत्वा... देहत्यागं करोति स मुक्तः	ना. प. १।१
सम्यग्ज्ञानसमालोकः पुमान् ज्ञेयः समः स्वयम् । न बिभेति न चादत्ते वैवश्यं न च दीनताम्	अ. पू. ५।२
सम्यग्ज्ञानं च वैराग्यं धर्मोऽयं भिक्षुके मतः	ना. प. ५।४५
सम्यग्ज्ञानावरोधेन नित्यमेकसमाधिना । साङ्ख्य एवावबुद्धा ये ते साङ्ख्या योगिनः परे	अ. पू. ५।४९
सम्यग्बन्धत्रयस्थोऽपि लक्ष्यलक्षणकारणम् । वेद्यं समुद्धरेन्नित्यं..	वराहो. ५।५६

सम्यग्वासनया त्यक्तं मुक्तमित्यभिधीयते	मुक्तिको. २।१६
सम्यग्व्यवसितो हि सः	भ. गी. ९।३०
सम्यङ्निमीलिताक्षः किञ्चिदुन्मीलिताक्षः...परं ब्रह्मावलोकयंस्तद्रूपो भवति (योगी)	अद्वयता. १
सम्यङ्न्यासःसन्न्यासः । न तु मुण्डितमुण्डः [गुह्यषो. २+	पीतां. २
सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते	बृह. ५।१३।२
स य आकाशं ब्रह्मेत्युपास्ते आकाशवतो वै स लोकान्प्रकाशवतोऽसम्बाधानुरुगायवतोऽभिसिद्ध्यति	छांदो. ७।१२।२
स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति	बृह. १।४।८
स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते	बृह. १।४।१५
स य आशां ब्रह्मेत्युपास्ते आशयाऽस्य सर्वे कामाः समृद्ध्यन्ति	छांदो. ७।१४।२
स य इच्छेत्पुत्रो..अनुब्रवीत(मा.पा.)	बृ. उ. ६।४।१४
स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत, सर्वमायुरियादिति	बृह. ६।४।१४
स य इदमविद्वानग्निहोत्रं जुहोति यथाऽङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात्	छांदो. ५।२४।१
स य इमाँस्त्रींल्लोकान् पूर्णान् प्रतिगृह्णीयात् सोऽस्या एतत्प्रथमं पदमाप्नुयात्	बृह. ५।१४।६
स य इहान्वायत्तमिदमविद्वानेवैतदुपास्ते पापीयान्भवस्यार्तिमाञ्छंत्यवम्रियते	आर्षे. ४।२
स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति	तैत्ति. ३।७,८,९
स य एतदुपास्ते न स पाप्मनो व्यावर्तते	बृह. १।५।२
स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति	छांदो. ३।६।३

स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति	छांदो. ३।७।३
स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैत...	छांदो. ३।१०।३
स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेन...	छांदो. ३।९।३
स य एतदेवममृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति	छांदो. ३।८।३
स य एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति	छांदो. ३।६।३
स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरꣳ स्वरममृतमभयं प्रविशति	छांदो. १।४।५
स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते...(मा. पा.)	छांदो. ३।१९।४
स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो धर्मा आ च गच्छेयुरुप च नमेयुः	छांदो. २।१।४
स य एतदेवं वेदाऽभि हैनं सर्वाणि भूतानि संवाञ्छन्ति	केनो. ४।६
स य एतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति	छांदो. २।११।२
स य एतमेवमुपास्ते आत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति	बृह. २।१।१३
स य एतमेव उपास्ते; तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति	बृह. २।१।४,५
स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति [बृह. २।१।२,३,	६,७,८,९
स य एतमेवमुपास्ते द्वितीयवान्ह भवति नास्माद्गणश्छिद्यते	बृह. २।१।११
स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते	बृह. २।१।३
स य एतानेवं पञ्च पुरुषान् स्वर्गस्य द्वारपान्वेद	छांदो. ३।१३।६

स य एतमेवं वायुं दिशां वत्सं वेद	छांदो. ३।११।२
स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्	छांदो. ३।१९।४
स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति, सर्वमायुरेति	[छांदो. ४।११।२+१२।२+१३।२
स य एतमेवं विद्वानुपास्ते	छांदो. १।९।४
स य एतमेवंविद्वांश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवति	छांदो. ४।६।४
स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते आयतनवानस्मिँल्लोके भवति	छांदो. ४।८।४
स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति	छांदो. ४।५।३
स य एतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति	[३ ऐत. १।५।४+१।६।२+१।६।४
स य एनं प्राणं वंशमुपवदेत्	३ ऐत. १।४।१
स य एवमिमा महिम्न एवास्य पश्यन्नुपास्ते महिम्न एवाप्नोति सर्वमायुरेति वसीयान्भवति	आर्षे. ८।२
स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्वꣳ ह भवति	छांदो. २।२१।२
स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्व्यन्नादो भवति	छांदो. २।१४।२
स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति	छांदो. २।१९।२
स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद ब्रह्मवर्चस्व्यन्नादो भवति	छांदो. २।१२।२
स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्यं गच्छति	छांदो. २।२०।२
स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति	छांदो. २।१३।२
स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति	छांदो. २।१६।२
स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपाꣳश्च सुरूपाꣳश्च पशूनवरुन्धे	छांदो. २।१५।२
स य एवमेतमक्षरसम्मानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं वेद अक्षराणां सायुज्यं सरूपतां सलोकतामश्नुते	३ ऐत. २।२।३
स य एवमेतमहः सम्मानं चक्षुर्मयं ...आत्मानं वेद अह्ना सायुज्यं सरूपतां सलोकतामश्नुते	३ ऐत. २।१।३
स य एवमेतमिन्द्रं भूतानामिन्द्रं वेद विस्रसाहैवास्माल्लोकात् प्रैतीति ह स्माह महिदास ऐतरेयः	१ ऐत. ३।७।१
स य एवमेतमुपास्ते रोचिष्णुर्ह भवति	बृह. २।१।९
स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान्भवति	छांदो. २।१८।२
स य एवमेतं संवत्सरं समानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसति	३ ऐत. २।३।९
स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा...	३ ऐत. १।१।३ [१।२।३+१।५।१,२+१।६।७
स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति	छांदो. २।१७।२
स य एवमेनमुपास्तेऽतीव सर्वा भूतानि तिष्ठति, सर्वमायुरेति	आर्षे. ६।२
स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रामति	[तैत्ति. २।८।१+३।१०।९
स य एवंविद्वानेते आत्मानꣳ स्पृणुते	तैत्ति. २।९

स य एवायं दैहिक आत्मा	३ ऐत. २।३।१
स य एषोऽणिमा [छांदो. ६।८।७+	९।४+१०।३
स य एषोऽन्तर्हृदय आकाशः	तैत्ति. १।६।१
स यजुर्भिर्यजुर्वेदो विष्णुरुद्रास्त्रिष्टुब्दक्षिणाग्निः [नृ. पू. २।१+	नृसिंहो. ३।२
स यजुषां मण्डलं, स यजुषां लोकः	महाना. १०।१
स यज्जुहोति यद्यजते तेन देवानां लोकः	बृह. १।४।१६
स यज्ञः, स मे ददातु प्रजां पशून् पुष्टिं यशः	चित्त्यु. ७।१
स यत्करणीयं मन्येत तत्कुर्वीत	३ ऐत. २।४।४
स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयति	२ ऐत. ४।३
स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः	बृह. ४।३।१५
स यत्पूर्वोऽस्मात्सर्वस्मात् सर्वान् पाप्मन औषत्तस्मात्पुरुषः	बृह. १।४।१
स यत्प्रमाणं कुरुते	भ. गी. ३।२१
स यत्प्राणो गृत्सोऽपानमदस्तस्माद्गृत्समदः	१ ऐत. २।१।३
स यत्र चन्द्रस्तन्नक्षत्राणि यत्र वा नक्षत्राणि स चन्द्रमास्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ७
स यत्र पुरुषस्तत्स्त्री यत्र वा स्त्री स पुरुषस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ९
स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतम्	बृह. १।३।२८
स यत्र प्रस्वपिति, अस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयञ्ज्योतिर्भवति	बृह. ४।३।९
स यत्र यज्ञस्तत्र छन्दांसि, यत्र वा छन्दांसि स यज्ञस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ४
स यत्र मनस्तद्वाक् , यत्र वा वाक्तन्मनस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ८
स यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. २
स यत्र वायुस्तदाकाशो यत्र वा आकाशस्तद्वायुस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ३
स यत्र स्तनयित्नुस्तद्विद्युत् , यत्र वा विद्युत्तत्र स्तनयित्नुस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ५
स यत्राग्निस्तत्पृथिवी, यत्र वै पृथिवी तत्राग्निस्ते द्वे योनिस्तदेकंमिथुनम्	सावित्र्यु. १
स यत्रादित्यस्तद्द्यौर्यत्र वा द्यौस्तदादित्यस्ते द्वे योनिस्तदेकं मिथुनम्	सावित्र्यु. ६
स यत्रायमणिमानं न्येति जरया वोपतपता वाऽणिमानं निगच्छति	बृह. ४।३।३६
स यत्रायमात्माऽबल्यं न्येत्य सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति	बृह. ४।४।१
स यत्रैतत्स्वप्नायाचरति ते हास्य लोकाः	बृह. २।१।१८
स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति	बृह. ४।४।१
स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति	छांदो. ४।१६।२
स यत्सर्वमोङ्कुर्याद्रिच्यादात्मानं सकामेभ्यो नालं स्यात्	१ ऐत. ३।६।६
स यत्सर्वं नेति ब्रूयात् , पापिकाऽस्य कीर्तिर्जायेत	१ ऐत. ३।६।६
स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत्कर्म कुरुते, यत्कर्म कुरुते तदभिसम्पद्यते	बृह. ४।४।५
स यथा कुमारो महाराजो वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा शयीतैवमेष एतच्छेते	बृह. २।१।१९

स यथा तत्र...ऽधराद्वादो
प्राध्मायीत—(मा. पा.) छां.उ. ६।१४।१

स यथा तत्र नादा ह्येतैतदात्म्य-
मिदꣳ सर्वं तत्सत्यꣳ स आत्मा
तत्त्वमसि श्वेतकेतो छांदो. ६।१६।३

स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा
प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष
आनीतोऽभिनद्धाक्षो विसृष्टः छांदो. ६।१४।१

स यथातुरा भिषग्ग्रहणकाले
बाला अपथ्याहितगुडादिना
जनन्या वञ्चिता इति नाना-
देवता गुरुकर्मतीर्थनिष्ठाश्च ते
भवन्ति स्वसंवे. ३

स यथा दुन्दुभेर्हन्यमानस्य न
बाह्याञ्छब्दान् शक्नुयाद्ग्रहणाय
दुन्दुभेस्तु ग्रहणेन दुन्दुभ्या-
घातस्य वा शब्दो गृहीतः [बृह. २।४।७+४।५।८

स यथा प्रचोदयित्रापोज्झितो
नेङ्गेमरुवीतैवं हैष प्राज्ञेनात्म-
नापोज्झितो न ब्रूते छाग. ६ ३

स यथा प्रयोग्य आचरणे युक्त
एवमेवायमस्मिञ्छरीरे प्राणो
युक्तः छांदो. ८।१२।३

स यथा महाराजो जानपदान्
गृहीत्वा स्वे जानपदे यथाकामं
परिवर्तेतैवमेवैष एतत्प्राणान्
गृहीत्वा स्वेशरीरे यथाकामं
परिवर्तते बृह. २।१।१८

स यथा मृत्पिण्डे घटानां तन्तौ
पटानां तथैवेति भवति स्वसंवे. १

स यथार्द्रेन्धाग्नेरभ्याहितात्
(मा. पा.) बृह. २।४।१०

स यथाऽऽर्द्रैधाग्नेरभ्याहि(तात्)
तस्य पृथग्धूमा...विनिश्चर-
न्त्येवं वा अरेऽस्य महतो भूतस्य
निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः
सामवेदोऽथर्वाङ्गिरस इतिहासः
[बृह. २।४।१०+ ४।५।११

स यथा वीणायै वाद्यमानायै न
बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय
वीणायै तु ग्रहणेन वीणावादस्य
वा शब्दो गृहीतः [बृह.२।४।९+ ४।५।१०

स यथा शकुनिः सूत्रेण प्रबद्धो
दिशंदिशं पतित्वाऽन्यत्रायतन-
मलब्ध्वा बन्धनमेवोपश्रयते
एवमेव खलु सोम्य तन्मनो
दिशं दिशं पतित्वाऽन्यत्रायतन-
मलब्ध्वा प्राणमेवोपश्रयते छांदो. ६।८।२

स यथा शकुनिः...बन्धनमेवो-
पाश्रयते (मा. पा.) छांदो. ६।८।२

स यथा शङ्खस्य ध्मायमानस्य न
बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय
शङ्खस्य तु ग्रहणेन शङ्खध्मस्य
वा शब्दो गृहीतः [बृह. २।४।८+४।५।९

स यथाऽश्मानमृत्वा लोष्ठो
विध्वंसतैवं (मा. पा.) बृ. उ. १।३।७

स यथा सर्वासामपाꣳ समुद्र
एकायनमेवꣳ सर्वेषाꣳ स्पर्शानां
त्वगेकायनं [बृह. २।४।११+ ४।५।१२

स यथा सुहयः पड्वीशशङ्कून्सङ्खिदे-
देवमितरान्प्राणान्समखिदत् छांदो. ५।१।१२

स यथा सैन्धवखिल्य उदके प्रास्त
उदकमेवानुविलीयेत, न ह्यस्य
ग्रहणायेव स्यात् बृह. २।४।१२

स यथा सैन्धवघनोऽनन्तरोबाह्यः
कृत्स्नो रसघन एवैवं वा
अरेऽहमात्मा बृह. ४।५।१३

स यथा सोम्य वयांसि वासो वृक्षं
सम्प्रतिष्ठन्ते, एवं ह वै तत्सर्वं
पर आत्मनि सम्प्रतिष्ठते प्रश्नो. ४।७

स यथेमा नद्यः स्यन्दमानाः
समुद्रायणाः समुद्रं प्राप्यास्तं
गच्छन्ति भिद्येते चासां नामरूपे
समुद्र इत्येवं प्रोच्यते प्रश्नो. ६।५

स यथैकपाद्व्रजन्रथो वैकेन चक्रेण
वर्तमानो रिष्यत्येवमस्य
यज्ञो रिष्यति छांदो. ४।१६।५

(एवं) स यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति	बृह. १।५।२०
स यथैषां प्राणानां मध्यमः प्राणः, एवमेतासां देवतानां वायुः	बृह. १।५।२२
स यथोभयपाद्व्रजन्रथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठस्येवमस्य यज्ञः प्रतितिष्ठति	छांदो. ४।१६।५
स यद्वोचं प्राणं प्रपद्य इति, प्राणो वा इदꣳ सर्वं भूतं यदिदं किञ्च, तमेव तत्प्रापत्सि	छांदो. ३।१५।४
स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः	छांदो. ३।१७।१
स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति	प्रश्नो. ४।६
स यदा प्रतिबुध्यते	कौ. त. ३।३
स यदा प्रतिबुध्यते तदेतत्सर्वमस्मादेवोत्तिष्ठति	नृसिंहो. ७।६
स यदा प्राणेन सह संयुज्यते तदा पश्यति नद्यो नगराणि बहूनि विविधानि च	सुबालो. ४।२
स यदा बली भवत्यथोत्थाता भवति	छांदो. ७।८।१
स यदा मनसा नमस्यति मन्त्रानधीयीयेत्यथाधीते	छांदो. ७।३।१
स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते	बृह. १।३।१३
स यदा विजज्ञावथ हत्वाऽसुरान्विजित्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति	कौ. त. ४।२०
स यदाऽस्माच्छरीरादुत्क्रामति, वागस्मात्सर्वाणि नामान्यभिविसृजते, वाचा सर्वाणि नामान्याप्नोति	कौ. त. ३।४
स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृतं गमयामृतं मा कुरु	बृ.उ. १।३।२८
स यदि तस्य कर्ता भवति (मा.पा.)	छां.उ. ६।१६।२
स यदिदमत्रान्वायत्तं वेदाथ तथैवोपास्तेऽत्रैवान्वायत्तो भवति	आर्षे. ४।३
स यदिदमेतस्मिन्नन्वायत्तं वेदाथ तथोपास्तेऽन्वायत्तो हैवास्मिन् भवति	आर्षे. २।३
स यदिदं सर्वमभिप्रागाद्यदिदं किञ्च तस्मात्प्रगाथाः	१ ऐत. २।२।३
स यदिदं सर्वमभ्यपवयत यदिदं किञ्च तस्मात्पावमान्यः	१ ऐत. २।२।४
स यदिदं सर्वं पाप्मनो त्रायत यदिदं किञ्च तस्माद्त्रयः	१ ऐत. २।१।६
स यदि परेण वोपसृतः स्वेन वाऽर्थेनाभिव्याहरेत् । अभिव्याहार्षीन्नेव विद्यात्	३ ऐत. १।६।४
स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाऽऽचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याहधिक्त्वास्त्वित्येवैनमाहुः	छांदो. ७।१५।२
स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयते	छांदो. ८।२।१
स यदिमानि भूतानि सर्वाणि भूतानि पादि तस्मात्पदम्	१ऐत. २।२।९
स यदि विचिकित्सेत्स णकारं ब्रवाणी३ँ अणकारा३ँ इति	३ ऐत. २।६।२
स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात्	छांदो. ५।२।८
स यदि ह वा अपि मृषा वदति सत्यं हैवास्योदितं भवति	१ ऐत. १।५।३
स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत, तस्मादृक्	१ ऐत. २।२।७
स यदेभ्यः सर्वेभ्योऽर्धेभ्योऽर्चत तस्मादर्धर्चः	१ ऐत. २।२।८
स यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति, न चैनमतिक्षरन्ति	१ ऐत. २।२।१०
स यदेवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति	बृह. १।५।१७

स यदैतत्सर्वमपेक्षते तदैतत्सर्वमस्मिन्प्रविशति	नृसिंहो. ७।६
स यदोत्क्रमिष्यन् भवति, नैनं घोषं शृणोति [बृह.५।९।१+	मैत्रा. २।८
स यद्धैनच्चक्षुषाऽग्रहिष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत्	२ ऐत. ३।५
स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत्	२ ऐत. ३।९
स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्	२ ऐत. ३।६
स यद्धैनत्त्वचाऽग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत्	२ ऐत. ३।७
स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्	२ ऐत. ३।४
स यद्धैनद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्	२ ऐत. ३।३
स यद्धैनन्मनसाऽग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत्	२ ऐत. ३।८
स यद्यगदः स्यात् पुत्रस्यैश्वर्ये पिता वसेत्	कौ. उ. २।१५
स यद्यदेवासृजत तत्तदत्तुमध्रियत	बृह. १।२।५
स यद्यनुरुद्ध्यते तद्भवति	निरुक्तो. १
स यद्यनेन किञ्चिदक्ष्णया कृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुञ्चति	बृह. १।५।१७
स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते	प्रश्नो. ५।३
स यद्येतेषां (स्वप्ने) किञ्चित् पश्येत् , उपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रिसूक्तेन प्रत्यृचं हुत्वाऽन्येनान्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयात्	३ ऐत. २।४।७
स यश्चन्द्रमसो देवानां भूर्भुवःस्वरादीनां सर्वेषां लोकानां च	भस्मजा. २।५
स यश्च सङ्क्रामत्येकपञ्चाशत्	तैत्ति. २।१०
स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदिति	३ऐत. २।३।२

स यश्चायं पुरुषे । यश्चासावादित्ये (2-४-5) स एकः [तैत्ति.	२।८+३।१०।४
स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति	छांदो. ७।५।३
स यस्तान् पुरुषान्निरुह्य प्रत्यूह्य (मा. पा.)	बृह. ३।९।२६
स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्	बृह. ३।९।२६
स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात्	छांदो. २।२४।२
स यः सङ्कल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति	छांदो. ७।४।३
स यः स पाप्मा	बृह. १।३।२
स यः स्मरं ब्रह्मेत्युपास्ते यावत् स्मरस्य गतं तत्रास्य यथाकामचारो भवति	छांदो. ७।१३।२
स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे...पुंसा नक्षत्रेण मन्थं सन्नीय जुहोति	बृह. ६।३।१
स यः कामयते महत्प्राप्नुयां(मा.पा.)	बृह. ६।३।१
स याति परमां गतिम्	भ. गी. ८।१३
स यामिच्छेत्कामयेत मेति...	बृह. ६।४।९
स यामेवामुं सावित्रीमन्वाहैषैव स यस्मा अन्वाहतस्य प्राणांस्त्रायते	बृह. ५।१४।४
स यावतीयं त्रयी विद्या तावद्ध जयति	बृह. ५।१४।५
स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति	छांदो. ८।६।५
स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते	बृह. १।४।१७
स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति	छांदो. ८।६।४

स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता	छांदो. ३।१०।४
स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता	छांदो. ३।९।४
स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता [छांदो.	३।६।४+७।४
स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता	छांदो. ३।८।४
स यावदिदं प्राणि तावद्ध जयति	बृह. ५।१४।३
स यावदेषु त्रिषुलोकेषु तावद्ध जयति	बृह. ५।१४।१
स यावद्ध वा इन्द्र एतमात्मानं न विजज्ञे तावदेनमसुरा अभिबभूवुः	कौ. त. ४।२०
स यावन्मनसोगतंतत्रास्य..(मा.पा.)	छां. उ. ७।३।२
स यावान् ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति	बृह. ६।४।३
स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति	छांदो. ५।१९।१
स युक्तः कृत्स्नकर्मकृत्	भ. गी. ४।१८
स युक्तः स सुखी नरः	भ. गी. ५।२३
स येन यज्ञक्रतुना याजयेत्सोऽरण्यं परेत्य शुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत्	सहवै. २१
स योगी परमो मतः	भ. गी. ६।३२
स योगी ब्रह्मनिर्वाणं	भ. गी. ५।२४
स योगी मयि वर्तते	भ. गी. ६।३१
स योत एकैकमुपास्ते न स वेद	बृह. १।४।७
स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः श्रोता मन्ता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः सम आत्मेति विद्यात्	३ ऐत. २।४।८
स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति	छांदो. ७।६।२
स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति	छांदो. ७।१।५

स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिद्धयति	छांदो. ७।९।२
स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियꣳ रोत्स्यतीश्वरः	बृह. १।४।८
स योऽपो ब्रह्मेत्युपास्ते आप्नोति सर्वान्कामाꣳस्तृप्तिमान्भवति	छांदो. ७।१०।२
स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति	छांदो. ७।८।२
स यो म आयुरमृतमित्युपास्ते सर्वमायुरस्मिँल्लोक एत्याप्नोति	कौ. त. ३।२
स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः	बृह. ४।३।२२
स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति	छांदो. ७।३।२
स यो मां विजानीयान्नास्य केन च कर्मणा लोको मीयते	कौ. त. ३।१
स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति	छांदो. ७।२।२
स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिद्ध्यति	छांदो. ७।७।२
स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति	प्रश्नो. ४।१०
स यो ह वैतद्भगवन्मनुष्येषु प्राणान्तमोङ्कारमभिध्यायीत	प्रश्नो. ५।१
स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तत्तेजोऽन्नाद्यमित्युपासीत	छांदो. ३।१३।१
स यो हवै परमंब्रह्मवेद ब्रह्मैवभवति	मुण्ड. ३।२।९
स यो ह वै मनुष्याणां राद्धः समृद्धो भवति.— (मा. पा.)	बृह. ४।३।३३
स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः	रुद्रह. ५२
स यो ह वै सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तंतत्साम्नोऽङ्गं वेद श्रिया हैवाभिषिच्यते	नृ. पू. १।३

स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति	कौ.त.४।१६।१७
स यो हैतमेवमुपास्ते जिष्णुर्हैवाऽपराजिष्णुरन्यतस्तज्ज्यायान् भवति	कौ. त. ४।७
स यो हैतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा भवति	कौ. त. ४।२
स यो हैतमेवमुपास्ते तेजस आत्मा भवति	कौ. त. ४।४
स योहैतमेवमुपास्तेनाम्नआत्माभवति	कौ. त. ४।९
स यो हैतमेवमुपास्तेऽन्नस्यात्माभवति	कौ. त. ४।३
स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नो एव स्वयं नास्य प्रजा पुरा कालात्प्रवर्तते	कौ. त. ४।६
स यो हैतमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायामाजायते नाप्रतिरूपः	कौ. त. ४।१०
स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिः	कौ. त. ४।१४
स यो हैतमेवमुपास्ते विन्दते द्वितीयाद्द्वितीयवान्भवति	कौ. त. ४।११
स यो हैतमेवमुपास्ते विषासहिर्वा एष भवति	कौ. त. ४।८
स यो हैतमेवमुपास्ते सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते	कौ. त. ४।१५
स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात्सम्मोहमेति (कालात्प्रमीयते)	कौ.त.४।१२,१३
स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति	बृह. ५।४।१
स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयति	बृह. १।५।१३
(अथ) स यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति	बृह. १।५।१३
स यो हैतामवरपरां संहितां वेद	२ ऐत. १।६।३
स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति	३ ऐत. २।५।३
स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात्	३ ऐत. २।६।१
सरसामस्मि सागरः	भ.गी. १०।२४
सरसाꣳ सपिष्टान् गन्धार मम चित्ते रमन्तु स्वाहा	महाना. १४।५
सरस्वती कुहूश्चैव सुषुम्नापार्श्वयोः स्थिते । गान्धारा हस्तिजिह्वा च इडायाः पृष्ठपार्श्वयोः	जा. द. ४।१४
सरस्वती तथा चोर्ध्वंगता जिह्वा तथा मुने । हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते	जा. द. ४।२१
सरस्वती तु या नाडी सा जिह्वान्तं प्रसर्पति	यो. शि. ५।२३
सरस्वती रत्नरूपं च दुर्गा हैमं लिङ्गं पूजयामास भक्त्या	सि. शि. २५
सरस्वत्याः सर्वे वेदा अभवन्	गायत्रीर. १
सराणां सप्तकं वापि बिभृयात् कण्ठदेशतः । मुकुटे कुण्डले चैव कर्णिकाहारकेऽपि वा	रु. जा. १८
स रात्रिभिरेवा च पूर्यते अप च क्षीयते	बृह. १।५।१४
स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः	रा. पू. ता. १।२
स रावण इति ख्यातो यद्वा रावाच्च रावणः	रा.पू.ता. ४।१८
स-रि-ग-म-प-ध-नि-स-संज्ञैवैराग्यबोधकरैः...परमहंसाश्रमेणास्खलितस्वस्वरूपध्यानेन देहत्यागंकरोति समुक्तोभवति	ना. पे. १।१
सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते	अ. पू. ४।१८
स रौद्रꣳ सामाभिगायति	छांदो. २।२४।७
सर्गाणामादिरन्तश्च	भ. गी. १०।३२
सर्गादिकाले भगवान् विरिञ्चिरुपास्यैनं सर्गसामर्थ्यमाप्य । तुतोष चित्ते वाञ्छितार्थांश्च लब्ध्वा धन्यः सोपास्योपासको भवति धाता	द. मू. २२

सर्गेऽपि नोपजायन्ते	भ. गी. १४।२
सर्गे यान्ति परन्तप	भ. गी. ७।२७
सर्प इति सर्पविदः (उपासते)	मुद्गलो. ३।२
सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका । विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता	यो. शि. ४।२२
सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम्	छांदो. २।२१।१
सर्पाणामस्मि वासुकिः	भ. गी. १०।२८
सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् । प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्नहि	आ. प्र. १३
सर्व आत्मा जायते पुरुषोत्तमात्	सि. वि. २
सर्व इन्मामुपयन्ति विश्वतः	बा. मं. २०
सर्व ऊष्माणः प्रजापतेरात्मनः	छांदो. २।२२।३
सर्व एते पुण्यलोका भवन्ति	छांदो. २।२३।१
सर्व एते विष्णुलिङ्गिनः शिखिन उपवीतिनः शुद्धचित्ताः... पुण्यश्लोका भवन्ति	शाट्याय. ११
सर्व एव त आयुर्यन्ति	तैत्ति. २।३
सर्व एव महारथाः	भ.गी. १।६
सर्व एव विमुच्यन्ते ये नराः शिवमाश्रिताः	शिवो. १।३२
सर्वकरणानि मनसि सम्प्रतिष्ठाप्य ध्यानम्	अ. शिखो. ३
सर्वकरणोपसंहाराद्धार्यधारणा ब्रह्म तुरीयम्	अ. शिखो. ३
सर्वकर्ता च योगीन्द्रः स्वतन्त्रोऽनन्तरूपवान्	यो.शि. १।१५०
सर्वकर्मकृदप्यहम्	मैत्रे. ३।१५
सर्वकर्मनिराकरणमावाहनम् [मं. ब्रा. २।५+	अ. पू. १
सर्वकर्मपरित्यागी नित्यतृप्तो निराश्रयः । न पुण्येन न पापेन नेतरेण च लिप्यते	अ. पू. ५।९७
सर्वकर्मफलत्यागं [भ.गी.१२।११	+१८।२
सर्वकर्मफलादीनां मनसैव न कर्मणा। निपुणो यः परित्यागी सोऽसंसक्त इति स्मृतः	अ. पू. २।६
सर्वकर्मविनिर्मुक्तः काम-क्रोध-लोभ-मोह-मद-मात्सर्यादिकं दग्ध्वा त्रिगुणातीतः...स्थिरमतिर्नानृतवादी गिरिकन्दरेषु वसेत्	ना. प. ७।२
सर्वकर्माणि मनसा	भ. गी. ५।१३
सर्वकर्माण्यपि सदा	भ.गी. १८।५६
सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तः	छांदो. ३।१४।४
सर्वकारणकार्यात्मा कार्यकारणवर्जितः	ते. बिं. ५।१
सर्वकारणं परं ब्रह्म	मं. ब्रा. ३।१
सर्वकालं हंसं प्रकाशकम्	पा. ब्र. ४
सर्वकालाबाधितं ब्रह्म	त्रि.म.ना. १।३
सर्वक्षेत्रेषु भारत	भ. गी. १३।३
सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते । अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्	वराहो. २।१८
सर्वगः सर्वसम्बन्धो गत्यभावान्न गच्छति । नास्त्यसावाश्रयाभावात्सद्रूपत्वादथास्ति च	महो. २।८
सर्वगुह्यतम भूयः	भ. गी. १८।६
सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मा	नृसिंहो. ९।४४
सर्वचिन्तावधिर्गुरुः	ते. बिं. ५।१
सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव	शांडि. १।७।२०
सर्वचिन्तां परित्यज्य सावधानेन चेतसा । नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता	वराहो. २।८३
सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः । नादमेवानुसन्दध्यान्नादे चित्तं विलीयते	ना. बिं. ४१
सर्वजगदात्मत्वेन पश्यंस्त्यक्ताहङ्कारो ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन्कृतकृत्यो भवति	मं. ब्रा. २।८
सर्वजनविश्वजनशत्रुजनवश्यजनसर्वजनस्य दृशं लं लां श्रीं ह्रां ह्रीं मनः स्तम्भय स्तम्भय	डाकूलो. ८

सर्वज्यानीं यास्यतीति विद्याद्यस्तथाऽधीते	संहितो. १।२
सर्वज्वरोच्चाटनीं च सर्वमन्त्रप्रभञ्जनीम् ।...मातङ्गीं मदिरामोदां वन्दे तां जगदीश्वरीम्	वनदु. २०
सर्वज्ञता हि सर्वत्र भवतीह महाधियः	म. शां. ८९
सर्वज्ञत्वं परेशत्वं सर्वसम्पूर्णशक्तिता । अनन्तशक्तिमत्त्वं च मदनुस्मरणाद्भवेत्	यो. शि. ३।२५
सर्वज्ञं महामायं महाविभूतिं	नृसिंहो. ५।६
सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये स्थितम् । सुसंवेद्यं गुरुमतात् सुदुर्बोधमचेतसाम्	यो. शि. ३।२०
सर्वज्ञः पञ्चकृत्यसम्पन्नः सर्वेश्वर ईशः पशुपतिः	जाबाल्यु. २
सर्वज्ञः सर्वेश्वरः सर्वभूतान्तरात्मा सर्वभूताधिवासः सर्वभूतनिगूढो भूतयोनिर्योगैकगम्यः	शांडि. २।१।४
सर्वज्ञानविमूढांस्तान्	भ. गी. ३।३२
सर्वज्ञानानिव्याकरणमुदरं(गायत्र्याः)	सन्ध्यो. २३
सर्वज्ञानित्वतृप्त्यनादिबोधस्वतन्त्रनित्यमलुप्तानन्तं षट्कोणशक्तयः	ना.पू.ता. ६।१
सर्वज्ञेशो मायालेशसमन्वितो व्यष्टिदेशं प्रविश्य तया मोहितो जीवत्वमगमत्	पैङ्गलो. १।५
सर्वज्ञो मघोऽप्रमेयोऽनाद्यन्तः	मैत्रा. ७।१
सर्वज्ञोऽसौ भवेत्कामरूपः पवनवेगवान्	यो. शि. १।१४८
सर्वतत्त्वमसद्विद्धि ह्यहं भूमा सदाशिवः	ते. बिं. ३।५१
सर्वतन्त्रेषु गोप्यमहाविद्या भवति	मं. ब्रा. १।४
सर्वतः खल्वयं मुखवान्विश्वरूपत्वात्	अव्यक्तो. ३
सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति [श्वेताश्व. ३।१६+	भ.गी. १३।१४
सर्वतः पाणिपादान्ता सर्वतोऽक्षिशिरोमुखा । सर्वतः श्रुतिमत्येषा सर्वमावृत्य तिष्ठति	गुह्यका. ४८
सर्वतः श्रुतिमल्लोके	भ. गी.१३।१४
सर्वतः सम्प्लुतोदके	भ. गी. २।४६
सर्वतः स्वरूपमेवपश्यञ्जीवन्मुक्तिमवाप्य प्रारब्धप्रतिभासनाशपर्यन्तं चतुर्विधं स्वरूपं ज्ञात्वा देहपतनपर्यन्तं स्वरूपानुसन्धानेन वसेत्	ना. प. ७।३
सर्वतीर्थस्वरूपोऽस्मि परमात्मास्म्यहं शिवः	मैत्रे. ३।१२
सर्वतेजःप्रकाशात्मा नादानन्दमयात्मकः	ते. बिं. ५।३
सर्वतोऽक्षिशिरोमुखम्	भ. गी. १३।१४
सर्वतो मां पाहि पाहि समन्तात्	गणप. ३
सर्वतोमुखत्वान्नृसिंहत्वाद्भीषणत्वाद्भद्रत्वात्...मनआदिसाक्षिणमन्विच्छेत्	नृसिंहो. ७।५
सर्वतो मुखमसर्वतोमुखं नृसिंहमनृसिंहं भीषणमभीषणं.. नृसिंहानुष्टुभैव बुबुधिरे	नृसिंहो. ६।१
सर्वतोमुखमित्याह—सर्वतः खल्वयं मुखवान् विश्वरूपत्वात्	अव्यक्तो. ३
सर्वतोमुखं पञ्चमं स्थानं (जानीयात्)	नृ. पू. २।३
सर्वतो वितता दृष्टिः प्रत्यग्भूता शनैः शनैः	अमन. २।६३
सर्वत्र गतास्तोभावः सर्वत्रनिवृत्ताः सर्वत्र प्रवृत्ताः	संहितो. २।१
सर्वत्रगमचिन्त्यं च	भ. गी. १२।३
सर्वत्र चतुर्थस्वरा मन्द्रस्वराश्च प्रस्तावा चतुर्थमन्द्रातिस्वार्याश्च स्वराश्च भवन्ति	संहितो. २।२
सर्वत्र जडहीनात्मा सर्वेषामन्तरात्मकः	ते. बिं. ४।४४
सर्वत्र तृप्तिरूपोऽहं परामृतरसोऽस्म्यहम्	ते. बिं. ३।२९
सर्वत्र दानप्रतिग्रहः सोमयाज्यपूतो भवति	संहितो. ५।१

सर्वत्रानिकेतः स्थिरमतिः...कटिसूत्रं च कौपीनं दण्डं वस्त्रं कमण्डलुं सर्वमप्सु विसृज्याथ जातरूपधरश्चरेदात्मानमन्विच्छेत्	ना. प. ३।८७
सर्वत्रनीरसमिह तिष्ठत्यात्मरसंमनः	अ. पू. २।९
सर्वत्र पुण्यापुण्यवर्जितः ज्ञानाज्ञानमपि विहाय...प्रणवात्मकत्वेन देहत्यागं करोति यः सोऽवधूतः	तुरीया. ३
सर्वत्र भानुवन्मुमुक्षूणामाधारः स्वयञ्ज्योतिर्ब्रह्माकाशः सर्वदा विराजते	ना. प. ८।२३
सर्वत्र भावना गन्धः	मं. ब्रा. २।५
सर्वत्र युग्मकृत्या ब्राह्मणानर्चयेत्	ना. प. ४।३९
सर्वत्र रोहपूर्वेष्ववरोहपूर्वाण्युदात्तेष्वनुदात्तान्यभिगीतेष्वनभिगीतानि	संहितो. २।१
सर्वत्र वर्तते जाग्रत्स्वप्नं जाग्रति वर्तते । सुषुप्तं च तुरीयं च नान्यावस्थासु कुत्रचित्	त्रि.ब्रा. १।२।१०
सर्वत्र विगतस्नेहो यः साक्षिवदवस्थितः । निरिच्छो वर्तते कार्ये स जीवन्मुक्त उच्यते	महो. २।५१
सर्वत्र विचरेन्मौनी वायुवद्वीतकल्मषः । समदुःखसुखः क्षांतो हस्तप्राप्तं च भक्षयेत्	ना. प. ५।४८
सर्वत्र विनामितप्रणामितेष्वविनामितेष्वविनामितान्यप्रणामितानि	संहितो. २।१
सर्वत्र विसर्गोपगृह्येष्वविसृष्टान्यनुपगृहीतानि	संहितो. २।२
सर्वत्रशुभाशुभयोरनभिस्नेहः[तुरीया.	३+प. हं. ९
सर्वत्र समदर्शनः	भ. गी. ६।२९
सर्वत्र समबुद्धयः	भ. गी. १२।४
सर्वत्र सर्वतः सर्वब्रह्ममात्रावलोकनम् । सद्भावभावनादार्ढ्याद्वासनालयमश्नुते	अध्यात्मो. १३
सर्वत्र सुखवानहम्	ते. बिं. ३।३८
सर्वत्र सौष्म्यं लुपेषु रेफसन्धयः	संहितो. २।१
सर्वत्र ह्रस्वकर्षणेषु दीर्घकर्षणानि दीर्घकर्षणेषु मन्द्रकर्षणानि	संहितो. २।२
सर्वत्रान्तःपदार्थविवेचने मनोयुक्ताभ्यास इष्यते	अद्वयता. ६
सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते	अ. पू. ५।२१
सर्वत्रावस्थितो देहे	भ. गी. १३।३३
सर्वत्राहमकर्तेति दृढभावनयाऽनया । परमामृतनाम्नी सा समतैवावशिष्यते	महो. ६।२
सर्वथा वर्तमानोऽपि [भ.गी.६।३१+	१३।२३
सर्वदहनोऽयमात्मेत्याचक्षते	सुबालो. ९।१४
सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानः...परं ब्रह्मानुसन्दध्यात्	नृसिंहो. २।८
सर्वदाऽनवच्छिन्नं परं ब्रह्म तस्माज्जाता परा शक्तिः स्वयञ्ज्योतिरात्मिका	यो. चू. ७२
सर्वदा पूर्णरूपोऽस्मि नित्यतृप्तोऽस्म्यहं सदा	ते. बिं. ३।१५
सर्वदा मनोवाक्कायकर्मभिः सर्वसंसारमुत्सृज्य प्रपञ्चावाङ्मुखः स्वरूपानुसन्धानेन भ्रमरकीटन्यायेन मुक्तो भवति	ना. प. ५।५२
सर्वदा यमामनन्ति यन्नमस्यन्ति देवाः स ब्रह्मा स शिवः	सूर्यता. १।२
सर्वदा शुचिरशुचिर्वा पठन्ब्राह्मणः सलोकतां संमीपतां सरूपतां सायुज्यतामेति	कलिसं. ५
सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तमः	मैत्रे. ३।२४
सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम	छांदो. २।९।१
सर्वदा सर्वशून्योऽहं सर्वात्माऽऽनन्दवानहम्	ते. बिं. ३।२७
सर्वदा सर्वसौम्येति प्रणवपूर्वकं कमण्डलुं परिगृह्य...स्वाश्रमाचारपरो भवेत्	ना. प. ४।५०

सर्वदा सुलभोऽस्म्यहम्	मैत्रे. ३।१५
सर्वदा ह्यजरूपोऽहं नीरागोऽस्मि निरञ्जनः	ते. बिं. ३।४२
सर्वदिव्यदेहमध्ये परमात्मा प्रकाशितः विनिर्मुक्तभवसागरः स्वर्गे देवमध्ये उत्तमस्वरूपस्य बुद्धिप्रकाशः अस्मिन्मध्ये मायामोहं परित्यजेत्	अद्वैतो. १
सर्वदुष्टप्रशमनं सर्वैश्वर्यफलप्रदम् । वामदेवं महाबोधदायकं पावकात्मकम्	पञ्चब्र. ५
सर्वदृश्यविहीनोऽहं दृग्रूपोऽस्म्यहमेव हि	ते. बिं. ३।१९
सर्वदेवमयं ब्रह्म तथा प्रीणाति विश्वभुक्	गान्धर्वो. ७
सर्वदेवमयं शान्तं शान्त्यतीतं स्वराद्बहिः	पञ्चब्र. १५
सर्वदेवमयः सर्वप्रपञ्चाधारगर्भितः । सर्वाक्षरमयः कालः सदसद्व्यक्तिवर्जितः	तुरीयो. ३
सर्वदेवस्य मध्यस्थो हंस एव महेश्वरः	ब्र. वि. ६२
सर्वदेवात्मकं रुद्रं नमस्कुर्यात् पृथक्पृथक् । एभिर्मन्त्रपदैरेव नमस्यामीशपार्वतीम्	रुद्रहृ. २४
सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः	रुद्रहृ. ४
सर्वदेवात्मा वै स एकः	गणेशो. ४।९
सर्वदेशिकवाक्योक्तिर्येन केनापि निश्चितम् । दृश्यते जगति यद्यत्सर्वं मिथ्येति निश्चिनु	ते. बिं. ५।५४
सर्वदेशेष्वनुस्यूतः चतूरूपः शिवात्मकः । यथा महाफले सर्वे रसाः सर्वप्रवर्तकाः	त्रि.ब्रा. १।२।११
सर्वदेहेषु लिङ्गधारणं भवति	लिङ्गोप. २
सर्वदोषरहित आनन्दरूपः	गणेशो. १।४
सर्वदोषैर्वृतो जीवः कथं ज्ञानेन मुच्यते	यो. शि. १।१६
सर्वद्रष्टा सर्वानुभूरहम्	ब्र. वि. ११०

सर्वद्वन्द्वैर्विनिर्मुक्तो ब्रह्मण्येवावतिष्ठते	ना. प. ३।५४
सर्वद्वाराणि संयम्य	भ. गी. ८।१२
सर्वद्वारेषु देहेऽस्मिन्	भ. गी. १४।११
सर्वधर्मान् परित्यज्य	भ. गी. १८।६६
सर्वधर्मान्परित्यज्य निर्ममो निरहङ्कारो भूत्वा ब्रह्मेष्टं शरणमुपगम्य तत्त्वमसि... इत्यादिमहावाक्यार्थानुभवज्ञानाद्ब्रह्मैवास्मीति निश्चित्य निर्विकल्पसमाधिना स्वतन्त्रो यतिश्चरति स संन्यासी	निरा. ३२
सर्वध्यानयोगज्ञानानां यत्फलमोङ्कारः	अ. शिखो. ३
सर्वनयनः प्रशास्ताऽन्नमयो भूतात्मा प्राणमय इन्द्रियात्मा	सुबालो. ५।१५
सर्वनादमयः शिवः	ते. बिं. ५।२
सर्वनिरामयपरिपूर्णोऽहमस्मीति मुमुक्षूणां मोक्षैकसिद्धिर्भवति	आत्मपू. १
सर्वपरिपूर्णतुरीयातीतब्रह्मभूतो योगी भवति	मं. ब्रा. २।९
सर्वपरिपूर्णं ब्रह्म	त्रि. म. ना. १।३
सर्वपरिपूर्णानन्तचिन्मयस्तम्भाकारं (ब्रह्म)	त्रि.म.ना. ४।१
सर्वपरिपूर्णो नारायणस्त्वनया निजया क्रीडति स्वेच्छया सदा	त्रि.म.ना. ४।१०
सर्वपरिपूर्णोऽहमेव	त्रि. म. ना. ८।६
सर्वपरोक्षा देवसंहिता भवति	संहितो. १।१
सर्वपर्वसु यत्नेन ह्येषु सम्पूजयेच्छिवम्	शिवो. ७।७५
सर्वपापविशुद्धात्मा परंब्रह्माधिगच्छति । मासि मासि कुशाग्रेण जलबिन्दुं च यः पिबेत्	योगो. १७
सर्वपापैः प्रमुच्यते	भ. गी. १०।३
सर्वपूर्णस्वरूपोऽस्मि सच्चिदानन्दलक्षणः	मैत्रे. ३।१२
सर्वप्रकाशरूपोऽस्मि	मैत्रे. ३।२१
सर्वप्रकाशरूपोऽहं परावरसुखोऽस्म्यहम्	ते. बिं. ३।३०
सर्वप्रत्यक्षाऽसुरसंहिता भवति	संहितो. १।१

सर्वप्रपञ्चभ्रमवर्जितोऽसि, सर्वेषु भूतेषु च भासितोऽसि	ते. बिं. ५।६३
सर्वप्रयत्नेन कुर्याच्छ्राद्धं महालयम्	इतिहा. ९१
सर्वबन्धाः प्रविनश्यन्ति	त्रि. म. ना. ५।४
सर्वभावपदातीतं, ज्ञानरूपं निरञ्जनम्	यो. शि. १।७
सर्वभावान्तरस्थाय चैत्यमुक्तचिदात्मने । प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः	१सं. सो. २।२५
सर्वभावेन भारत [भ. गी. १५।१९	+१८।६२
सर्वभूतस्थमात्मानं	भ. गी. ६।२९
सर्वभूतमसत्सदा	ते. बिं. ३।१
सर्वभूतातिगश्चात्मा	२रुद्रो. ५२
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । सम्पश्यन्ब्रह्म परमं याति नान्येन हेतुना	कैव. १०
सर्वभूतस्थमेकं (वै) नारायणं कारणपुरुषमकारणं परं ब्रह्मों [आ. प्र. १+	नारा. ४
सर्वभूतस्थितं देवं सर्वेशं नित्यमर्चयेत्	ब्र. वि. ७७
सर्वभूतस्थितं यो मां	भ. गी. ६।३१
सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः । एकारामः परिव्रज्य भिक्षार्थं ग्राममाविशेत्	ना. प. ३।५५
सर्वभूतहिते रताः [भ.गी.५।२५+	१२।४
सर्वभूतातिगश्चात्मा कोशातीतः परात्परः	२रुद्रो. ५२
सर्वभूतात्मभूतात्मा	भ. गी. ५।७
सर्वभूतात्मभूतो हि वासुदेवो महाबलः	ना. महो. २२
सर्वभूताधिवासं च यद्भूतेषु वसत्यधि	ब्र. बिं. २२
सर्वभूताधिवासः सर्वभूतनिगूढो भूतयोनिर्योगैकगम्यः	शांडि. २।४
सर्वभूताधिवासोऽहं सर्वव्यापी स्वराडहम्	ब्र. बिं. १०६
सर्वभूतानां माता मेदिनी	महाना. १०।१४
सर्वभूतान्तरस्थाय नित्यमुक्तचिदात्मने । प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः	वराहो. २।३३
सर्वभूतान्तरात्माऽहमहमस्मि सनातनः	ब्र. बिं. १०९
सर्वभूतान्तर्वर्ती हंस इति प्रतिपादनम्	निर्वाणो. १
सर्वभूतानि कौन्तेय	भ. गी. ९।७
सर्वभूतानि चात्मनि	भ. गी. ६।२९
सर्वभूतानि सम्मोहं	भ. गी. ७।२७
सर्वभूताशयस्थितः	भ. गी. १०।२०
सर्वभूतेभ्योऽभयं दत्त्वाऽरण्यं गत्वा...स्वाच्छरीरादुपलभेतैनम् (आत्मानम्)	मैत्रा. ६।८
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते । यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति	ईशा. ६
सर्वभूतेषुचात्मानं ब्रह्म सम्पद्यतेतदा	जा. द. १२।१०
सर्वभूतेषु येनैकं	भ. गी. १८।२०
सर्वमग्राह्यभावेन हेतुनाजं प्रकाशते	अद्वैत. २६
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते	वनदु. १५,९१
सर्वमजीजनत् (दैवी शक्तिर्माया)	बह्वृचो. १
सर्वमनुष्टुप् । एतं मन्त्रराजं यः पश्यति, स पश्यति	ग. पू. १।६
सर्वमन्तः परित्यज्य शीतलाशयवर्ति यत् । वृत्तिस्थमपि तच्चित्तमसद्रूपमुदाहृतम्	अ. पू. ४।५१
सर्वमन्त्रान् समुत्सृज्य एतं (अहं ब्रह्मास्मि) मन्त्रं समभ्यसेत् । सद्यो मोक्षमवाप्नोति नात्र सन्देहमण्वपि	ते. बिं. ३।७४
सर्वमन्यत्परित्यज्य समस्ताथर्वशिखैतामधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यते	अ. शिखो. ३
सर्वमयस्तद्यदेतदिदम्मयोऽदोमय इति यथाकारी यथाचारी तथा भवति	बृह. ४।४।५

सर्वमस्तीति नास्तीति निश्चयं त्यज्य तिष्ठति	ते. बिं. ४।३९
सर्वमस्मीत्युपासीत, तद्व्रतम्	छांदो. २।२१।४
सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद	बृह. १।२।५
सर्वमस्यान्नं भवति य एवं वेद	बृह. २।२।४
सर्वमहोरात्राभ्यामभिपन्नम्	बृह. ३।१।४
सर्वमाकाशतामेति नित्यमन्तर्मुखस्थितेः	अ. पू. १।३२
सर्वमात्ममयं जगत्	ते. बिं. ६।४६
सर्वमात्मा जानीत	मैत्रा. ६।७
सर्वमात्मानं पश्यति नैनं पाप्मा तरति	बृह. ४।४।२३
सर्वमात्माऽहमात्माऽस्मि परमात्मा परात्मकः। नित्यानन्दस्वरूपात्मा वैदेही मुक्त एव सः	ते. बिं. ४।६२
सर्वमात्मेदमत्राहं किं वाञ्छामि त्यजामि किम्	अ. पू. २।३
सर्वमात्मेदमाततम्। अहमन्य इदं चान्यदिति भ्रांतिं त्यजानघ	महो. ६।१२
सर्वमात्मैव कौ दृष्टौ भावाभावौ क वा स्थितौ	अ. पू. २।३६
सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम्	ते. बिं. ६।३९
सर्वमायुरस्मिँल्लोक एवाप्नोति	कौ. त. ३।२
सर्वमायुरेति [३ ऐत. १।१।३+ [आर्षे.४।३+६।२,३+८।२,४+	१।५।१ गोपीचं. ८
सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या.. [छांदो. २।११।२+	२।१२।२।
सर्वमावृत्य तिष्ठति	भ.गी. १३।१४
सर्वमित्याकाशे, तत्प्रतिष्ठेत्युपासीत	तैत्ति. ३।१०।३
सर्वमिदमभ्यात्तोऽवाक्यनादरः	छां. ३।१४।२,३
सर्वमिदं तरवदितो वहामि	बा. मं. २१
सर्वमिदं प्रशास्ति, यदिदं किञ्च	बृह. ५।६।१
सर्वमिदं रक्षति (माया) सर्वमिदं संहरति [नृ. पू. ३।२+	ग. पू. २।३
सर्वमिदं शिव एव विजानीहि...	त्रि. ब्रा. १।१
सर्वमु ह्येवैष रज उपर्युपरि तपति	बृह. ५।१४।३
सर्वमु ह्येष रज उपर्युपरि तपति	गायत्र्यु. २
सर्वमेकमजं शान्तमनन्तं ध्रुवमव्ययम्। पश्यन्भूतार्थचिद्रूपं शान्त आस्व यथासुखम्	अध्युप. ५
सर्वमेकमिदं शान्तमादिमध्यान्तवर्जितम्। भावाभावमजं सर्वमिति मत्वा सुखी भव	अ. पू. ५।६७
सर्वमेकं परं व्योम को मोक्षः कस्य बन्धता	अ. पू. २।३७
सर्वमेतत्सन्दहति एवंविद्यद्यपवहीव पापं करोति	गायत्र्यु. ९
सर्वमेतदृतं मन्ये	भ.गी. १०।१४
सर्वमेतद्धिया त्यक्त्वा यदि तिष्ठसि निश्चलः। तदाहङ्कारविलये त्वमेव परमं पदम्	अ. पू. ५।५४
सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः	श्वेताश्व. ५।५
सर्वमेव तत्सम्प्साय शुद्धः पूतोऽजरोऽमृतः संभवति	बृह. ५।१४।८
सर्वमेव परित्यज्य महामौनी भवानघ। निर्वाणवाग्निर्मननः क्षीणचित्तः प्रशान्तधीः	अ. पू. ५।११४
सर्वमोङ्कार एव	माण्डू. १
सर्वमौनफलोऽस्म्यहम्	मैत्रे. ३।१६
सर्वयोनिषु कौन्तेय	भ. गी. १४।४
सर्वरोगनिवृत्तिः स्यान्नाभिमध्ये तु धारणात्	जा. द. ६।२४
सर्वलिङ्गं स्थापयति पाणिमन्त्रं पवित्रम्	लिङ्गोप. १
सर्वलोकगुरुश्चास्मि सर्वलोकेऽस्मि सोऽस्म्यहम्	मैत्रे. ३।१
सर्वलोकमध्ये ब्रह्म द्विधारूपं विचरति	अद्वैतो. १
सर्वलोकमहेश्वरम्	भ. गी. ५।२९
सर्वलोकस्तुतिपात्रः सर्वदेशसञ्चारशीलः...जीवन्मुक्तो भवति	मं. ब्रा. २।९
सर्वलोका आत्मनि ब्रह्मणि मणय इवौताश्च प्रोताश्चेति	सुबालो. १०।१
सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम्	१ अवधू. १२

सर्वलोकानां सृष्टिस्थित्यन्तकृद्विभुरीशः कथं जीवत्वमगमदिति	पैङ्गलो. २।१
सर्वलोकेषु विहरन्नणिमादिगुणान्वितः । कदाचित्स्वेच्छया देवो भूत्वा स्वर्गे महीयते	१ यो.त. १०९
सर्ववर्णे महादेवि सन्ध्याविद्ये सरस्वति	महाना. ११।६
सर्ववर्णेषु धारणं कैलाससिद्धिर्भवति	लिङ्गोप. २
सर्ववस्तुन्युदासीनभाव(आसनमुच्यते) मासनमुत्तमम् [त्रि. ब्रा. २।२९+	२ अवधू. २
सर्ववस्तुपरित्यागे शेष आत्मेति कथ्यते	अ. पू. १।४५
सर्ववाचोऽवधिर्ब्रह्म सर्वचिन्तावधिर्गुरुः	ते. बिं. ५।१
सर्ववाच्यवस्तु प्रणवात्मकम्	अ. शिखो. १
सर्वविघ्नहरश्चायं प्रणवः सर्वदोषहा	वराहो. ५।७१
सर्वविघ्नहरो मन्त्रः प्रणवः सर्वदोषहा	१ यो. त. ६४
सर्वविद्रूपोविघसःप्रसरणः(आत्मा)	आर्षे. ९।२
सर्वविद्यापाण्डित्यप्रपञ्चं भस्मीकृत्य स्वरूपं गोपयित्वा..प्रणवात्मकत्वेन देहत्यागं करोति यः सोऽवधूतः	तुरीया. ३
सर्वविषयपराङ्मुखत्वं प्रत्याहारः	शांडि. १।८।१
सर्ववेदान्ततृप्तोऽस्मि सर्वदा सुलभोऽस्म्यहम्	मैत्रे. ३।१५
सर्ववेदवेदान्तानां नारायणपरब्रह्मण्येव तात्पर्यम्	ना.पू.ता. ५।११
सर्ववेदसं वा एतत्सर्वं	महाना. १८।१
सर्ववेदान्तसँल्लक्ष्यं तद्ब्रह्मेत्यभिधीयते	ना. उ. ता. १।९
सर्ववेद्यः सर्वज्ञः सर्वसिद्धिदः सर्वेश्वरः सोऽहम्	ना. प. ९।२२
सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् [श्वेताश्व. १।१६+	ब्रह्मो. २३
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति	आगम. २८
सर्वव्यापी स भगवाँस्तस्मात् सर्वगतः शिवः	श्वेताश्व. ३।११
सर्वव्यापी सर्वभूतानां हृदये सन्निविष्टः मायावी मायया क्रीडति	शांडि. ३।१।३
सर्वव्यापी सर्वभूतान्तरात्मा [श्वेता. ६।११+	गोपालो. ३।१९
सर्वव्यापी सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि	१ आत्मो. ३
सर्वशक्तेर्महेशस्य विलासो हि मनो भवेत् । संयमासंयमाभ्यां च संसारः शान्तिमन्वगात्	महो. ४।८७
[उपास्य इति च] सर्वशरीरस्थचैतन्यब्रह्मप्रापको गुरुरुपास्यः	निरा. उ. २३
सर्वशरीरिणां जीवस्यैकरूपत्वात् । तस्मान्न जीवो ब्राह्मणः	व. सू. ३
सर्वशरीरेषु चैतन्यैकतानताध्यानम्	मं. ब्रा. १।१
सर्वशः पृथिवीपते	भ. गी. १।१८
सर्वशून्यस्वरूपोऽहं सकलागमगोचरः	ते. बिं. ३।४०
सर्वश्रुत्युत्तमो मृग्यः सकलोपनिषन्मयः	ना. प. ८।६
सर्वसङ्कल्परहितःसर्वनादमयः शिवः	ते. बिं. ५।२
सर्वसङ्कल्परहिता सर्वसंज्ञाविवर्जिता । सैषा चिदविनाशात्मा स्वात्मेत्यादिकृताभिधा	महो. ५।१००
सर्वसङ्कल्पशून्यत्वात्सर्वकार्यविवर्जनात् । केवलं ब्रह्ममात्रत्वान्नास्त्यनात्मेति निश्चिनु	ते. बिं. ५।१६
सर्वसङ्कल्पसन्न्यासश्चेतसा यत्परिग्रहः	महो. २।९
सर्वसङ्कल्पसन्न्यासी	भ. गी. ६।४
सर्वसङ्कल्पसंशान्तं प्रशान्तघनवासनम् । न किञ्चिद्भावनाकारं यत्तद्ब्रह्म परं विदुः	अ. पू. ५।४८
सर्वसङ्कल्पहीनात्मा चिन्मात्रोऽस्मीति सर्वदा	ते. बिं. ४।४४
सर्वसङ्कल्पहीनात्मा वैदेही मुक्त एव सः । निष्कलात्मानिर्मलात्मा बुद्धात्मा पुरुषात्मकः	ते. बिं. ४।६८

सर्वसंक्षोभिण्यादिचतुर्दशारगा देवताः	भावनो. ४
सर्वसङ्गनिवृत्तात्मा स मामेति न संशयः	वराहो. २।३६
सर्वसन्तोषो विसर्जनम्	मं. ब्रा. २।५
सर्वसन्धिस्थ उदानः	शांडि. १।४।७
सर्वसंसारदुःखानां तृष्णैका दीर्घदुःखदा । अन्तःपुरस्थमपि या योजयत्यतिसङ्कटे	महो. ३।२५
सर्वसंसारेषु विरक्तो ब्रह्मचारी गृही वानप्रस्थो वा...तदु तथा न कुर्यात्	प. हं. प. २
सर्वसंहारसमर्थः परिभवासहः प्रभुर्व्याप्तः...निरस्ताविद्यातमोमोहोऽहमेवेति	नृसिंहो. २।८
सर्वसाक्षिणमात्मानं वर्णाश्रमविवर्जितम् । ब्रह्मरूपतया पश्यन्ब्रह्मैव भवति स्वयम्	वराहो. २।१३
सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम्	मुक्तिको. १।३३
सर्वसिद्धिप्रदा देव्यो बहिर्दशारगा देवताः	भावनो. ४
सर्वसौख्यैरुपास्यमानो न च सर्वसौख्यान्युपास्यति	सुबालो. ५।१५
सर्वसौभाग्यदं नृणां सर्वकर्मफलप्रदम् । ...अष्टाक्षरसमायुक्तमष्टपत्रान्तरस्थितम्	पञ्चब्र. ९
(ततः) सर्वस्मादन्यो विलक्षणश्चक्षुषः साक्षी	नृसिंहो. २।२
सर्वस्माद्व्यतिरिक्तोऽहं बालाग्रादप्यहं तनुः । इति यः संविदो ब्रह्मन् द्वितीयाऽहंकृतिः शुभा	महो. ५।९०
सर्वस्य चाहं हृदि सन्निविष्टः	भ. गी. १५।१५
सर्वस्य धातारमचिन्त्यरूपम्	भ. गी. ८।९
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं परं ज्योतिस्तमस उपरि विभाति	त्रि.म.ना. ४।३
सर्वस्य धातारमचिन्त्यशक्तिं सर्वागमान्तार्थविशेषवेद्यम्	ना. प. ९।१६

सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत्	श्वेता. ३।१७
सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च	आगम. २७
सर्वस्य प्रभवाप्ययौ (आत्मा)	ना. प. ८।१७
सर्वस्य मेदोमांसक्लेदावकीर्णे शरीरमध्येऽत्यन्तोपहिते चित्रभित्तिप्रतीकाशे गान्धर्वनगरोपमे कदलीगर्भवन्निस्सारे जलबुद्बुदवच्चञ्चले निस्सृतं आत्मानं...पश्यन्ति विद्वांसः	सुबालो. ८।१
सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना	वृह. ४।४।२२
सर्वस्य वशी सर्वस्येशानः सर्वमभिक्षिपन्	आर्षे. ९।२
सर्वस्यात्मनः परायणं यमात्थ	बृह. ३।९।१०
सर्वस्यात्मा भवति य एवं वेद	सुबालो. ९।१४
सर्वस्याऽऽत्मा सर्वभुक्	मैत्रा. ७।१
सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान् । आशयज्ञश्च भूतानां संसारे नावसीदति	महो. ६।६५
सर्वस्येशानः सर्वस्याऽऽन्तरान्तरः	मैत्रा. ७।१
सर्वस्यैतस्यात्ता भवति	बृह. १।२।५.
सर्वस्यैतस्यैव कालस्य विभागविशेषाः प्रकाशरूपाः कालरूपा भवन्ति	सीतो. ७
सर्वं कर्माखिलं पार्थ	भ. गी. ४।३३
सर्वं कार्ष्णायसं ज्ञातं तदभिन्नं स्वभावतः	पञ्चब्र. ३१
सर्वं कारणवद्दुःखमस्वं चानित्यमेव च । न चात्मकृतकं तद्धि तत्र चोत्पद्यते स्वता	आयुर्वे. २४
सर्वं किञ्चिदिदं दृश्यं दृश्यते य-(चि) ज्जगद्गतम् । चिन्निष्पन्दांशमात्रं तन्ना(न्यदस्तीतिभावयन्)न्यत्किञ्चन शाश्वतम् [महो. ४।१०+	अ. पू. १।४७
सर्वं खल्विदं ब्रह्म [निरालं. ११+	त्रि. म. ना. १।२ गान्धर्वो. ६

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत	छांदो. ३।१४।१
सर्वं च खल्विदं ब्रह्म नित्यचिद्घनमक्षतम्	महो. ४।११९
सर्वं च न परं शून्यं न परं नापरात्परम् । अचिंत्यमप्रबुद्धं च न सत्यं न परं विदुः	ते. बिं. १।११
सर्वं च मयि पश्यति	भ. गी. ६।३०
सर्वं च मे भूयात्	चित्यु. ७।४
सर्वं च सद्रूपमसत्यनाशात्	वराहो. ३।४
सर्वं चाप्यहमेवेति निश्चयो यो महामते । समादाय विषादाय न भूयो जायते मतिः	महो. ६।६०
सर्वं चिन्मात्रमद्वयम्	ते. बिं. ६।३९
सर्वं चिन्मात्रमेव हि [ते.बिं.२।२५,	२७–२९
सर्वं चेदं क्षयिष्णु पश्यामः	मैत्रा. १।५
सर्वं चोदरपोषणस्य नटनं न श्रेयसः कारणम्	अमन. १।६
सर्वं जगदानुष्टुभ एवोत्पन्नमनुष्टुप्प्रतिष्ठितं प्रतितिष्ठति यश्चैवं वेद	अव्यक्तो. ६
सर्वं जगदिदं त्वत्तस्तिष्ठति	गणप. ५
सर्वं जगदिदं त्वत्तो जायते	गणप. ५
सर्वं जगदिदं त्वयि प्रत्येति	गणप. ५
सर्वं जगदिदं त्वयि लयमेष्यति	गणप. ५
सर्वं जगद्धितं वा एतदक्षरं प्राजापत्यम्	अ. शिरः. ३।३
सर्वं जनयति प्राणश्चेतोंऽशून्पुरुषः पृथक्	आगम. ६
सर्वं जहाति सर्वः शुध्यति	छांदो. ६।११।२
सर्वं ज्ञानप्लवेनैव	भ. गी. ४।३६
सर्वं तदत्र गत्वा विन्दतेऽत्र	छांदो. ८।३।२
सर्वं तदभिसमेति	छांदो. ४।१।४
सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद	बृह. ४।५।७
सर्वं तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद	बृह. २।४।६
सर्वं देवी सृजते विश्वमेतत्	गुह्यका. ५४
सर्वं नश्वरमेव तत्	महो. ३।५३
सर्वं नारायण एव भवतीति विज्ञायते	ना. उ. ता. ३।१

सर्वं पञ्चात्मकं विद्यात्पञ्चब्रह्मात्मतत्त्वतः	पञ्चब्र. २५
(अतः) सर्वं परित्यज्य तत्प्रसक्तं मनोदण्डं करपात्रं दिगम्बरं दृष्ट्वा परिव्रजेद्भिक्षुः	ना. प. ५।११
सर्वं पश्यति सर्वः पश्यति	प्रश्नो. ४।५
सर्वं पाप्मानं तपति	बृह. ४।४।२३
सर्वं पाप्मानं तरति	बृह. ४।४।२३
सर्वं पाहि शतक्रतो स्वाहा	महाना. ७।४
सर्वं पुनातु मामापोऽसतां च प्रतिग्रहꣳ स्वाहा	महाना. ११।२
सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नम्	बृह. ३।१।५
सर्वं प्रतिष्ठितं तस्मिन् सर्वगं विश्वतोमुखम् । तस्य मध्यगताः सूर्यसोमाग्निपरमेश्वराः	यो. शि. ६।१०
सर्वं प्रकृतिजैर्गुणैः	भ. गी. ३।५
सर्वं प्रशान्तमजमेकमनादिमध्यमाभास्वरं स्वदनमात्रमचैत्यचिह्नम् । सर्वं प्रशान्तमिति शब्दमयी च दृष्टिर्बाधार्थमेव हि मुधैव तदोमितीदम्	महो. ४।९
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्	श्वेताश्व. १।१२
सर्वं ब्रह्ममयंप्रोक्तं सर्वं ब्रह्ममयंजगत्	ते. बिं. ६।३८
सर्वं ब्रह्मेति यस्यान्तर्भावना सा हि मुक्तिदा । भेददृष्टिरविद्येयं सर्वथा तां विसर्जयेत्	महो. ५।११३
सर्वं ब्रह्मेति वै ज्ञानादिन्द्रियग्रामसंयमः । यमोऽयमिति सम्प्रोक्तोऽभ्यसनीयो मुहुर्मुहुः	ते. बिं. १।१७
सर्वं ब्रह्मेति सङ्कल्पात्सुदृढान्मुच्यते मनः	महो. ४।१२४
सर्वं ब्रह्मैव केवलम्	ते. बिं. ६।४
[+६।६५+६।१०५,६+	यो. शि. ४।१८
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव केवलम्	ते. बिं. ६।६५
सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां	केनो. शां. पा.
सर्वं भूतमयं चेति त्यक्त्वा नास्तीति भावयेत्	अमन. १।१७
सर्वं भूतं भव्यं जायमानं च	गणेशो. ३।१

सर्वं भृग्वङ्गिरोमयं अन्तरैते त्रयो वेदा भृगूनङ्गिरसः श्रिताः	२ प्रणवो. २१
सर्वं मृत्युनाऽभिपन्नम्	बृह. ३।१।३
सर्वं वा अत्तीति तददितेरदितित्वम्	बृह. १।२।५
सर्वं वा एतदिन्द्रो यज्जगद्यथैवेति	शौनको. २।४
सर्वं वा एष सर्वमश्नोतीति	शौनको. १।५
सर्वं विश्वमिदं नारायणः, य एवं वेद	ना.उ.ता. २।५
सर्वं वै तेऽन्नमाप्नुवन्ति, येऽन्नं ब्रह्मोपासते	तैत्ति. २।२।२
सर्वं शाक्तमजीजनत्	बह्वृचो. १
सर्वं शान्तं निरालम्बं व्योमस्थं शाश्वतं शिवम्	महो. ५।४५
सर्वं सच्चिन्मयं ततम् [महो.६।११+	ते. बिं. ६।१,९
सर्वं सच्चिन्मयं विद्धि सर्वं सच्चिन्मयं ततम्	ते. बिं. ६।१
सर्वं सत्यं परं ब्रह्म न चान्यदिति या मतिः। तच्च सत्यं वरं प्रोक्तं वेदान्तज्ञानपारगैः	जा. द. १।१०
सर्वं सन्त्यज्य दूरेण यच्छिष्टं तन्मयो भव	अ. पू. १।४६
सर्वं सन्मात्ररूपत्वात्सच्चिदानन्दमात्रकम्	ते. बिं. ६।३०
सर्वं समतया बुद्ध्या यः कृत्वा वासनाक्षयम्। जहाति निर्ममो देहं नेयोऽसौ वासनाक्षयः	महो. ६।४४
सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः	नृसिंहो. ९।४
सर्वं समाप्नोषि ततोऽसि सर्वः	भ. गी. ११।४०
सर्वसहाः समलोष्टाश्मकाञ्चना यथोपपन्नचातुर्वर्ण्यभैक्षाचर्यं चरन्त आत्मानं मोक्षयन्त इति	आश्रमो. ४
सर्वं सुखं विद्धि सुदुःखनाशात् सर्वं च सद्रूपमसत्यनाशात्। चिद्रूपमेव प्रतिभानयुक्तं तस्मादखण्डं मम रूपमेतत्	वराहो. ३।४
सर्वं सौभाग्यदं नृणां सर्वकर्मफलप्रदम्	पं. ब्र. ९
सर्वꣳ ह पश्यः पश्यति सर्वमाप्नोति	छांदो. ७।२६।२
सर्वꣳ ह वा एतदिदं भस्म	भस्मजा. १।४
सर्वं हि पश्यन्पश्यति सर्वमाप्नोति सर्वशः	मैत्रा. ७।११
सर्वं हीदं नामानीँ३ सर्वं वाचाऽभिवदति	१ ऐत. १।६।१
सर्वं हीदं प्राणेनावृतं सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः	१ ऐत. १।६।३
सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुराकालात्प्राणो जहाति	बृह. २।१।१०
सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुराकालान्मृत्युरागच्छति	बृह. २।१।१२
सर्वं ह्ययमात्मा हि सर्वान्तरः	नृसिंहो. ७।२
सर्वं ह्येतद्ब्रह्म [माण्डू. २+ [नृ. पू.४।२+नृसिंहो. १।२+	रामो. २।१+ गणेशो. १।१
सर्वं ह्येतद्ब्रह्म आत्मा	राधोप. २।२
सर्वः (शर्वः) सर्वस्य जगतो विधाता धर्ताहर्ताविश्वरूपत्वमेति	त्रि. म. १५
सर्वाक्षरमयःकालःसदसद्व्यक्तिवर्जितः	तुरीयो. ३
सर्वाक्षरमयः कालः सर्वागममयः शिवः। सर्वश्रुत्युत्तमो मृग्यः सकलोपनिषन्मयः	ना. प. ८।५
सर्वाजीवे सर्वसंस्थे बृहन्ते (वहते अस्मिन्) तस्मिन्हंसो भ्राम्यते ब्रह्मचक्रे[श्वेता.१।६+ना.प.९।५+	भवसं. २।४
सर्वाज्ञानमसन्मयम्	ते. बिं. ३।५८
सर्वाञ्छब्दान्विजानाति, स सम्प्रसाद इत्याचक्षते	सुबालो. ४।३
सर्वाणि च भूतानि प्रज्ञायते(मा.पा.)	बृह. ४।१।२
सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते; वाग्वै सम्राट् परमं ब्रह्म	बृह. ४।१।२
सर्वाणि च भूतानि...यदेनज्जरामवाप्नोति (मा. पा.)	छां. उ. ८।१।४
सर्वाणि च भूतानि च सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवः	छांदो. ३।१९।३
सर्वाणि च भूतानि सर्वे च कामा यदेनज्जरामाप्नोति	छांदो. ८।१।४
सर्वाणि चेन्द्रियाणि सहभूतैर्न कारणं कारणानां ध्याता कारणं	अ. शिखो. ३
सर्वाणि छन्दांसि, आपः स्थानं	२ प्रणवो. २१

सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते	नारा. १
सर्वाणि जगन्ति नारायणमयानि प्रविभान्ति	त्रि. म. ना. ५।५
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि	भवसं. २।५३
सर्वाणि धर्मशास्त्राणि विस्तारयिष्णुः	सङ्कर्षणो. २
सर्वाणि बृंहयतीति ब्रह्म	ब्र. शिखो. २
(एवं) सर्वाणि भूतानि मणौ सूत्र इवात्मनि । स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः	ध्या. बिं. ६
सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति	बृह. ५।१२।१
सर्वाणि भूतानीत्येव पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि	कौ. त. २।९
सर्वाणि भूतान्यभ्यात्तं यदनेकमेकं नानावर्णं नानारूपं नानाशब्दं नानागन्धं नानारसं नानास्पर्शमिति	शौनको. १।५
सर्वाणिभूतान्यस्यैवैतानि सर्वाणि निश्वसितानि	बृह. ४।५।११
(एवं) सर्वाणि भूतान्यापिपीलिकाभ्यो बृहत्या विष्टब्धानीत्येव विद्यात्	१ ऐत. १।६।३
सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं जले.. क्रमेण विलीयते	पैङ्गलो. ३।३
सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन् यदास्ते [+चित्यु. १२।७+	महावा. ३ पारमा. ७।९
सर्वाणि ह वा इमानि भूतानि प्रणव एव प्रतितिष्ठन्ति	शौनको. ४।५
सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति	छांदो. १।११।५
सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते तच्छ्रीत्युपासीत	कौ. त. २।६
सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति	छांदो. १।११।९

सर्वाणि ह वा इमानि भूतान्यहरहः प्रपतन्त्यन्नमभिजिघृक्षमाणानि	मैत्रा. ६।१२
सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते [त्रि. ता. ५।२२+	नृ. पू. ३।५ ग. पू. २।९
सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते	छांदो. १।९।१
सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति	छांदो. १।११।७
सर्वाणि ह वा इमानि भूतान्येतदक्षरमन्वायत्तानि	शौनको. १।५
सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते तच्छ्रीत्युपासीत तत्सामेत्युपासीत	कौ. त. २।६
सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते तद्यजुरित्युपासीत	कौ. त. २।६
सर्वाणीत्युपधारय	भ. गी. ७।६
सर्वाणीन्द्रियकर्माणि	भ. गी. ४।२७
सर्वाण्डेष्वनन्तलोकाश्चानन्तवैकुण्ठाः सन्तीति सर्वेषां खल्वभिमतम्	त्रि. म. ना. ८।२
सर्वाण्येनं भूतान्यभिरक्षन्ति	बृह. ४।१।२,३
सर्वाण्येनं वामान्यभिसंयन्ति	छांदो. ४।१५।२
सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति	२ ऐत. ६।२
सर्वातीतपदालम्बी परिपूर्णैकचिन्मयः । नोद्वेगी न च तुष्टात्मा संसारे नावसीदति	महो. ६।६३
सर्वातीतोऽस्म्यहं सदा	ते. बिं. ३।१२
सर्वात्मकत्वमात्माधारो भवति	आ. पू. १
सर्वात्मकत्वं दृश्यविलयो गन्धः	आ. पू. १
(तस्मात्) सर्वात्मकेनाकारेण सर्वात्मकमात्मानमन्विच्छेत्	नृसिंहो. ७।२
सर्वात्मकोऽहं सर्वोऽहं	कुण्डिको. २६
सर्वात्मवेदनं शुद्धं यदोदेति तदात्मकम् । भातिप्रसृतिदिक्कालबाह्यं चिद्रूपदेहकम्	महो. ४।४२
सर्वात्मा समरूपात्मा शुद्धात्मा त्वहमुत्थितः । एकवर्जित एकात्मा सर्वात्मा स्वात्ममात्रकः	ते. बिं. ४।३४

सर्वा दिशश्चोर्ध्वमधश्च तिर्यक् प्रकाशयन्ती भ्राजते गुह्यकाली	गुह्यका. ६४
सर्वा दिशो बलिमस्मै हरन्ति	छांदो. २।२१।४
सर्वाद्या सर्वविद्या च वृंदावनविहारिणी	राधिको. ७
सर्वाधारमनाधारमनिरीक्ष्यं	भस्मजा. २।९
सर्वाधिव्याधिभेषजम्	पं. ब्र. १२
सर्वाधिष्ठानरूपोऽस्मि सर्वदा चिद्घनोऽस्म्यहम्	ते. बिं. ३।१३
सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् । सच्चिदानन्दरूपं तदवाङ्मनसगोचरम् [रुद्रहृ.२६+	अ. पू. ४।२९
सर्वाधिष्ठानमद्वयपरब्रह्मविहारमण्डलं...चिद्रूपादित्यमण्डलं द्वात्रिंशद्व्यूहभेदैरधिष्ठितम्	त्रि.म.ना. ७।८
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः	श्वेताश्व. ३।११
सर्वानपि वैष्णवान्धर्मान्विजृम्भयन् सर्वानपि पाखण्डान्निचखान	सङ्कर्षणो. २
सर्वानिन्द्रियकृतान्पापान्नाशयतीति तेन नाशी (वरणा) भवति [जाबालो. २+	रामो. ३।१
सर्वानुग्रहार्थाय तेषां (रुद्राक्षाणां) नामोच्चारमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलम्	रु. जा. १
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः	ब्र. बिं. २३
सर्वानन्दमयः परः	ते. बिं. ५।२
सर्वान्कामान् समश्नुते	तैत्ति. २।५
[विद्वानिति च—] सर्वान्तरस्थस्वसंविद्रूपविद्विद्वान्	निरा. २५
सर्वान् पार्थ मनोगतान्	भ. गी. २।५५
सर्वान्तर्यामिरूपोऽहं सर्वसाक्षित्वलक्षणः	ते. बिं. ६।६६
सर्वान्तरः स्वयं ज्योतिः सर्वाधिपतिरस्म्यहम्	ब्र. वि. १०६
सर्वान्पाप्मन औषत्तस्मात्पुरुष औषति	बृह. १।४।१
सर्वान्प्राणानसद्विद्धि सर्वान्भोगानसत्त्विति	ते. बिं. ३।५४
सर्वान् बन्धूनवस्थितान्	भ. गी. १।२५
सर्वापदां पदं पापा भावा विभवभूमयः	महो. ३।४
सर्वारम्भपरित्यागी[भ.गी.१२।१६+	१४।२५
सर्वारम्भा हि दोषेण	भ. गी. १८।४८
सर्वार्थवासनोन्मुक्ता तृष्णा मुक्तेति भण्यते	महो. ६।५०
सर्वार्थान् विपरीतांश्च	भ. गी. १८।३१
सर्वाश्चर्यमयं देवं	भ. गी. ११।१२
सर्वांस्तथा भूतविशेषसंघान्	भ. गी. ११।१५
सर्वाः प्रजा ब्राह्मणत्वं नरेन्द्र न ब्राह्मणत्वात्परमस्ति किञ्चित्	इतिहा. १४
सर्वाः प्रजा यत्रैकं भवन्ति	चित्यु. ११।२
सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः । सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः	अद्वैत. ३७
सर्वा भूतानि तिष्ठन्ति सर्वमायुरेति वसीयान्भवति	आर्षे. ६।२
सर्वावस्थाविनिर्मुक्तः सर्वचिन्ताविवर्जितः	ना. बिं. ५१
सर्वावस्थासु साक्षी त्वेक एवावतिष्ठते	ना. प. ६।७
सर्वा वृद्धा वायोः, सर्ववृद्धेन्द्रस्योत्सेधपरोक्षवृद्धाऽग्नेः	संहितो. १।८
सर्वाशासङ्क्षये चेतःक्षयो मोक्ष इतीष्यते	अ. पू. २।२३
सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीः (मा. पा.)	बृह. ६।३।६
सर्वाश्चर्यं हि चिन्मात्रं देहं चिन्मात्रमेव हि	ते. बिं. २।३२
सर्वाश्रयोऽहमेव	त्रि.म.ना. ८।६
सर्वासर्वविहीनोऽस्मि सात्त्विकोऽस्मि सदाऽस्म्यहम्	मैत्रे. ३ ६
(स यथा) सर्वासामपाँ समुद्र एकायनं, एवँ सर्वेषाँ रसानां जिह्वैकायनम्	बृह. ४।५।१२

सर्वासामेव नाडीनामेष बन्धः प्रकीर्तितः	वराहो. ५।४२
(एवं) सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनम्	बृह. ४।५।१२
सर्वास्वप्सु पञ्चविधꣳ सामोपासीत	छांदो. २।४।१
सर्वा ह्यस्मिन्देवताः शरीरेऽधिसमाहिताः	प्रा. हो. ४।४
सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषद इमां त्वेवाचक्षते	३ ऐत. २।५।१
सर्वां च सावित्रीमन्वाह, सर्वाश्च मधुमतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहा	बृह. ६।३।६
सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान्सर्वाश्च व्युष्टीः सर्वाणि च भूतानि स्थावरजङ्गमान्यनुभवेयमिति	२ प्रणवो. २
सर्वांश्च वेदान् साङ्गानपि ब्रह्म ब्राह्मणैश्च...सत्यं धर्मेण धर्मं तर्पयामि स्वेन तेजसा	अ. शिरः. १।१
सर्वे आनन्दरसा यस्मात्प्रकटिता भवन्ति	सामर. ३
सर्वे ऊष्माणोऽग्रस्ता अनिरस्ता विवृत्ता वक्तव्याः प्रजापतेरात्मानं परिददातीति	छांदो. २।२२।५
सर्वे कामा मनोगता व्यावर्तन्ते	प. हं. ९
सर्वे कुर्वन्ति कर्माणि विक्लशाः पूर्वकर्मभिः	शिवो. ७।१२५
सर्वेच्छाकलनाशान्तावात्मलाभोदयाभिधः । स पुनः सिद्धिवाञ्छायां कथमर्हत्यचित्ततः	वराहो. ३।३०
सर्वेच्छाजालसंशान्तावात्मलाभो भवेन्मुने । स कथं सिद्धिजालानि नूनं वाञ्छत्यचित्तकः	अ. पू. ४।८
सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः । धिया येन परित्यक्ताः स जीवन्मुक्त उच्यते	महो. २।५८
सर्वे जीवाश्च स्वस्वरूपं भजन्ते	त्रि.म.ना. ३।७
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः । तेषां मुक्तिः कथं देव कृपया वद शङ्कर	यो. शि. १।१
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः । तेषां मुक्तिकरं मार्ग मायाजालनिकृन्तनम्	१ यो. त. ४
सर्वे तु शक्तिजालेन रोगा नश्यन्ति निश्चयम्	योगकुं. १।१८
सर्वे देवा ऋषयो मुनयः सिद्धगन्धर्वयक्षरक्षःपिशाचाः सर्वे नारायणः	ना.पू.ता. ५।६
सर्वे देवाः शिवात्मकाः	रुद्रहृ. ४
सर्वे देवाः संविशन्तीति विष्णुः	अ. शिखो. २
सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् । संवृतेऽस्मिन्प्रदेशे वै भूतानां दर्शनं कुतः	अ. शां. ३२
सर्वे धर्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितम्	अ. शां. ९९
सर्वे धर्माः समाभिन्ना अजं साम्यं विशारदम्	अ. शां. ९३
सर्वे नमस्यन्ति च सिद्धसङ्घाः	भ.गी. ११।३६
सर्वे नादसमुद्भवाः	यो. शि. ३।८
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि	महाना. १।८
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत	श्वेताश्व. ३।१७
सर्वेन्द्रियगुणाभासं	भ. गी. १३।१५
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः	अ. वि. १०७
सर्वेन्द्रियगुणाभासा सर्वेन्द्रियविवर्जिता । सर्वेषां प्रभुरीशानी सर्वेषां शरणं सुहृत	गु. का. ४९
सर्वेन्द्रियविवर्जितम्	भ. गी. १३।१५
सर्वेन्द्रियविहीनोऽस्मि सर्वकर्मकृदप्यहम्	मैत्रे. ३।१५
सर्वे पाप्मानोऽतो निवर्तन्ते	छांदो. ८।४।१
सर्वेऽप्येते यज्ञविदः	भ. गी. ४।३०

सर्वे बन्धाः प्रविनश्यन्ति	त्रि. म. ना.८।७
सर्वे ब्रह्म वदिष्यन्ति सम्प्राप्ते तु कलौ युगे। वैदिके नानुतिष्ठन्ति शिश्नोदरपरायणाः	भवसं. १।५७
सर्वेभ्यः पापकृत्तमः	भ. गी. ४।३६
सर्वेभ्योऽन्तस्स्थानेभ्यो ध्येयेभ्यः प्रदीपवत्प्रकाशयतीति प्रकाशः	अ. शिखो. २
सर्वेभ्यो लोकेभ्यः सर्वे प्राणिनोऽभवन्	गायत्रीर. १
सर्वेभ्यो वेदेभ्यः सर्वे लोका अभवन्	गायत्रीर. १
सर्वे मरुद्गणा अजीजनन् (देव्याः)	बह्वृचो. १
सर्वे युद्धविशारदाः	भ. गी. १।९
सर्वे वयमतः परम्	भ. गी. २।१२
सर्वे वाक्यात्मका मन्त्रा वेदशास्त्राणि कृत्स्नशः	यो. शि. ३।७
सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति [कठो. २।१५+	गुह्यका. ३९
सर्वे वेदा यत्रैकं भवन्ति	चित्यु. ११।१
सर्वे वेदाः प्रणवादिकास्तं प्रणवं तत्साम्नोऽङ्गं वेद स आयुर्यशःकीर्तिज्ञानैश्वर्यवान्भवति	नृ. पू. १।३
सर्वे वेदाः सर्वे यज्ञा इत्यथ खल्विन्द्रमन्वायत्तं	शौनको. १।५
(तदनु) सर्वेशमप्रमेयमजं शिवं परमाकाशं निरालम्बमद्वयं... परं ब्रह्म प्राप्नोति	मं. ब्रा. ३।१
सर्वेशः सर्वसाक्षी च	२ रुद्रा. ४४
सर्वेश्वरं सर्वदेवैरुपास्यम्	ना. प. ९।१७
सर्वेषणाविनिर्मुक्तश्छित्त्वा तं तु न बध्यते	क्षुरिको. २५
(तस्मात्) सर्वेषामधिकारिणामनधिकारिणां च भक्तियोग एव प्रशस्यते	त्रि. म. ना. ८।४
(एवं) सर्वेषामध्वनां पादावेकायनमेवं सर्वेषां वेदानां वागेकायनम् [बृह.२।४।११+	४।५।१२
सर्वेषामपि पापानां प्रायश्चित्तं त्वमेव हि	तुलस्यु. १३

सर्वेषामात्मानुसन्धानं विधिरित्येव	ना. प. ७।११
(एवं) सर्वेषामानन्दानामुपस्थ एकायनं सर्वेषां विसर्गाणां पायुरेकायनम् [बृह.२।४।११+	४।५।१२
सर्वेषामिन्द्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते	प. हं. ९
सर्वेषामेव गतीनामव्यक्तं हृदयम्	सुबालो. १३।४
सर्वेषामेव गन्धानां पृथिवी हृदयं	सुबालो. १३।४
सर्वेषामेव पापानां सङ्घाते समुपस्थिते। तारं द्वादशसाहस्रमभ्यसेच्छेदनं हि तत्	१सं.सो.२।१०३
सर्वेषामेव भूतानां महासौभाग्यदायिनी। महालक्ष्मीर्महादेवी..	ना. पू. ता. २।२
सर्वेषामेव भूतानां विष्णुरात्मा..	रुद्रहृ. १३
सर्वेषामेव रूपाणां तेजो हृदयम्	सुबालो. १३।४
सर्वेषामेव शब्दानामाकाशं हृदयम्	सुबालो. १३।४
सर्वेषामेव रसानामापो हृदयम्	सुबालो. १३।४
सर्वेषामेव शर्म भवान्	२ प्रणवो. १९
सर्वेषामेव सत्त्वानां मृत्युर्हृदयम्	सुबालो. १३।४
सर्वेषामेव स्पर्शानां वायुर्हृदयम्	सुबालो. १३।४
सर्वेषामेव त्रीणि शरीराणि वर्तन्ते	यो. चू. ७२
(एवं) सर्वेषां कर्मणां हस्तावेकायनम् [बृह. २।४।११+	४।५।१२
सर्वेषां खलु भूतानामात्मा सत्ये प्रतिष्ठितः (मा. पा.)	छां.उ. ६।१७
(एवं) सर्वेषां गन्धानां नासिके एकायनम्	बृह. ४।५।१२
सर्वेषां च महीक्षिताम्	भ. गी. १।२५
(तस्मात्) सर्वेषां जीवानामिष्टविषये...सुखबुद्धि...	त्रि.म.ना. ५।३
सर्वेषां ज्योतिषां ज्योतिस्तमसः परमुच्यते	त्रि.म.ना. ४।३
सर्वेषां दिव्यानां (विद्यानां) प्रेरयिता ईशानः	पञ्चब्र. १
सर्वेषां देवानां सार्ष्टितां सालोक्यतां सायुज्यतां गच्छति	कठश्रु. १३
सर्वेषां देवालयस्थं भस्म शिवाग्निजं शिवयोगिनाम्	बृ. जा. ५।७

सर्वेषां दोषरत्नानां सुसमुद्रिकयाऽनया । दुःखशृङ्खलया नित्यमलमस्तु मम स्त्रिया [याज्ञव.१६+ महो. ३।४७
सर्वेषां पुरुषाणामन्तःपुरुषः स आत्मा स विज्ञेयः त्रि. ता. ५।१
सर्वेषां पूर्वोक्तब्रह्मयज्ञक्रमं मुक्तिक्रममिति ब्रह्मपुत्रः प्रोवाच पा. ब्र. ५
सर्वेषां प्रणवो बीजं हंसः शक्तिः प्रकीर्तिता गुह्यका. ८।१
सर्वेषां प्राणिनां प्रारब्धसञ्चितागामिकर्मसाधर्म्यदर्शनात्कर्माभिप्रेरिताः सन्तो जनाः क्रियाः कुर्वन्ति व. सू. ७
(ॐ) सर्वेषां प्राणिबुद्बुदानां निरञ्जनाव्यक्तामृतनिधौ विलयविलासः स्थितिर्विजृम्भते स्वसंवे. १
सर्वेषां बीजानां हयग्रीवैकाक्षरबीजमनुत्तमं मन्त्रराजात्मकंभवति हयग्री. ६
सर्वेषां ब्रह्मादीनां देवर्षीणां मनुष्याणां मूर्तिरेका परब्र. ६
सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात् ३ ऐत. २।४।८
सर्वेषां भूतानां मूर्धा भवति कौ. त. ४।२
सर्वेषां भूतानां मूर्धा राजा भवति बृह. २।१।२
सर्वेषां भूतानां मूर्धेति वा अहमेतमुपास इति कौ. त. ४।२
(एवं) सर्वेषां रसानां जिह्वैकायनम् [बृह. २।४।११+ ४।५।१२
(एवं) सर्वेषां रूपाणां चक्षुरेकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषां वस्तूनां मुख्यवस्तु भवति ना.उ.ता. ३।१
सर्वेषां वा एतद्भूतानामाकाशः परायणम् [नृ.पू.३।६+त्रि.ता. ५।२२+ग.पू.२।९
(एवं) सर्वेषां विसर्गाणां पायुरेकायनम् [बृह. २।४।११+ ४।५।१२
(एवं) सर्वेषां वेदानां वागेकायनं [बृ. उ. २।४।११+ ४।५।१२
(एवं) सर्वेषां शब्दानां श्रोत्रमेकायनम् [बृह. २।४।११+ ४।५।१२

सर्वेषां शरीराणां समानगुणाभवन्ति सामर. १०१
(एवं) सर्वेषां सङ्कल्पानां मन एकायनम् [बृह. २।४।११+ ४।५।१२
सर्वेषां समवायेन सिद्धिः स्याद्योगरक्षणा योगो. ३२
(एवं) सर्वेषां स्पर्शानां त्वगेकायनम् [बृह.२।४।११+ ४।५।१२
सर्वे स्पर्शा मृत्योरात्मानः छांदो. २।२२।३
सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति छांदो. २।२२।५
सर्वेऽस्मै देवा बलिमावहन्ति तैत्ति. १।५।३
सर्वे स्वरा इन्द्रस्यात्मानः छांदो. २।२२।३
सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति छांदो. २।२२।५
सर्वे होतारो यत्रैकं भवन्ति चित्यु. ११।१
सर्वेषु कालेषु लाभालाभौ समौ कृत्वा...ध्रुवशीलोऽष्टौ मास्येकाकी चरेत् (?) प. हं. प. ७
सर्वेषु तीर्थेषु स्नातो भवति ऊर्ध्वपुं. ६
सर्वेषु भूतेषु गणेशमेकं विज्ञाय तं मृत्युमुखात् प्रमुच्यते हेरम्बो. ८
सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते ३ ऐत. २।३।४
सर्वेषु वेदेष्वारण्यकमावर्तयेत् आरुणि. २
सर्वे सहैवावनिपालसङ्घैः भ. गी. ११।२६
सर्वैरेव (अक्षरैः) स इन्द्रोऽभवत् अव्यक्तो. ६
सर्वैरेव (अक्षरैः) स विष्णुरभवत् अव्यक्तो. ६
सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति अद्वयता. ४
सर्वोत्कृष्टपरमाद्वितीयप्रद्योतमानं तत्त्वाकाशं भवति मं. ब्रा. १।३
सर्वोपनिषदभ्यासं दूरतस्त्यज्य सादरम् । तेजोबिन्दूपनिषदमभ्यसेत्सर्वदा मुदा । सकृदभ्यासमात्रेणब्रह्मैवभवतिस्वयम [ते.बिं. ६।११०,११
सर्वोपकारी मोक्षी भवति दत्तात्रे. १।६
सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम् । सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम् मुक्तिको. १।४४

सर्वोपसंहारेण संहारप्रणवः	तुरीयो. १
सर्वोपाधिविनिर्मुक्तं स्वात्मानं भावयेत्सुधीः	कठरु. ४४
सर्वोपाधिविनिर्मुक्तं परं तत्त्वं तदुच्यते	अमन. १।११
सर्वो योगाग्निना देहो ह्यजडः शोकवर्जितः	यो. शि. १।२६
सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु	महाना.१०।११
सर्वोऽसि सर्वहीनोऽसि शान्ताशान्तविवर्जितः	ते. बिं. ५।६८
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु [+महाना. १०।११	शिव. सं. ३१
सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्	छांदो. ५।२।४
सलिल एको द्रष्टाऽद्वैतो भवति	बृह. ४।३।३२
सलिल एवेदं सलिलं वनं भूयस्तेनैव मार्गेण जाम्राय धावति	सुबालो. ४।४
सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम	महो. २।७७
सलिलमिति लौहित्यकारणं सत्त्वम्	भावनो. ७
सलिलात्फेनमभवत्	गायत्रीर. १
सलिलेधारयेच्चित्तंनाम्भसापरिभूयते	यो.शि. ५।५०
सलिले सैन्धवं यद्वत्साम्यं भवति योगतः । तथाऽऽत्ममनसोरैक्यं समाधि-(रिति कथ्यते) रभिधीयते [सौभाग्य. १८+	वराहो. २।७५
स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः	बृह. ५।१०।१
सवनात्सविता	मैत्रा. ६।७
सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते । अवस्तु सोपलम्भं च..	अ. शां. ८७
स वा अयमात्माऽनन्तोऽजरोऽमरो न वारे बाह्यो नांतरः	आर्षे. ५।२
स वा अयमात्मा ब्रह्म	बृह. ४।४।५
स वा अयमात्मा सर्वेषां भूतानामधिपतिः	बृह. २।५।१५
स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः	बृह. २।५।१८
स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते	बृह. ४।३।८
स वा ऋषे तृतीयं [illegible]	१ ऐत. २।३।३
स वा ऋषे द्वितीयं शस	१ ऐत. २।३।२
स वा एवं प्रवरणीय आत्मकामेनेत्याहुर्ब्रह्मवादिनः	मैत्रा. ६।७
स वा एष आत्मा परः	नृसिंहो. ५।१
स वा एष आत्मा हृदि	छांदो. ८।३।३
स वा एष आत्मेत्यदो वशं नीत एव सितासितैः कर्मफलैरभिभूयमान इव प्रतिशरीरेषु चरति	मैत्रा. २।१०
स वा एष एकत्रिधाभूतोऽष्टधैकादशधा द्वादशधाऽपरिमितधा वोद्भूत उद्भूतत्वाद्भूतेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्मान्तर्बहिश्चान्तर्बहिश्च	मैत्रा. ४।५
स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव	बृह. ४।३।१७
स वा एष एतस्मिन्सम्प्रसादे रत्वा..	बृह. ४।३।१५
स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं पापं..	बृह. ४।३।३४
स वा एष एतस्मिन्स्वप्ने रत्वा...	बृह. ४।३।१६
स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते	छांदो. ८।१२।५
स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति	छांदो. ७।१५।४
स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराट् भवति	छांदो. ७।२५।२
स वा एष ओमित्येतदात्मा, स त्रेधाऽऽत्मानं व्यकुरुत	मैत्रा. ६।३
स वा एष दिव्यः शाकरः शिशुमारस्तस्य ह य एवं वेदाप पुनर्मृत्युं जयति	सहवै. २३

स वा एष निरिन्द्रियो विमुक्तोऽस्माल्लोकात्प्रैति	बृह. ६।४।१२
स वा एष पञ्चधाऽऽत्मानं प्रविभज्य निहितो गुहायां मनोमयः प्राणशरीरो बहुरूपः सत्यसङ्कल्प आत्मेति	मैत्रा. २।९
स वा एष पुरुषविध एव	तैत्ति. २।२
स वा एष पुरुषः पञ्चधा पञ्चात्मा	महाना. १७।१४
स वा एष पुरुषोऽन्नरसमयः	तैत्ति. २।१।१
स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते	नृसिंहो. ९।५
स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति	बृह. ४।४।२५
स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु	बृह. ४।४।२४
स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते	बृह. ४।४।२२
स वा एष यज्ञः प्रादक्षिणोऽनन्तदक्षिणः समृद्धतरः	सहवै. २१
स वा एष यज्ञः सद्यः प्रतायते सद्यः सन्तिष्ठते	सहवै. १७
स वा एष वाचः परमो विकारः, यदेतन्महदुक्थम्	१ ऐत. ३।६।३
स वा एष शुद्धः स्थिरोऽचलश्चालेप्योऽव्यग्रो निःस्पृहः प्रेक्षकवदवस्थितः	मैत्रा. २।११
स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञो बुद्धिपूर्वमिहैवावर्तते	मैत्रा. २।५
स वा एषा देवता दूर्नाम दूरꣳ ह्यस्या मृत्युर्दूरꣳ ह वा अस्मान्मृत्युर्भवति	बृह. १।३।९
स वा एषोऽभिभूतः प्राकृतैर्गुणैः	मैत्रा. ३।२
स वा एषोऽस्मद्धृदन्तरे तिष्ठन्कृतार्थोऽमन्यत	मैत्रा. २।९
स वाजपेयेनसोऽतिरात्रेणसोऽप्तोर्यामेण स सर्वैः क्रतुभिर्यजते	ग. शो. ५।३
स वायुना ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन	छांदो. ३।१८।४
स वायुपूतो भवति, स आदित्यपूतो भवति। अरोगी भवति। श्रीमांश्च भवति	मुद्गलो. ५।१
स वायुप्रतिष्ठा, आकाशात्मा स्वरेति स तद्भवति	कौ. त. २।१४
स वायुमिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत्	मैत्रा. २।६
स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीत	छांदो. ३।१३।५
स वासुदेवो न यतोऽन्यदस्ति	गो. पू. ४।२
स वां मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति	बृह. २।५।१७
सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि (कुर्यात्)	सरस्व. ४९
सविकारमुदाहृतम्	भ. गी. १३।७
सविकारस्तथा जीवो निर्विकारस्तथा शिवः। कोशास्तस्य विकारास्ते ह्यवस्थासु प्रवर्तकाः	त्रि. ब्रा. २।१३
स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः [+तै.आ.१०।१।३+	महाना. २।१ सूर्यता. १।३
स विज्ञानो भवति स विज्ञातमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च	बृह. ४।४।२
सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताऽधरात्तात्। सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः [सूर्यो.८+	ऋ.मं.१०।३६।१४
सविता प्रसविता दीप्तो दीपयन् दीप्यमानः	नृ. पू. २।७
सविता प्राणिनः सूते प्रसूते शक्तिम्	त्रि. ता. १।६
सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं चिन्तयामि	मैत्रा. ६।७

सविता श्रियः प्रसविता श्रियमेवाप्नोति । अथो प्रज्ञातयैव प्रतिपदाꣳ छन्दाꣳसि प्रतिपद्यते	सहवै. १५
सवितुरिति सविता, सावित्रमादित्यो वै	गायत्रीर. २
सवितुर्वा योग्यो जीवात्मपरमात्मसमुद्भवस्तं प्रकाशशक्तिरूपं जीवाक्षरं स्पष्टमापद्यते..	त्रि. ता. १।१४
स वित्तेनैवा च पूर्यतेऽप च क्षीयते	बृह. १।५।१५
सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम्	श्वेताश्व. २।७
स त्रिशृङ्ग एवाभवत्	शौनको. २।३
स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः । प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः [भवसं. २।४६	श्वेता. ६।१६
स विश्वकृत् स हि सर्वस्य कर्ता तस्य लोकाः स उ लोक एव	बृह. ४।४।१३
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभिः	श्वेताश्व. ५।७
सविषयं मनो बन्धाय, निर्विषयं मुक्तये भवति	मं. ब्रा. ९।१
स विष्णुःसशिवःसब्रह्मासेन्द्रःसेन्दुः स सूर्यः स वायुः सोऽग्निः स ब्रह्म	ग. शो. २।१
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् [+ना. प. ९।१४+	श्वेता. ३।१९ भवसं. २।४९
स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम् । उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः	मुण्ड. ३।२।१
(अथ) संवेशयञ्जायायै हृदयमभिमृशेत्	कौ. त. २।१०
स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपञ्चः परिवर्ततेऽयम् । धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम	श्वेता. ६।६
स वै खलु प्रस्तोता साम प्रस्तौति	बृह. १।३।२८
स वै गणेशः सर्वात्मा विज्ञेयः	गणेशो. ४।१०
स वै गौतम तीर्थेनेच्छसी३ इत्युपैम्यहम् (मा. पा.)	बृह. ६।२।७
स वै त्रिविधः—सात्त्विको राजसस्तामसश्चेति । सात्त्विकी ज्ञानशक्तिः, राजसी क्रियाशक्तिः, तामसी द्रव्यशक्तिः	गणेशो. ४।३
स वै दैवः प्राणो यः सञ्चरंश्चासञ्चरंश्च न व्यथते न रिष्यति	बृह. १।५।२०
स वै नैव रेमे तस्मादेकाकी न रमते	बृह. १।४।३
स वै ब्रह्म परमात्मेत्युच्यते	हंसो. ४
स वै बलं बलिनामग्रगण्यः पुण्यः शरण्यः सकलस्य जन्तोः । तमेकदन्तं गजवक्त्रमीशं विज्ञाय दुःखान्तमुपैति सद्यः	हेरम्बो. ११
स वै ब्रह्मण आनन्दः	गान्धर्वो. ६
स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत	बृह. १।३।१२
स वै वेदिता स्याद्याज्ञवल्क्य वेद वा [बृह. ३।९।१०,११,	१२–१७
स वैष्णवं धाम भित्वा परं ब्रह्म प्राप्नोति	त्रि. ता. १।१५
सव्यदक्षिणनाडीस्थो मध्ये चरति मारुतः । तिष्ठतः खेचरी मुद्रा तस्मिन्स्थाने न संशयः	शाण्डि. १।७।४०
सव्यहस्त आज्यस्थाली (शारीरयज्ञस्य)	प्रा. हो. ४।२
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते	अ. ना. ११
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः	सुदर्श. ११
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् । दक्षिणेऽपि तथा सव्यं गोमुखं गोर्मुखं (गोमुखं) यथा [त्रि. ब्रा. २।३६+	शाण्डि. १।३।२
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् । दक्षिणेऽपि तथा सव्यं गोमुखं तत्प्रचक्षते	जा. द. ३।४

सव्ये दले तिष्ठति पद्मयोनिः स्वरान्वितो दक्षिणपत्रगो हरिः । श्रिया समेतः शिवयाऽनुषक्तो मध्ये दलेऽहं निवसामि नित्यम्	५ बिल्वो. ३
सव्योरुदक्षिणे गुल्फे दक्षिणं दक्षिणेतरे । निदिध्यादृजुकायस्तु चक्रासनमिदं मतम्	वराहो. ५।१७
स शब्दस्तुमुलोऽभवत्	भ. गी. १।१३
सशरीरं समारोप्य तन्मयत्वं तथोमिति । त्रिशरीरं तमात्मानं परं ब्रह्म विनिश्चिनु	ना. प. ८।८
स शान्तिमधिगच्छति	भ. गी. २।७१
स शान्तिमाप्नोति न कामकामी	भ. गी. २।७०
सशिखं वपनं कृत्वा बहिस्सूत्रं त्यजेद्बुधः । यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् [+ना. प. ३।७८+	ब्रह्मो. ६ परब्र. ७
सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीती निष्क्रम्य पुत्रं दृष्ट्वा त्वं ब्रह्मा त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत्	कठश्रु. ४
सशिखान् केशान्निष्कृष्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात्	कठरु. ३
स शिखान्केशान्विसृज्य यज्ञोपवीतं छित्त्वा पुत्रं दृष्ट्वा त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत्	१ सं. सो. १।२
स शिवः सच्चिदानन्दः सोऽन्वेष्टव्यो मुमुक्षुभिः	पं. ब्र. ३५
स शिवः स शिवः स शिवो गणेशः	गणेशो. २।४
स शीतोष्ण–सुखदुःख–मानावमानवर्जितः	प. हं. प. ११
स शुकः स्वकया बुद्ध्या न वाक्यं बहु मन्यते	महो. २।१७
स शुद्धः स शुद्धः स शुद्धो गणेशः	गणेशो. २।४
स शुष्यति स उद्वर्तते तस्मादनृतं न वदेत्	१ ऐत. ३।६।५
स शौद्रं वर्णमसृजत	बृह. १।४।१३
स षकारं ब्रवाणी३ँ अषकारा३ँ इति, स षकारमेव ब्रूयात्	३ ऐत. २।६।२
स षट्पदो भवति, साम एव षट्पदः	ग. पू. १।११
स षडूर्मिवर्जितः । षड्भावविकारशून्यः	प. हं. प. ११
स षोडशिना यजते, स वाजपेयेन यजते, सोऽतिरात्रेण यजते, सोप्तोर्यामेण यजते, सोऽश्वमेधेन यजते, स सर्वैः क्रतुभिर्यजते	नृ. पू. ५।१४
स सकलभोगान् भुङ्क्ते देहं त्यक्त्वा शिवसायुज्यमेति	का. रुद्रो. ५
स सच्चिदानन्दाद्वयचिद्घनः सम्पूर्णानन्दैकबोधो ब्रह्मैवाहमस्मीत्यनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स ह परमहंसपरिव्राट्	प. हं. प. ११
स सततं सकलरुद्रमन्त्रजापी भवति, स सकलभोगान्भुङ्क्ते, देहं त्यक्त्वा शिवसायुज्यमेति, न स पुनरावर्तते	का. रुद्रो. ५
स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति, स न दह्यतेऽथ मुच्यते	छांदो. ६।१६।२
स्वायत्तमेकान्तहितं स्वेप्सितत्यागवेदनम् । यस्य दुष्करतां यातं धिक्तं पुरुषकण्टकम्	महो. ४।८९
स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति	बृह. १।४।१६
स्वाराज्यमतिरात्रेण (यजति)	मैत्रा. ६।३६
स्वार्थसंयमात्पुरुषज्ञानम्	शांडि. १।७।५२
स्वार्थे स्वाभाविकेऽर्थे च बहुधा संस्थितिस्त्वयि	मैत्रा. ५।२
स्वालोकतः शास्त्रदृशा स्वबुद्ध्या स्वानुभावतः । प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनःपिता	महो. ५।८१
स्वावगम्यो लयः कोऽपि यो मनोवागगोचरः (जायते वागगोचरः) [वराहो. २।८१+	अमन. २।२२
स्वावबोधकलालापकुशला दुर्लभा भुवि	अमन. २।२३
स्वाविद्यातत्कार्यजातं यद्विद्यापह्नवं गतम् । तद्धंसविद्यानिष्पन्नं रामचन्द्रपदं भजे	ब्र. वि. शीर्षकं
स्वाविद्याद्वयतत्कार्यापह्नवज्ञानभासुरम् । मन्त्रिकोपनिषद्वेद्यं रामचन्द्रमहं भजे	मन्त्रिको. शीर्षकं
स्वाश्रमेष्वेवानुक्रमणं स्वधर्म एव सर्वं धत्ते	मैत्रा. ४।३
स्वाहान्ते जुहुयात्तत्र वर्णदेवाय पिण्डकान् । आघारावाज्यभागौ च प्रक्षिपेद्व्याहृतीः सुधीः	ग्र. प्रा. ३।१३
स्वाहा स्वधा यत्र वषट्करोति रुद्रः पशूनां गुह्यया निमग्नः	एका. ह. ५
स्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति	महाना. १७।९
स्वेच्छाचारस्वस्वभावो मोक्षः परं ब्रह्म	निर्वाणो. ८
स्वेदजाः क्रिमिकीटादयः	ना. पू. ता. ५।६
स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति	बृह. ४।३।९
स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति [छांदो. ८।३।४+	मैत्रा. २।२
स्वेनावृतं सर्वमिदं प्रपञ्चं पञ्चात्मकं पञ्चसु वर्तमानम् । पञ्चीकृतानन्तभवप्रपञ्चं पञ्चीकृतस्वावयवैरसंवृतम्	ना. प. ९।१८
स्वे महिम्नि तिष्ठमानं दृष्ट्वाऽऽवृत्तचक्रमिव संसारचक्रमालोकयति	मैत्रा. ६।२८
स्वे महिम्नि सदा समासते तस्मादेनमकारार्थेन परेण ब्रह्मणैकीकुर्यात्	नृसिंहो. ७।६
स्वे स्वे कर्मण्यभिरतः	भ. गी. १८।४५
स्वैरं न विगायेत्तन्महाव्रतम् । न स मूढवल्लिप्यते	अवधू. ६
स्वैरं स्वैरविहरणं तत्संसरणम्	अवधू. ६
स्वौजसा सर्वमादधाति यः पापीयांसमनुपदमाहिंसत्सुपुण्यं पुण्यात्मकं पुण्यं वितानं दाधार देवाय स्वाहा	पारमा. ६।३

ह

हकारं वियत्स्वरूपं च समानं स्फटिकप्रभम् । ब्रह्माभिनासाकर्णं च पादाङ्गुष्ठादिसंस्थितम्	ध्या. बिं. ९७
हकारः परमशः स्यात्तत्पदं चेति निश्चितम् । सकारो ध्यायते जन्तुर्हकारो हि भवेद्ध्रुवम्	यो. चू. ८३
हकारेण तु सूर्यः स्यात्सकारेणेन्दुरुच्यते । सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते	यो.शि. १।१३३
हकारेण बहिर्याति सकारेण विशेत् पुनः । हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा । हंस हंसेति	

मन्त्रोऽयं सर्वजीवैश्च जप्यते [ध्या. बिं. ६१+	यो. शि. १।१३०
हकारौ सकारोमकारौ त्रयमेकस्वरूपं भवति	हयग्री. ६
हठेन ग्रस्यते जाड्यं सर्वदोषसमुद्भवम् । क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ॥ तदैक्ये साधिते ब्रह्मंश्चित्तं याति विलीनताम्	यो.शि. १।१४
हतो वा प्राप्स्यसि स्वर्गं	भ. गी. २।३७
हत्वाऽपि स इमाँल्लोकान्	भ. गी. १८।१७
हत्वाऽर्थकामांस्तु गुरूनिहैव	भ. गी. २।५
हत्वा स्वजनमाहवे	भ. गी. १।३१
हत्वैतानाततायिनः	भ. गी. १।३६
हनिष्याम वा एतद्वो यद्देवाम पराभावयिष्यथ	शौनको. १।१
हनिष्ये चापरानपि	भ. गी. १६।१४
हन्तकारं मनुष्याः स्वधाकारं पितरः (उपजीवन्ति)	बृह. ५।८।१
हन्त चित्तमहत्तायां कैषा विश्वासता तव (चित्तमूलं हि संसारः)	वराहो. ३।२१
हन्त त इदं प्रवक्ष्यामि-गुह्यं ब्रह्म सनातनम्	कठो. ५।६
हन्ततर्हिभवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति	बृह. ४।५।५
हन्त ते कथयिष्यामि	भ. गी. १०।१९
हन्त तेऽनया कात्यायन्याऽन्तं करवाणि	बृह. २।४।१
हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते	कठो. २।१९
हन्ताहमेतद्भगवत्तो वेदानीति	छांदो. १।८।७
हन्ताहमेतद्भगवतो वेदानीति(मा.पा.)	छांदो. १।८।७
हन्ति पाप्मानं जहाति च य एवं वेद	बृह. ५।५।३,४
हन्तुं स्वजनमुद्यताः	भ. गी. १।४५
हन्तेन्द्रियगणा यूयं त्यजताकुलतां शनैः । चिदात्मा भगवान्सर्वसाक्षित्वेन स्थितोऽस्म्यहम्	अ. पू. ३।८
हन्यान्मुष्टिभिराकाशं क्षुधार्तः खण्डयेत्तुषम् । नाहं ब्रह्मेति	
जानाति तस्य मुक्तिर्न जायते	पैङ्गलो. ४।२२
हयग्रीवैकाक्षरजपशीलाज्ञया सूर्यादयः स्वतः स्वस्वकर्मणि प्रवर्तन्ते	हयग्री. ६
हयो भूत्वा देवानवहत्	बृह. १।१।२
हरन्ति प्रसभं मनः	भ. गी. २।६०
हरमायात्मकेन ह्रीङ्कारेण हृल्लेखाख्या भगवती त्रिपुरेति व्यापठ्यते	त्रि. ता. १।१
हरमुवाच-कुरु हर संहारम् । जगद्धरणाद्धरो भव	गणेशो. ३।११
हरितस्य नीलस्य पीतस्य लोहितस्य श्वेतस्य नाड्यो रुधिरस्य पूर्णाः	सुबालो. ४
हरिहरहिरण्यगर्भस्रष्टारमप्रमेयमनाद्यन्तं रुद्रसूक्तैरभिषिच्य	भस्मजा. २।४
हरिं हरन्तं पादाभ्यामनुयान्ति सुरेश्वराः	शरभो. ६
हरिꣳ हरन्तमनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम् [महाना. १३।११+	चित्यु. १५।१
हरिः पतङ्गः पटरी सुपर्णः	चित्यु. ११।८
हरे राम हरे राम राम राम हरे हरे । हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे	कलिसं. २
हरो वै विलोक्य रुदति स्म । रोदनाद्रुद्रसंज्ञः	गणेशो. ३।१३
हर्षशोकान्वितः कर्ता	भ. गी. १८।२७
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः। न परामृश्यते योऽन्तः स जीवन्मुक्त उच्यते	महो. २।४४
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः । न हृष्यति ग्लायति यः परामर्शविवर्जितः	महो. ६।४९
हर्षामर्षभयोद्वेगैः	भ. गी. १२।१५
हविर्गुणा न वक्तव्याः पितरो यावदर्पिताः । तृप्तेस्तु पितृभिः पश्चाद्वक्तव्यं शोभनं हविः	इतिहा. ८२
हविर्मेऽजस्रं विलुहति	इतिहा. ८५
हसत्युल्लसति प्रीत्या क्रीडते मोदते तदा । तनोति जीवनं प्रीत्या बिभेति सर्वतो भयात्	यो. शि. ६।६७

हसन्ति लोकायतिका हसन्ति कुटिला जनाः	सूर्यता. १।१२
हसौं ह्यग्रीवस्वरूपो भवति	हयग्री. ६
हस्तग्रासं च भक्षयेत् (यतिः)	ना. प. ५।४८
हस्तमेवाप्येति यो हस्तमेवास्तमेति	सुबालो. ९।६
हस्तं हस्तेन सम्पीड्य दन्तैर्दन्तान्विचूर्ण्य च। अङ्गान्यङ्गैः (इवाक्रम्य) समाक्रम्य जयेदादौ स्वकं मनः [महो. ५।७५+	मुक्तिको. २।४२
हस्ताभावात्क्रिया न च	ते. बिं. ५।१९
हस्ताभ्यां चाग्निमसृजत	बृह. ६।४।६
हस्ताभ्यां नद्युत्तरणं न कुर्यान्न (वृक्षारोहणमपि)वृक्षमारोहेत्	ना.प.५।८+७।१
हस्तावध्यात्मं, आदातव्यमधिभूतं, इन्द्रस्तत्राधिदैवतं, नाडी तेषां निबन्धनम्	सुबालो. ५।११
हस्तावेवास्या एकमङ्गमुदूढं, तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा	कौ. त. ३।५
हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते	जा. द. ४।२१
हस्तिजिह्वाभिधायास्तु वरुणो देवता भवेत्	जा. द. ४।३६
हस्ति हिरण्यं दासभार्यं क्षेत्राण्यायतनानीति	छांदो. ७।२४।२
हस्तिनि सिंहे दंशे मशके नकुलसर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चनेति	सुबालो. १३।२
हस्तेन दक्षिणेनैव पीडयेन्नासिकापुटम्	त्रि. ब्रा. २।९५
हस्तौ च दातव्यं च –(मा. पा.)	प्रश्नो. ४।८
हस्तौ चादातव्यं च	प्रश्नो. ४।८
हस्तौ चादातव्यं च नारायणः	सुबालो. ६।१
हस्तौ पादावुपस्थं च जिह्वा पायुस्तथैव च। कर्मेन्द्रियाणि पञ्चैव राजन्नस्मिञ्छरीरके	भवसं. २।१८
हस्तौ वै ग्रहः, स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति	बृह. ३।२।८
हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः	बृह. ४।१।२–७
हं नमः शिरसि प्रोतं वेद शिवो भवेत्	हंसषोढो. २
हंभी तृतीयस्याद्यार्धान्त्यं मृत्युं चतुर्थस्याद्यार्धान्त्यं साम तु जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति	नृ. पू. १।५
हंस एव परं वाक्यं हंस एव तु वादिकम्। हंस एव परो रुद्रो हंस एव परात्परम्	ब्र. वि. ६१
हंसज्योतिरनूपम्यं मध्ये देवं व्यवस्थितम्। दक्षिणामुखमाश्रित्य ज्ञानमुद्रां प्रकल्पयेत्	ब्र. वि. ६४
हंसपरमहंसयोरान्तरप्रणवः, तुरीयातीतावधूतयोर्ब्रह्म प्रणवः	ना. प. ७।१०
हंसपरमहंसयोर्ध्यानाधिकारस्तुरीयातीतावधूतयोर्न	ना. प. ७।९
हंसपरमहंसयोर्मननं, तुरीयातीतावधूतयोर्निदिध्यासः	ना. प. ७।११
हंसपरमहंसयोर्मानसार्चनं, तुरीयातीतावधूतयोः सोऽहम्भावना	ना. प. ७।९
हंसप्रणवयोरभेदः	पा. ब्र. ३
हंसविद्यामिमां लब्ध्वा गुरुशुश्रूषया नरः ॥ आत्मानमात्मना साक्षाद्ब्रह्म बुद्ध्वा सुनिश्चलम्। देहजात्यादिसम्बन्धान्वर्णाश्रमसमन्वितान् ॥ वेदशास्त्राणि चान्यानि पदपांसुमिव त्यजेत्	ब्र. वि. २८
हंसविद्यामृते लोके नास्ति नित्यत्वसाधनम्	ब्र. वि. २६
हंसस्य तपोलोकः परमहंसस्य सत्यलोकः [ना. प. ५।९+	१सं. सो. २।५९
हंसस्य प्रार्थनास्त्रिकालाः	पा. ब्र. ३
हंसस्याष्टगृहेष्वष्टकवलं परमहंसस्य पञ्चगृहेषु करपात्रं फलाहारो गोमुखं तुरीयातीतस्याजगरवृत्तिः	ना. प. ५।७
हंस हंस वदेद्वाक्यं प्राणिनां देहमाश्रितः। स प्राणापानयोर्ग्रन्थिरजपेत्यभिधीयते	ब्र. वि. ७८
हंसहंसाय विद्महे सोहं हंसाय धीमहि। तन्नो हंसः प्रचोदयात्	वनदु. १४९

हंसहंसेति मन्त्रोऽयं सर्वैर्जीवैश्च जप्यते । गुरुवाक्यात्सुषुम्नायां विपरीतो भवेज्जपः यो.शि. १।१३१

हंसहंसेति यो ब्रूयाद्धंसो ब्रह्मा हरिः शिवः ब्र. वि. ३४

हंसहंसेति सदा ध्यायन्सर्वेषु देहेषु व्याप्य वर्तते हंसो. ४

हंसहंसेत्यमुं मंत्रं जीवो जपति सर्वदा [ध्या. बि. ६२+ यो. चू. ३१+ यो. शि. ६।५४

हंसः कं खं गं घं ङं महामुण्डमालाधारिणि महाकालप्रिये मां रक्ष रक्ष हंसषोढो. २

हंसः चं छं जं झं ञं महात्रिपुरभैरवि पुस्तकाक्षमालाधारिणि शत्रुमुखस्तम्भनं कुरु कुरु स्वाहेति महापद्मे हंसषोढो. २

हंसः टं ठं डं ढं णं डां डीं डं डाकिनि मां रक्ष रक्ष स्वाहेत्यनाहते न्यसेत् हंसषोढो. २

हंसः तं थं दं धं नं महामारि मारहारिणि हुं हुं दारिद्र्यं हर हर स्वाहा हंसषोढो. २

हंसः परमहंसो भूत्वा स्वरूपानुसन्धानेन सर्वप्रपञ्चं विदित्वा ...प्रणवात्मकत्वेन देहत्यागं करोति यः सोऽवधूतः तुरीया. ३

हंसः पं फं बं भं मं मार्जारि वीरावलि ममालस्यं नाशय नाशय हंसषोढो. २

हंसः यं रं लं वं शं षं सं हं लम्बोदरि मातर्महामङ्गलप्रिये मम जाड्यं छेदय छेदय हंसषोढो. २

हंसःशक्तेरधिष्ठानं चराचरमिदंजगत् वराहो. ५।५५

हंसः शिखा, प्रणव उपवीतम् परम. ६

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् कठो. ५।२ [महाना. ८।६+ १२।३+ नृ. पू. ३।६+ [ना. प. ५।४+ ग. पू. ता. २।५+ ऋ.मं.४।४०।५

हंसा एकदण्डधराः शिखावर्जिता यज्ञोपवीतधारिणः शिक्यकमण्डलुहस्ता ग्रामैकरात्रवासिनो नगरे तीर्थेषु पञ्चरात्रं वसन्त एकरात्रद्विरात्रकृच्छ्रचांद्रायणादि चरन्त आत्मानं प्रार्थयन्ते आश्रमो. ४

हंसात्मकं ते विरजा भवन्ति ध्या. बि. २४

(अथ) हंसा नाम ग्राम एकरात्रं नगरे पञ्चरात्रं क्षेत्रे सप्तरात्रं तदुपरि न वसेयुः-गोमयाहारिणो नित्यं चान्द्रायणपरायणा योगमार्गे मोक्षमेव प्रार्थयन्ते भिक्षुको. ३

(अथ ह) हंसा निशायामतिपेतुः छांदो. ४।१।२

हंसेति वर्णद्वयेनान्तःशिखोपवीतित्वं निश्चित्य...चतुर्विंशतितत्त्वापादनतन्तुकत्वं नवतत्त्वमेकमेव परम. ९

हंसे तु सकृदेव स्यात् परमहंसे न विद्यते (स्नानं) ना. प. ४।२३

हंसो जटाधारी त्रिपुण्ड्रोर्ध्वपुण्ड्रधारी असङ्कॢप्तमाधुकरान्नाशी कौपीनखंडतुंडधारी [ना.प.५।५+ १ सं.सो. २।१३

हंसो भगवाञ्छुचिरप्रतिरूपः चाक्षुषो. २

हंसो भगवाञ्छुचिरूपः प्रतिरूपः अक्ष्यु. २

हंसो विशोको अजरः पुराणो ऋतीयमानो अहमस्मि नाम बा. मं. २४

हंसो हंसमभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीः छांदो. ४।१।२

हानिरस्योपजायते भ. गी. २।६५

हानोपादानचेष्टादि व्यानकर्म शांडि. १।४।९

हारे त्वा शूद्र तवैव सह गोभिरस्त्विति छांदो. ४।२।३

हास्यनिष्ठीवनास्फोटमुखभाष्यविजृम्भणम् । पादप्रसारणं गीतं न कुर्याद्गुरुसान्निधौ शिवो. ७।१३

हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः । भवन्ति विविधा रोगाः पवनव्यत्ययक्रमात् यो. चू. ११७

हिङ्कार इति त्र्यक्षरं प्रस्तार इति त्र्यक्षरं तत्समम्	छांदो. २।१०।१
हितं मितं च भोक्तव्यं स्तोकं स्तोकमनेकधा	वराहो. ५।९
हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते (आत्मा)	बृह. २।१।१९
हितानाम हृदयस्य नाड्यो हृदयात् पुरीततमभिप्रतन्वन्ति	कौ. त. ४।१९
हिताहितं मनोरामं वचः शोकावहं तु यत् । श्रुत्वाऽपि न शृणोतीव बधिरः स प्रकीर्तितः	ना. प. ३।६७
हित्वा पापमवाप्स्यसि	भ. गी. २।३३
हित्वेकारं तुरीयस्वरं सर्वादौ सूर्याचन्द्रमस्केन कामेश्वर्येवागस्त्यसंज्ञा	त्रि. ता. १।१६
हिरण्मयं पुरुषं ज्योतीरूपं तपन्तम्	चाक्षुषो. ४
हिरण्मयं यस्य विभाति सर्वं व्योमान्तरे रश्मिमिवांशुनाभिः	एका. उ. ८
हिरण्मयं वेदविदां वरिष्ठं यमध्वरे ब्रह्मविदः स्तुवन्ति	एका. उ. १०
हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदम्	गोपालो. २।२३
हिरण्मयः पुरुष एकहꣳसः	बृह.४।३।११,१२
हिरण्मयः सर्वेभ्यो भूतेभ्यो ददर्श	१ ऐत. १।३।१
हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ	बृह. ६।४।२२
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये [बृह.५।१५।१+	मैत्रा. ६।३५
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः	मुण्ड. २।२।९
हिरण्मयो ह वा अमुष्मिँल्लोके सम्भवति	१ ऐत. १।३।१
हिरण्मयोऽहं शिवरूपमस्मि [कैव. २०	+२बिल्वो. १३
हिरण्यगर्भस्तदाज्ञया सूक्ष्माण्यपालयत्	पैङ्गलो. १।५
हिरण्यगर्भस्त्रिरूप ईश्वरवद्व्यक्तचैतन्यः	नृसिंहो. ९।४
हिरण्यगर्भस्तैजसः सूक्ष्मश्च उकारः	यो. चू. ७५
हिरण्यगर्भः स्थूलोऽन्तर्द्वितीयः पाद उच्यते	ना. प. ८।१२
हिरण्यगर्भस्य कारणं परमात्मानमण्डपरिपालकनारायणमभ्येति	त्रि. म. ना. ३।४
हिरण्यगर्भं जनयामास पूर्वं स (सा) नो बुद्ध्या शुभया संयुनक्तु [श्वेताश्व. ३।४+	गुह्यका. ५६
हिरण्यगर्भं पश्यति जायमानꣳ स नो देवः शुभया स्मृत्या संयुनक्तु	महाना. ८।१२
हिरण्यगर्भं पश्यति जायमानं स नो बुद्ध्या शुभया संयुनक्तु	श्वेताश्व. ४।१२
हिरण्यगर्भः स्थूलोऽन्तर्द्वितीयः पाद उच्यते	ना. प. ८।१४
हिरण्यगर्भादीनहं जायमानान् पश्यामि	भस्मजा. २।५
हिरण्यगर्भाधिष्ठितविक्षेपशक्तितस्तमोद्रिक्ताऽहङ्काराभिधा स्थूलशक्तिरासीत्	पैङ्गलो. १।३
हिरण्यगर्भो भगवानेष च्छन्दसि सुष्टुतः । सोऽहं योगरतिर्ब्रह्मन्योगशास्त्रेषु शब्दितः	ना. महो. ५८
हिरण्यगर्भो लोकादिश्चतुर्वक्त्रो निरुक्तगः । ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः	ना. महो. ३९
हिरण्यज्योतिर्यस्मिन्नयमात्माऽधिक्षयंति भुवनानि विश्वा	सुबालो. २।१
हिरण्यज्योतिः शरीरस्य मध्ये	चित्सु. ११।८
हिरण्यदꣳष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुः	छांदो. ४।३।७
हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं...भगवन्तं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य... कृताञ्जलिपुटः पप्रच्छ	भस्मजा. १।१
हिरण्यबाहुं हिरण्यवर्णं हिरण्यरूपं पशुपाशविमोचकं पुरुषं कृष्ण-	

पिङ्गलमूर्ध्वरेतं विरूपाक्षं... रुद्रसूक्तैरभिषिच्य...	भस्मजा. २।४
हिरण्ययोवेतसोमध्यआसाम्[त्रिसु.३	महाना. १२।३
हिरण्यवर्णः शकुनो हृद्यादित्ये प्रतिष्ठितः	मैत्रा. ६।३४
हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह [ऋ. खि. ५।८७।१	श्री. सू. १
हिरण्यवर्णो हिरण्यश्मश्रुरानखाग्रेभ्यो दीप्यमान इव	आर्षे. ६।२
हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः	महाना. ५।१५
(तत्र) हिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदा क्लेशजननम्	शांडि. १।१।३
हीनान्नपानवस्त्रः स्यान्नीचशय्यासनो गुरोः । न यथश्च सन्तिष्ठेत्कलहं च विवर्जयेत्	शिवो. ७।१४
हीयतेऽर्थाद्य उ प्रेयो वृणीते	कठो. २।१
हुतमन्नं समं नयति (समुन्नयति मा. पा.)	प्रश्नो. ३।५
हुतमहुतं दत्तमदत्तं सर्वमसर्वं विश्वमविश्वं कृतमकृतं परमपरं परायणं च त्वम् [अशिरः.३।१+	अथर्व. ८
हुताशनश्चापि हि सर्वभक्षः	...
हृ इत्येकमक्षरमभिहरन्ति...(मा.पा.)	बृ. इ. ५।३।१
हृत्पद्मं वेदिकातत्रलिङ्गमोङ्कारमिष्यते	शिवो. १।२४
हृत्पद्मकर्णिकामध्ये स्थिरदीपनिभाकृतिम् । अङ्गुष्ठमात्रमचलं ध्यायेदोङ्कारमीश्वरम्	ध्या. बिं. १९
हृत्पद्ममध्ये सर्वं यत्तत्प्रज्ञाने प्रतिष्ठितम्	आ. प्र. १
हृत्पुण्डरीकमध्यस्थं चैतन्यज्योतिरव्ययम्	त्रि. ब्रा. २।१५६
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ॥ त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे	१ देव्यु. १८
हृत्पुण्डरीकमध्ये तु भावयेत्परमेश्वरम् । साक्षिणं बुद्धिवृत्तस्य परमप्रेमगोचरम्	मैत्रे. १।१३
हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम्	कैव. ६
हृत्स्थं ज्ञानासिनाऽऽत्मनः	भ. गी. ४।४२
हृदयग्रन्थिरस्तित्वे छिद्यते ब्रह्मचक्रकम् । संशये समनुप्राप्ते ब्रह्मनिश्चयमाश्रयेत्	ते. बिं. ६।१०१
हृदयग्रन्थिहीनोऽस्मि हृदयाम्भोजमध्यगः	मैत्रे. ३।१७
हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यत्	छांदो. ७।२।१
हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति	छांदो. ७।७।१
हृदयमेव सम्राडिति होवाच	बृह. ४।१।७
हृदयमेवान्ववक्रामति	बृह. ४।४।१
हृदयमेवायतनमाकाशः प्रतिष्ठा	बृह. ४।१।७
हृदयस्त्वं भूतभव्यः पुराणो ह्येको वीरो वेदगुणैकवेद्यः	२ रुद्रो. ६०
हृदयस्य दश छिद्राणि भवन्ति येषु प्राणाः प्रतिष्ठिताः	सुबालो. ४।१
हृदयस्य मध्ये लोहितं मांसपिण्डं, यस्मिंस्तद्दहरं पुण्डरीकं कुमुदमिवानेकधा विकसितं	सुबालो. ४।१
हृदयस्य रेतो मनः	१ ऐत. १।३।१
हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम्	मुक्तिको. १।३७
हृदयं न हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवति	बृह. ३।९।२३
हृदयं निरभिद्यत	२ ऐत. १।४
हृदयं निर्मलं कृत्वा चिन्तयित्वाऽप्यनामयम् । अहमेव परं सर्वमिति पश्येत्परं सुखम्	पैङ्गलो. ४।९
हृदयं यूपः (यज्ञस्य)	महाना. १८।१
हृदयं वै ब्रह्मेति	बृह. ४।१।७
हृदयं ब्रह्मेत्यारुणेयः	१ ऐत. १।४।१

हृदयं विश्वमस्य	मुण्ड. २।१।४
हृदयं वै सम्राट् परमं ब्रह्म नैनं हृदयं जहाति	बृ. उ. ४।१।७
हृदयं वै सम्राट् सर्वेषां भूतानामायतनम्	बृह. ४।१।७
हृदयं वै सम्राट् सर्वेषांभूतानांप्रतिष्ठा	बृह. ४।१।७
हृदयं ह्यष्टकपालानि	निरुक्तो. २।१
हृदयाकाशे महोज्ज्वलाज्ञानरूपा भवति	शांडि. १।४।५
हृदयात्सम्परित्यज्य सर्ववासनपङ्क्तयः। यस्तिष्ठति गतव्यग्रः स मुक्तः परमेश्वरः	महो. ६।८
हृदयात्सर्वमिदं जायते	सुबालो. १।२
हृदयादायता तावच्चक्षुष्यस्मिन् प्रतिष्ठिता। सारणी सा तयोर्नाडी द्वयोरेका द्विधा सती	मैत्रा. ७।११
हृदयादिकण्ठपर्यन्तं सस्वनं नासाभ्यां शनैः पवनमाकृष्य यथाशक्तिः कुम्भयित्वा इडया विरेच्य गच्छंस्तिष्ठन्कुर्यात्। तेन श्लेष्महरं जठराग्निवर्धनं भवति	शांडि. १।७।१४
हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये त्वेव रेतः प्रतिष्ठितं भवति	बृह. ३।९।२२
हृदयाद्धृदयं मृत्योः	चित्यु. १५।२
हृदयानि व्यदारयत्	भ. गी. १।१९
हृदयान्मनः (निरभिद्यत)	२ ऐत. १।४
हृदयाम्बुरुहासीनं ध्यायेद्वा विष्णुरूपिणम्	त्रि. ब्रा. १५३
हृदयेन हि रूपाणि जानाति	बृह. ३।९।२०
हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवति	बृह. ३।९।२१
हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः	मुक्तिको. २।१९
हृदये व्यज्यते घोषो गर्जत्पर्जन्यसन्निभः। तत्र स्थिता सुरेशान मध्यमेत्यभिधीयते	यो. शि. ३।४
हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्ति	बृह. ३।९।२०
हृदये ह्येव रेतः प्रतिष्ठितम्	बृह. ३।९।२२

हृदये ह्येव श्रद्धा प्रतिष्ठिता भवति	बृह. ३।९।२१
हृदये ह्येव सत्यं प्रतिष्ठितं भवति	बृह. ३।९।२३
हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति	बृह. ४।१।७
हृदयोर्ध्वभागे चित्तसंयमात् महर्लोकज्ञानम्	शांडि. १।७।५२
हृदाकाशे चिदादित्यः सदा भासति भासति। नास्तमेति न चोदेति कथं सन्ध्यामुपास्महे	मैत्रे. २।१४
हृदा पश्यन्ति मनसा मनीषिणः	चित्यु. ११।११
हृदा मनीषा मनसाऽभिकॢप्ता ये तां विदुरमृतास्ते भवन्ति	गुह्यका. ६०
हृदा मनीषा मनसाऽभिकॢप्तां य एनां विदुरमृतास्ते भवन्ति	गुह्यका. ६३
हृदा मनीषी मनसाऽभिकॢप्तो य (एवं एनं-विदुः) एतद्विदुरमृतास्ते भवन्ति [कठो.६।९+ +४।१७+ म. ना. १।११+	श्वेताश्व. ३।१३ त्रि. म.ना. ६।४
हृदासन-नाभि-कण्ठ-सर्वाङ्गानि स्थानानि	पैङ्गलो. २।३
हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति	श्वेताश्व. ४।२०
हृदि चित्तस्य संयमात्स्वर्लोकज्ञानम्	शांडि. १।७।५२
हृदि दक्षिणाग्निः (शारीरयज्ञस्य)	गर्भो. ११
हृदि प्रतीष्या कवयो मनीषेति उपैनं... [बृ. जा. १।२+	नृ. पू. १।१
हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि प्राणः स्थितो नित्यमपानो गुदमण्डले	यो. चू. २३
हृदिस्था देवताः सर्वा हृदि प्राणे प्रतिष्ठिताः। हृदयं पुरुषोऽसि त्वं तिस्रो मात्राः परश्च सः	२ रुद्रो. ५४
हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि प्राणाश्च ज्योतिश्च त्रिवृत्सूत्रं च तद्विदुरिति	ब्रह्मो. ४
हृदि सर्वस्य धिष्ठितम्	भ. गी. १३।१८

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः । हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः [अ. शिरः. ३।४+	बटुको. १८
हृदिस्थाने अष्टदलपद्मं वर्तते	ध्या. बि. ६४
हृदि स्थाने स्थितं पद्मं तच्च वक्त्रमधोमुखम्	१ यो. त. १३७
हृदिस्थाने स्थितं पद्मं तच्च पद्ममधोमुखम् । ऊर्ध्वनालमधो बिन्दुस्तस्य मध्ये स्थितं मनः	२ योगत. ९
हृदि ह्येष आत्मा । अत्रैतदेकशतं नाडीनां	प्रश्नो. ३।६
हृदीन्द्रियाणि मनसा सन्निरुध्य ब्रह्मोडुपेन प्रतरेत विद्वान्	श्वेताश्व. २।८
हृद्देशेऽर्जुन तिष्ठति	भ. गी. १८।६१
हृद्द्वारं वायुद्वारं च मूर्ध्नि द्वारमथापरम् । मोक्षद्वारं बिलं चैव सुषिरं मण्डलं विदुः	अ. ना. २७
हृद्यन्तःकरणं ज्ञेयं शिवस्यायतनं परम । हृत्पद्मं वेदिका तत्र लिङ्गमोङ्कारमिष्यते	शिवो. १।२४
हृद्याकाशमयं कोशमानन्दं परमाल्यम् । स्वं योगश्च ततोऽस्माकं तेजश्चैवाग्निसूर्ययोः	मैत्रा. ६।२७
हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव सः योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम्	बृह. २।५।१०
हृदाकाशे परे कोशे दिव्योऽयमात्मा स्वपिति । यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति	सुबालो. ४।४
हृद्यादित्यमरीचीनां पदं षण्णवतिः	पा. ब्र. ४
हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः	अ. पू. ४।९१
हृद्रोगं मम सूर्य हरिमाणं च नाशय [सूर्यता. २।१+	ऋ.मं. १।५०।११
हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद	बृह. ५।३।१

हृषीकेशं तदा वाक्यं	भ. गी. १।२१
हृष्टरोमा धनञ्जयः	भ. गी. ११।१४
हृष्यामि च पुनः पुनः	भ. गी. १८।७७
हृष्यामि च मुहुर्मुहुः	भ. गी. १८।७६
हे कृष्ण हे यादव हे सखेति	भ. गी. ११।४१
हेतुद्वयं हि चित्तस्य वासना च समीरणः । तयोर्विनष्ट एकस्मिंस्तद्द्वावपि विनश्यति	योगकुं. १।१
हेतुनाऽनेन कौन्तेय	भ. गी. ९।१०
हेतुमद्भिर्विनिश्चितैः	भ. गी. १३।५
हेतुर्न जायतेऽनादेः फलं चापि स्वभावतः । आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते	अ. शां. २३
हेतुस्तु सुखदुःखस्य योगो दृष्टश्चतुर्विधः	आयुर्वे. २
हेतुः प्रकृतिरुच्यते	भ. गी. १३।२१
हेतोरादिः फलं येषामादिर्हेतुः फलस्य च । हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते	अ. शां. १४
हेतोरादिः फलं येषामादिर्हेतुः फलस्य च । तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा	अ. शां. १५
हेतोः किं नु महीकृते	भ. गी. १।३५
हेमप्रख्यामिन्दुखण्डान्तमौलिं शङ्खारिष्टाभीतिहस्तां त्रिनेत्राम् । हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि	वनदु. २
(अथ ह) हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति, तथेति । तेभ्य एष प्राण उदगायत	बृह. १।३।७
हेमाभया द्विभुजया सर्वालङ्कृतया चिता । श्लिष्टः कमलधारिण्या पुष्टः कोसलजात्मजः	रा. पू. ४।९
हेरम्बतत्त्वे परमात्मसारे नो वै योगान्नैव तपोबलेन । नैवायुधप्रभावतो महेशि दग्धं पुरा त्रिपुरं दैवयोगात्	हेरम्बो. २

हैरण्यो गोपवेषमभ्राभं कल्पद्रुमाश्रितम्	गो. पू. १।५
होता ऋङ्मय साममयमुद्गाता..	कौ. त. २।६
होता भोक्ता हविर्मन्त्रो यज्ञो विष्णुः प्रजापतिः । सर्वः कश्चित्प्रभुः साक्षी योऽमुष्मिन्भाति मण्डले	मैत्रा. ६।१६
होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति	छांदो. १।५।५
होत्रर्त्विजाऽग्निना वाचा, वाग्वै यज्ञस्य होता, तद्येयं वाक्सोऽयमग्निः स होता स मुक्तिः साऽतिमुक्तिः	बृह. ३।१।३
होमशेषं तु निर्वृत्य पूर्णपात्रोदकं तथा । पूर्णमसीति यजुषा जलेनान्येन बृंहयेत्	बृ. जा. ३।१७
ह्रस्वो दहति पापानि दीर्घः सम्पत्प्रदोऽव्ययः । अर्धमात्रा समायुक्तः प्रणवो मोक्षदायकः	ध्या. विं. १७
(तस्य) ह्रादुनयो विस्फुलिङ्गाः [छां. उ. ५।५।१×	बृह. ६।२।१०
ह्रियते ह्यवशोऽपि सः	भ. गी. ६।४४
ह्रिया देयम् । भिया देयम् । संविदा देयम्	तैत्ति. १।११।३
ह्रीर्नाम वेदलौकिकमार्गकुत्सितकर्मणि लज्जा	शांडि. १।२।१
(श्री-) ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम [+वा. सं. ३१।२२+	चित्यु. १३।३ तै.आ. ३।१३।२
ह्रीं आनो दिवो बृहतः पर्वतादा सरस्वती यजतागन्तु यज्ञम्	सरस्व. ८
ह्रीं पद्मावत्यन्नपूर्णे माहेश्वरी स्वाहा	त्रि.म.ना. ७।९
ह्रौं (ह्सौं) हयग्रीवायं नमो ह्रौं (ह्सौम)	त्रि. म. ना. ७।९
ह्वयामि वां ब्रह्मणा तूर्तमेनम्	चित्यु. १४।३

अयं कोश आमोददैः पूर्णगात्रो मनोहारिसिद्धान्तवाक्यैः श्रुतीनाम् ।
ददात्वात्मतोषं विपश्चिद्वरेभ्यो यथा हेमकुम्भोऽमरेभ्योऽमृतासः ॥

इत्युपनिषद्वाक्यमहाकोशस्योत्तरार्धः समाप्तः ।

*परिशिष्टम् ।

ॐ

ॐकार स्थूलरूपं मन्मस्तकम्	२ तारो. १
ॐ क्रतो स्मर कृतं स्मर	ईशा. १७
ॐ खं ब्रह्म खं पुराणं वायुरं खमिति	बृह. ५।१।१
ॐ चत्वारिंशत्संस्कारसम्पन्नः सर्वतो विरक्तः...साधनचतुष्टयसम्पन्न एव संन्यस्तुमर्हति	१ सं. सो. २।१
ॐ जाग्रत्स्वप्नसुषुप्तितुरीयतुरीयातीतोऽन्तर्यामी	गोपालो. ३।१८
ॐ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस	छांदो. ४।१।१
ॐ तत्सद्ब्रह्मतद्रूपं प्रकृतिपरं गगनाभं	२ तारो. १
ॐ तत्सद्भूर्भुवः सुवस्तस्मै प्राणात्मने नमो नमः	गोपालो. ३।२
ॐ वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः [चाक्षुषो. ५+ ऋ. मं. [+ साम.१।३।१९+	म. ना. १६।७ १०।७३।११ तै.आ. ४।४२।३
ॐ देवा ह वै सत्यं लोकमायन्	नृ. षट्च. १
ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे	गो. पू. ४।४
ॐ नमोऽस्तु शर्व शम्भो त्रिनेत्र चारुगात्र	२ शिवो. १
ॐ नित्यं शुद्धं बुद्धं निर्विकल्पं निराख्यातमनादिनिधनमेकं ...सर्वदाऽनवच्छिन्नं परं ब्रह्म	यो. चू. ७२
ॐ नृसिंहाय विद्महे वज्रनखाय धीमहि । तन्नः सिंहः प्रचोदयात्	नृ. पू. ४।३
ॐ परोरजसे सावदोम्	त्रि.म.ना. ७।११
ॐ पृथिवी वान्नमापोऽन्नादाः	सुबालो. १४।१
ॐ भूमिरन्तरिक्षं द्यौरित्यष्टाक्षराणि [बृ. ५।१४।१+	गायत्र्यु. १
ॐ भूर्भुवः सुवरिति व्याहृतयः	२ प्रणवो. १८
ॐ योऽसाविन्द्रियात्मा गोपाल ॐ तत्सत् भूर्भुवः सुवस्तस्मै वै नमो नमः	गोपालो. ३।१३
ॐ योऽसावुत्तमपुरुषो गोपाल ॐ तत्सत्	गोपालो. ३।१५
ॐ योऽसौ प्रधानात्मा गोपाल ॐ तत्सत्	गोपालो. ३।१२
ॐ योऽसौ ब्रह्म परं वै ब्रह्म ॐ तत्सत्	गोपालो. ३।१६
ॐ योऽसौ भूतात्मा गोपाल ॐ तत्सत्	गोपालो. ३।१४
ॐ योऽसौ सर्वभूतात्मा गोपाल ॐ तत्सत्	गोपालो. ३।१७
ॐ यो ह वै श्रीवेङ्कटेश्वरो देवो भगवान्भूर्भुवः सुवस्तस्मै वै नमो नमः	व्यङ्कटेशो. ३
ॐ यो ह वै श्रीवेङ्कटेश्वरो देवो भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः	व्यङ्कटेशो. ३
ॐ वृषादर्विकुलँ ह वै शिबिकुलं बभूव	इतिहा. १
ॐ श्रीगुरुः सर्वकारणभूता शक्तिः	भावनो. २

---

* पश्चादुपलब्धानामुपनिषदां वाक्यानि पूर्वार्धोत्तरार्धयोश्चानवधानतया गलितानि वाक्यान्यस्मिन्परिशिष्टे सन्निवेशितानीति विदांकुर्वन्तु विपश्चितः ।

अकार उकारमध्ये ब्रह्म परिपूर्णं	अद्वैतो. ५
अग्रावाक्यस्य हुत्वा मन्थे सम्पातमवनयेत्	छांदो. ५।२।४
अग्राह्यः सर्वभूतेषु सर्वेन्द्रियगुणातिगः	२ रुद्रो. ४५
अग्र्यश्च धाम्नां त्वमेव ऋग्भिः सुभाण्ड इज्योऽसि	विष्णू. ९
अज त्वन्नाभौ जगदेतद्विचित्रं मध्येऽर्पितं यस्मिन्विश्वं भुवनं च त्वमेव	२ रुद्रो. ७
अजस्त्वेको जुषमाणोऽनुशेषे जहात्येनां भुक्तभोगामजस्त्वम्	२ रुद्रो. ४७
अजां मायां लोहितशुक्लकृष्णां बहूनस्मा जनयन्ती सरूपाम्	२ रुद्रो. ४७
अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा	ना. म. १२
अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः	वे. सारो. २४
अतिरात्राग्निहोत्रभस्मनाग्नेर्भसितमिदं...प्रणवेनोद्धूलनं कुर्यात्	वासु. १६
अत्याश्रमस्थाः परिमुच्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्	वे. सारो. ३
अत्याश्रमस्थो हि हिरण्यगर्भः	वे. सारो. ५
अथ परमात्मा नाम यथाक्षरमुपासनीयः	आत्मोप. ७
अथ येनैताः शिरा अनुव्याप्ता एष वाव स व्यानः	मैत्रा. २।७
अथान्तरात्मा नाम पृथिव्याप... कर्मविशेषणं करोति	आत्मोप. २
अद्वैतं कथितं येन पुरुषोऽमूढो भवति	अद्वैतो. ५
अन्यसपन्तु हेतयो घोररूपा भक्तेषु त्वं शिवो भव शत्रूनस्माकं प्रहि..	२ रुद्रो. ६९
अदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् [प्रवर्ग्या. २४+	वा. सं. ३६।२४
अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषः	वै. पू. ३।७
अयमेव परा काष्ठा स ब्रह्म स शिवः स्वयम्	२ देव्यु. ३५
अयं वाव खल्वस्य प्रतिनिधिः	वै. पू. ४।८
अरजोऽयममृतो वै विशोकः	२ देव्यु. २७
अवधूतानां परमहंसानां शीतोष्णसुखदुःखमानावमानसहनं बहुजन्मान्तरेषु योगसिद्धानाम्	भक्तियो. १
अवस्थातीतः पर आत्मा त्वमेव	२ रुद्रो. ६६
अव्यक्तैकाक्षरं पूर्णा सूर्याक्ष्यध्यात्मकुण्डिका	मुक्तिको. १।३६
अस्मिन्मूर्तिश्चतुर्थी या साऽसृजच्छेषमव्ययम् । स हि सङ्कर्षणः प्रोक्तः... अनिरुद्धात्तथा ब्रह्मा तन्नाभिकमलोद्भवः । ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च	ना. म. ६०
अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा [२देव्यु.६+ऋ.मं.	१०।१२५।८
अहंमेव स्वयमिदं वदामि ज्ञानमैश्वरम् (देवी)	२ देव्यु. ५
अहमेवाखिलाराध्या ह्यहं ध्येयाऽखिलैरपि (देवी)	२ देव्यु. ३
अहं दधामि द्रविणं हविष्मते (सुप्राव्ये) सुवीर्याय सुन्वते [२ देव्यु. ७+ऋ. मं.	१०।१२५।२
अहं विश्वं भुवनं चेतयामि	२ देव्यु. ६
अहं विश्वेभि(रुद्रेभि-)र्वसुभि-श्चराम्यहमादित्यैरुत विश्वदेवैः[२देव्यु.६+ऋ.मं.	१०।१२५।१
अहं सर्वत्रगो ब्रह्मन् भूतग्रामान्तरात्मकः	ना. म. ३७
अहं हयशिरा भूत्वा समुद्रे पश्चिमोत्तरे । पिबामि सुहुतं हव्यं कव्यं च श्रद्धयाऽन्वितम्	ना. म. ४९
अहं हि जीवसंज्ञातो मयि जीवः समाहितः	ना. म. ३६
अहं हि पुरुषो ज्ञेयो निष्क्रियः पञ्चविंशकः । निर्गुणो निष्कलश्चैव निर्द्वन्द्वो निष्परिग्रहः	ना. म. ३२
अहानि शं भवतु नः शं रात्रीः प्रतिधीयतां [प्रवर्ग्या. ११	वा. सं. ३६।११
आपो वा इदमासन् सलिलमेव	वेङ्कटे. १
आपो हि ष्ठा मयोभुवः... [वा. सं. ३६।१४+	प्रवर्ग्या. १४ ऋ. मं. १०।९।१

आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषु... एकरूपत्वम्	शांडि. १।१।३
आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः । वासांसि मम गावश्चान्नपाने च सर्वदा ।	नै.आ. ७।१४।१
ततो मे श्रियमावह	वे. नारो. ३१
आश्रमेष्वेवावस्थितस्तपस्वी मुच्यते	त्रै. पू. ५।८
आह्लादिनी गरीयसीयमन्तरे भूत्वा राधा कृष्णेनाराधिता राधाकृष्णमाराधयत्	राधिको. ४
इदं सार्वकामिकं मोक्षद्वारं यद्योगिन उपदिशन्ति	वेङ्कटो. ३
इन्द्रो विश्वस्य राजति [प्रवर्ग्या. ८+	वा. सं. ३६।८
ईशानो भगवो भगवान् रुद्रो महादेवस्त्वमीश्वरः । परंब्रह्म पर धाम परः पारः परायणः	२ रुद्रो. ५६
उभयात्मको विराट् प्रणवः	ना. प. ८।१
उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः	ना. म. २४
ऋचं वाचं प्रपद्ये [प्रवर्ग्या. १+	वा. सं. ३६।१
ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति..	वेङ्कटो. ३
ऋतं सत्यं नामरूपातिगस्त्वं	२ रुद्रो. ६७
एकमेवाद्वितीयं यद्गुरोर्वाक्येन निश्चितम् । एतदेकान्तमित्युक्तं न मठो न वनान्तरम्	मैत्रे. २।१५
एको रुद्रस्त्वं हि सर्वस्य कर्ता..	२ रुद्रो. ५१
एतत्खलु वाव सर्ववरिष्ठः श्रूयते उत्तमपुरुषः	वें. पू. ३।५
एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते । इच्छन्मुहूर्तान्नश्येयमीशोऽहं जगतो गुरुः	ना. म. ३४
एतदमृतमभयमेतत्परायणमेतद्ब्रह्मेति	वें. पू. ३।३
एतद्ध्येवाक्षरं ब्रह्म	त्रे. सारो. १५
एतद्वैराटकं महद्वपुः मङ्गलं सत्त्वं बिन्दुस्वरूपं महाकारस्वरूपं ज्योतिर्मयं विद्धि	२ तारो. १
एनमात्मानं गूढमनुप्रविष्टं	२ देव्यु. ८
एवं विदित्वा परमात्मलिङ्गमस्याश्रमस्थाः परिमुच्यन्ति सर्वे	त्रे. सारो. ४१
एवं स्थित्वा संसृतौ वर्तमानः संसारीव सुखदुःखादिभोक्ता । उन्मत्तमूकबधिरान्धवत्सदा विभाव्यमानो मूढधीभिर्विमुक्तः	निर्लेपो. १३
एष आत्मा तपसाऽऽलोकनीयो नान्यैर्धर्मैः..	२ देव्यु. १९
एष आत्माऽपहत पाप्मा विरजो विशोको विमृत्युरजिघत्सोऽपिपासः	२ देव्यु. २९
एष आदित्ये तपति तेजसेद्धः	२ देव्यु. २८
एष एव हि भूतात्मा भूते भूते व्यवस्थितः	२ देव्यु. १२
एष धाता विधाता च स्वराट् सम्राट् प्रजापतिः	२ देव्यु. १०
एष दिव्यो देव एकः पुराणः	२ देव्यु. ११
एष देवः शीर्यमाणैर्न शीर्णः	२ देव्यु. २६
एष देवैर्वेदसङ्घैश्च विप्रैरभिष्टुतोऽप्रतर्क्यो हीन्द्रियैश्च	२ देव्यु. २७
एष ब्रह्मैष एवेन्द्र एष सर्वं चराचरम्	२ देव्यु. २५
एष भूतपतिरेव सेतुर्विधरणो...	२ देव्यु. ९
एष सुप्तेषु जागर्ति भूतंभूतं..	२ देव्यु. ५
एषोऽनन्तश्चेष्टते देहजालैर्यथोर्णनाभिः सृजते तन्तुजालम्..	२ देव्यु. २८
एषोऽनन्तो महिमाधार ईशो भूमा..	२ देव्यु. २४
एषोऽन्तरादित्ये ह्यमृतो दृश्यते हिरण्मयः पुरुषः शिवः	२ देव्यु. १०
एषोऽन्तर्याम्यमृतः पुराणः सदा जनानां हृदये सन्निविष्टः	२ देव्यु. ८
एषोऽशरीरो विश्वकर्ता गुणेशः	२ देव्यु. २६
एषो हि देवः प्रदिशो नु सर्वः पूर्वो हि जातः स उ गर्भेअन्तः । स एव जातः स जनिष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः	श्रुतिर. ४.
ओङ्कारः प्रणवो व्यापी ह्यनन्तोऽनन्तविक्रमः । तारं सूक्ष्मं वैद्युतस्त्वं.. शुक्लं सर्वशरीरगम्	२ रुद्रो. ९५

ओदनं तव भूतेश ब्रह्मक्षत्रं जगत्तथा	२ रुद्रो. ५३
कया त्वं न ऊत्याभि प्रमन्दसे वृषन् [प्रवर्ग्या. ७+	वा. सं. ३६।७
कयानश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता [प्रवर्ग्या. ४+वा. सं. ३६।४	ऋ. मं. ४।३१।१
कविः प्रधानो रसवर्जोऽयमात्मा	२ देव्यु. २४
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा(ह्ला)चिदारुजे..	प्रवर्ग्या. ५
[वा. सं. ३६।५+	ऋ.मं. ४।३१।२
कस्त्वां वेद भूतगर्भविहीनं वेदैर्विश्वं यत्र लीलं त्वयीशे	२ रुद्रो. ७६
कः सोऽभिध्येयोऽयं यः प्राणाख्यः	मैत्रा. १।१
कामक्रोधौ लोभमोहौ मदश्च मात्सर्यं च त्यज्यते येन योगी	निर्लेपो. १
कालाग्निरुद्रमैत्रेयीसुबालक्षुरिमन्त्रिका	मुक्तिको. १।३२
कृतं चाकृतमेते च परमं च परायणम्	२ रुद्रो. ४३
खल्वियं ब्रह्मविद्या सर्वा सर्वोपनि..	वें. पू. ३।४
खे वायुः प्रलयं याति	ना. म. १९
गर्भो नारायणो हंसो बिन्दुनाद-शिरः शिखा	मुक्तिको. १।३१
गायत्रिया एवात्मानं पुनीते	सहवै. १२
गुरूपदेशाद्विदितात्मतत्त्वाः शिवस्वरूपं प्रभजन्ति सन्तः	चिदम्बरो. ९
गूढेषु गूढः परपारपारः	२ देव्यु. १५
गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम्	मुक्तिको. १।३८
चक्षुषश्चक्षुः श्रोत्र एष (व) त्वमीश मनसो मनो बुद्धबोद्धा त्वमेव	२ रुद्रो. ५७
चक्षुः श्रोत्रं प्रपद्ये [प्रवर्ग्या. १+	वा. सं. ३६।१
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्च-भिरेव च । हूयते च पुनर्द्वाभ्यां तुभ्यं होत्रात्मने नमः	विष्णू. ११
चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् । यच्चित्तस्तदधीनं च स एवात्याश्रमी भवेत्	वे. सारो. ४५
छन्दांसि वै पत्राणि	वेङ्कटो. ३
जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते	ना. म. १८
जलस्य चलनादेव यथा चलति भास्करः । तथैव सर्वभूतेषु तद्धर्मेनैव लिप्यते	२ देव्यु. १३
(भगवन् !) जीवलोका अविद्या संवृता भवाम्भोधौ निमज्जोन्मज्ज्य कुलाश्चिद्विश्रामं न यान्ति	चिदम्बरो. १
ज्योक्ते सन्दृशि जीव्यासं [प्रवर्ग्या. १९+	वा. सं. ३६।१९
ज्ञात्वा हि देवं शुद्धमात्मैकमात्यमुपास्य धीराः परिमुच्यन्ति पाशान् । महेश्वरं वै प्रणवार्थरूपं...	वे. सारो. ४
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् [प्रवर्ग्या. २४+	वा. सं. ३६।२३
तच्छास्त्रं शास्त्रितं चेति द्विविधं पौरुषं स्मृतम	मुक्तिको. २।१
तत एवाष्टाक्षरेण वा इमानि भूतानि जायन्ते, अष्टाक्षरेण जातानि जीवन्ति, अष्टाक्षरं प्रयन्त्यभि-संविशन्ति	वेङ्कटो. २
ततो वै तानश्विष्ठानवदतोऽवदन्	कठश्रु. १३
तत्पुरुषाय विद्महे महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात्	वे. सारो. ४०
तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते	मुण्ड. २।१।१
तद्यथेदमक्षरमोमित्यक्षरम् । तत्परमित्यक्षरं गुह्यम्	संध्यो. २०
तपसा प्राप्यते सत्त्वं...	वें. पू. ४।८
तमो वा इदमेक आसीत्तस्मात्परेणो-दितः । विषमत्वं प्रयात्येतद्वै रजसो रूपम्	वें पू. ५।१
तस्मा अरं गमाम वो..	प्रवर्ग्या. १६
[वा. सं. ३६।१६+	ऋ. मं. १०।९।३
तस्माद्यजमानश्चित्वैतानग्नीना-त्मानमभिध्यायेत्	मैत्रा. १।१
तवावयवसम्भूतैर्व्याप्तं सर्वमिदं जगत्	२ रुद्रो. ४८
तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माशुचिर्यद्देशः समृद्धिदैवतानि	सहवै. १९
तानृषयोऽर्थमायन्	सहवै. ११
तिलेषु तैलं...एवं प्रोतं त्वय्यद्वितीय..	२ रुद्रो. ५९

तुरीयमिद्रं सततोदितं गुणैर्गुणातीतं विधुषं दिव्यधाम	२ देव्यु. २३
तेजः खल्वीरितं विषमं तं प्रयात्येतद्वै सत्त्वस्य रूपम्	वै. पू. ५।१
ते निलायमचरन्, तेऽनु प्रविशुः कूष्माण्डानि	सहवै. ११
त्वत्तो जातं जगच्छम्भो स्थितं त्वय्येव...	२ रुद्रो. ४६
त्वमश्वमेधो वरार्थिनां वरदोऽसि त्वम्	विष्णू. १०
त्वमाशिषं द्रविणं देहि शम्भो	२ रुद्रो. ७१
त्वमेव द्यौरसि मातरिश्वाऽसि धर्मोऽसि होता पोता हन्ता	विष्णू. ४
त्वयावृतं लोकमिदं समग्रं को वा हीनं चेतते त्वद्विहीनः	२ रुद्रो. ५१
त्वं देवेषु प्रथितो नामतस्त्वेकः...	२ रुद्रो. ७३
त्वं न दिवा नैव रात्रिस्त्वमीशः	२ रुद्रो. ६३
त्वं नो माता त्वं पिता चोपनेता माता बंधुः परमो वै गुरुस्त्वम्	२ रुद्रो. ७२
त्वामीदृशं गूढमनुप्रविष्टं सहैव सन्तं न विजानन्ति देवाः	२ रुद्रो. ७८
दक्षिणाशरभंस्कदंमहानारायणाह्वयम्	मुक्तिको. १।३४
दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः	प्रवर्ग्या. २३
दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षंतां	प्रवर्ग्या. १८
देवकार्यादपि...पितृकार्यंविशिष्यते	ना. म. ४७
देयं राज्यं देयं शिरो न विचार्यैषा मुद्रा खेचरी देया भवति	वेङ्कटो. ३
देवानां च पितॄणां च पिता ह्येकोऽहमादितः	ना. म. ४८
देवानां महस्तोमफलप्रदा, अमृतेन तृप्तिं जनयन्ती देवानामन्नेन...	सीतो. ७
देवासुरैस्त्वं पुरो मूढगर्भो भूतानां त्वं महिमा गर्भरूपः	२ रुद्रो. ७९
दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः [ऋ. खि. १०।१९१।५+	सहवै. २५
देहो देवालयः प्रोक्तः	मैत्र्यु. २।२

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः [प्रवर्ग्या. १७+	वा. सं. ३६।१७
द्वादशाक्षरा वै जगती	वेङ्कटो. ३
द्विर्द्वादशेभ्यस्तत्त्वेभ्यः ख्यातो यः पञ्चविंशकः	ना. म. १३
धृत्वा ज्योतिर्निधिं महात्मनो...	वे. सारो. १८
न कर्मणा न प्रजया शिवं पूज्यामृतत्वमाप्नुयुः	वे. सारो. २
न च जीवं विना ब्रह्मन् वायवश्चेष्टयन्त्युत	म. ना. २५
न जानन्ति सर्वे हृदा भासमानं	२ देव्यु. १६
न तत्र सूर्यो भाति न चेदं चन्द्रतारकम् । नेमा विद्युतो भान्ति...	श्रुतिर. ३
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते	निर्लेपो. ११
न दृश्यश्चक्षुषा योऽसौ न स्पृश्यः स्पर्शनेन हि	ना. म. १०
नमस्ते अस्तु भगवन्नस्तु यतः स्वः समीहसे [प्रवर्ग्या. २१+	वा. सं. ३६।२१
नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे [प्रवर्ग्या. २१+	वा. सं. ३६।२१
नमस्ते हरसे शोचिषे नम अस्त्वमये । [प्रवर्ग्या. २०+	वा. सं. ३६।२०
नमः श्रीवेङ्कटेशाय शुद्धज्ञानस्वरूपिणे । वासुदेवाय शान्ताय श्रीनिवासाय मङ्गलम्	वेङ्कटो. १
न योगयुक्तोऽपि न चावधूतः परं भावं नयति शिवभक्तस्य लोके	भक्तियो. ६
न शैवमन्त्रादपरोऽस्ति मन्त्रो भस्मस्नानं नित्यतृप्तिर्हृदन्तः । रुद्राक्षाणां धारणं रुद्रमन्त्रः प्रकीर्तनीयो गुरुमूर्तौ प्रणामः	भक्तियो. ३
न विना धातुसङ्घातं शरीरं भवति क्वचित्	ना. म. २४
न साम्परायं प्रविदाम बालाः... त्वं नो गतिः परमं चासि शम्भो	२ रुद्रो. ५०

नान्ये जानन्ति तव भक्त्या विहीना ह्यजातं त्वामीशं शरणं प्रपन्नाः	२ रुद्रो. ७९
नारायणः—क एवाहं कस्त्वमेवासीति। तस्माद्भगवतो नारायणस्य क इति मुख्य नाम, तथैव क इति ब्रह्मणश्च नामासीत्	वेङ्कटो. १
नारायणाद्विजनको ह्यर्यम्णो वरुणस्य हि	२ रुद्रो. ४३
नासौ कलङ्कमाप्नोति हेम पङ्कगतं यथा	अ. पू. १।२९
नास्ति तस्मात्परतरः पुरुषाद्वै सनातनात्	ना. म. २०
नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम्। ऋते तमेकं पुरुषं वासुदेवं सनातनम्	ना. म. २१
निर्गुणो गुणभुक्चैव गुणस्रष्टा गुणाधिकः	ना. म. १७
निर्वाणंसर्वधर्माणांनिवृत्तिःपरमास्मृता	ना. म. ५६
नेम ऋणा नृणव इत्समानो यमस्य लोके अधिरज्जुराय	सहवै. ५
नेह नानाऽस्ति किञ्चिद्वै त्वदधिष्ठितमेव हि	२ रुद्रो. ४९
नोपर्यासीत जुगुप्सेतानृतात्	सहवै. १२
पतिः पशूनां पशवो वयं च	२ रुद्रो. ५८
परो दिवा (ऽहं) परएना पृथिव्यां सदा जनानां हृदये सन्निविष्टः	२ देव्यु. ७
पश्येम शरदः शतं जीवेम शरदः शतम् (प्रवर्ग्या. २४+	वा. सं. ३६।२४
पावको अस्मभ्यं शिवो भव (प्रवर्ग्या. २०+	वा. सं. ३६।२०
पुराविदः कवयो ये मनीषिणो ज्ञात्वाऽप्येनं निष्प्रकम्पा महेशम्। तरन्ति शोकं च पृथक्पृथग्जनाः...	२ देव्यु. २१
पुरुष एवेदꣳ सर्वं...	वेङ्कटो. ३

पुष्पहास चरम त्वमेव वौषट् वषट्कारस्त्वामाहुरस्यमखेषु प्राशितारम्	विष्णू. २
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्। ते समेता महात्मानः शरीरमिति संज्ञितम्। तदाविशति यो ब्रह्मन्नदृश्यो लघुविक्रमः	ना. म. २२,२३
प्रजापतिर्वा एकोऽग्रे तिष्ठन्	वें. पू. ३।६
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमव्ययमश्नुते	वे. सारो. ४६
प्रद्युम्नाद्योऽनिरुद्धस्तु सोऽहङ्कारः स ईश्वरः	ना. म. ३०
प्रभाऽस्मीह देवी शशीसूर्यऋक्षे..	२ देव्यु. १७
बाह्यात्माऽन्तरात्मा परमात्मा चेति	आत्मोप. ४
ब्रह्मणः कोशोऽसि मेधया पिहितः	वे. सारो. ३०
ब्रह्मपुच्छं प्रतिष्ठा त्वं क्षान्तिरार्जवमेव च	२ रुद्रो. ५३
ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः	ना. म. ३९
ब्रह्मैव त्वं त्रिधोर्ध्वस्त्वं गतिस्त्वं..	२ रुद्रो. ४२
भस्मालेपः सर्वगात्रेषु नित्यं रुद्राक्षाणां धारणं लिङ्गपूजा। पञ्चाक्षर्याः सञ्जपश्चित्तवृत्त्या रुद्राध्यायः पञ्चकृत्यं न चान्यत्	निर्लेपो. २
भावग्राह्यो ह्यनीडात्मा भावाभावकरः शिवः	२ देव्यु. १८
भाव्यो गुरुः शिव एव प्रधानः परात्परः श्रुतिसन्दोहवेद्यः	भक्तियो. ४
भुवो वायवेऽन्तरिक्षाय स्वाहा	महाना. ७।२
भूतग्रामशरीरेषु नश्यत्सु न नशाम्यहम्	ना. म. ३७
मकारे संस्थितो रुद्रः	ब्र. वि. ७
मत्तः सर्वं सम्भवति जगत्स्थावरजङ्गमम्। अक्षरं च क्षरं चैव..	ना. म. ३१
मनो हि परमं भूतं तदव्यक्ते प्रलीयते। अव्यक्तं पुरुषे..	ना. म. १९
मया सृष्टः पुरा ब्रह्मा मां यज्ञमसृजत स्वयम...मत्पुत्रत्वं च कल्पादौ	

लोकाध्यक्षत्वमव च ॥ अहङ्कारकृतं चैव नाम पर्यायवाचकम्	ना.ल. ४९–५१
महाग्रासस्त्वमेवेश मृत्युस्त्वदुपसेचनः	२ रुद्रो. ५२
माया चाहं ह्येष मायी महेशः	२ देव्यु. १८
मायावी परमानन्दस्त्यक्त्वा वैकुण्ठमुत्तमम् । स्वामिपुष्करिणीतीरे रमया सह मोदते	वें. पू. ५।२
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद	ना. म. ३४
मायां तु प्रकृति विद्यान्मायिनं तु महेश्वरम्	२ रुद्रो. ४८
मां प्रविश्य भवन्तीह मुक्ता भक्तास्तु ये मम	ना. म. ३२
मोक्षोऽसि योगोऽसि सृजसि धाता परमयज्ञोऽसि	त्रिपु. ६
य इमं विश्वं भुवनं यासि जुह्वदृषिः।	२ रुद्रो. ७०
य एतं विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवाविशन्ति	२ देव्यु. ३५
य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ	बृह. ५।५।२
य एष सम्प्रत्यास्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मा	वें. पू. ३।३
य एषोऽस्त्यवष्टम्भेनेत्यूर्ध्वमुत्क्रान्तो व्यथमानो व्यथनप्रीतस्तस्य तमः प्रणुदत्येष आत्मा	वें. पू. ३।२
यतो वाचो निवर्तन्ते...आनन्दं प्राप्नुवन्त्येते पुनरावृत्तिवर्जितम	वे. सारो. ७
यथा बिम्बादिवोद्भूतं बिम्बं तद्वन्नारायणाद्वेङ्कटेशः	वें. पू. ५।२
यथा लोहपिण्डस्त्वग्निसम्पर्काल्लोहमयो लोहगतप्रहारादीननुभवतीति तद्वद्देहेन्द्रियभूतगुणैरयं पुरुषोऽभिभूयत इव	वें. पू. ४।३
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । एकदैवमकृत्वा च...	वे. सारो. ४२
यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः । तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी	श्रुतिर. २
यदा पश्यन्ति मनसा मनीषिणो ये ब्रह्म मन्वान उपासते त्वाम्	२ रुद्रो. ७७
यदेतत्कर्णौ च पिधाय शृणोति च, यदाक्रमिष्यन् भवति नैनं घोषं तं शृणोति	वें. पू. ३।८
यद्भूतजालं निखिलं वै विसृष्टमेतादृशं त्वां न विदन्ति केचित्...	२ रुद्रो. ७४
यन्नारायणतारार्थसत्यज्ञानसुखाकृति । त्रिपान्नारायणाकारं तद्ब्रह्मैवास्मि केवलम्	नारसा. शीर्षकं
यश्छन्दसामृषभो विश्वरूपः... स मेन्द्रो मेधया स्पृणोति । अमृतस्य देवधारिणो भूयासम्	वे. सारो. २८
यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्षवस्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्	श्रुतिर. ७
यस्य त्रिपुण्ड्रं लसते ललाटे तत्र त्रिलोके लसते च सत्यम्	चिदम्बरो. ८
यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः	वे. सारो. ५४
यो देवानां प्रथमश्चोद्भवश्च विश्वाधिको देवो महर्षिः । हिरण्यगर्भं जनयामास पूर्वं	श्रुतिर. ५
योनौ रेतः सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते	सहवै. १२
यो ह खलु वा वाशितामात्रः प्रतिपुरुषं क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वोऽक्षरस्तेन चेतनेनेदं शरीरं चेतनवत्प्रतिष्ठापितम्	वें. पू. ३।५
यो ह खलु वाव अशरीर इत्युक्तः स भूतात्मा	वें. पू. ४।१
यो ह वै भगवानात्मा यथाऽन्तर्बहिर्व्याप्तः प्रसिद्धस्तथा स्वं रूपं परमं द्विधा चकार	वें. पू. ५।२

लीलामूर्ते रुद्रसंज्ञस्य शम्भोरक्ष्युत्पन्नो बीजकोशो पुराणः । रुद्राक्षाख्यः सर्वेदेवर्षिजुष्टो यस्मिञ्जुष्टे सर्वसंसारमुक्तिः	चिदम्बरो. ७
लिङ्गं सत्यं निष्कलं ब्रह्मरूपं धार्यं पूज्यं हृदये ज्योतिराद्यम् । सत्तामात्रं वाङ्मनोतीतमेतत् पञ्चात्मकं भासते येन मुक्तः	निर्लेपो. ३
विमुक्तो विशुद्धाद्वैतभावमाश्रित्य न द्रष्टा नाद्रष्टा न श्रोता नाश्रोता न वक्ता नावक्ता न कर्ता नाकर्ता नाभिमानो नानावमानः सोऽवधूतः	भक्तियो. १
विश्वभूत विश्वं त्वमेव विश्वगोप्ताऽसि पवित्रमसि	विष्णू. ८
वेदा मद्धस्ताश्चन्द्रार्कानला मन्नेत्राः	२ तारो. १
वेदपर्वतजालोत्थमन्त्रैः कूर्मोऽयमेव हि	२देव्यु. ३७
वेदशास्त्रपुराणानि पर्यवस्यन्ति शङ्करे । तावत्तेषां समभ्यासो यावत्तद्भक्तिसम्भवः	चिदम्बरो. ११
वेदान्तसारसर्वस्वं यो जानाति स ईश्वरः	वे. सारो. ५९
व्यष्टिस्वरूपः प्रणवस्तदेतत्संसेवमानो न पुनर्भवे स्यात्	चिदम्बरो. ९
शकटमिवाचेतनमिदं शरीरं	वें. पू. ३।४
शब्दस्पर्शादयो ह्यर्था अनर्था इव ते..	वें. पू. ४।६
शम्भुः साक्षादद्वयात्मा स एव रहस्यमेतन्न विदन्ति लोकाः	चिदम्बरो. १०
शरीरमिदं मैथुनादेवोद्भूतं...	वें. पू. ४।४
शरीरमेतद्घटवद्विदित्वा चिदम्बरं नित्यमीशं विदित्वा । मृत्युं तीर्त्वा सर्वपापं विहृत्य शिवे परब्रह्मणि यां...तेजः	चिदम्बरो. १२
शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम्	वे. सारो. २५
शं न इन्द्रा पूषणा वाजसातौ शमिन्द्रा सोमा सुविताय शं योः [प्रवर्ग्या. ११+ वा. सं.३६।११	ऋ. मं.
शं नः कनिक्रदद्देवः पर्जन्यो	प्रवर्ग्या. १०
शं नः कुरु प्रजाभ्योऽभयंनः पशुभ्यः	प्रवर्ग्या. २२
शाश्वतश्च स्थिर ईशः स्वतन्त्रः स्वमहिम्नि तिष्ठत्यनेनेदं शरीरं चेतनवत्प्रतिष्ठापितम्	वें. पू. ३।५
शांतिरेव शांतिः सा मा शांतिरेधि	प्रवर्ग्या. १७
शिवद्रोही शिवभक्तैर्विनिन्द्यः शिवप्रसादे च पराङ्मुखेन । दात्रोस्तस्मिन्मदमात्सर्यं एतान्नियुञ्जीत भगवान्नीलकण्ठः	निर्लेपो. १२
शिवध्याने शिवपूजाप्रसङ्गे रुद्राक्षाणां धारणे भस्म धार्यम्	निर्लेपो. ११
शिवः प्राणः शिवभक्तस्य सेवा शिवप्रसङ्गे मतिरस्य सर्वदा । शिवप्रसादस्य धृतिर्निरन्तरं शिवादन्यद्देवविचिन्तनं न	भक्तियो. २
शिवे भक्तिर्जायते पुण्यलेशाद्भक्तिमूलं सर्वसंसारमुक्तेः	चिदम्बरो. ५
शिवो हि कर्ता जगतामनादिर्न जानते यं श्रुतयोऽपि सम्यक्	चिदम्बरो. २
स एव काले भुवनस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शांतिमत्यन्तमेति	श्रुतिर. १०
स एष दहराकाशमादित्यरूपः शरीरमित्थं रथीकृत्य स्वयं रथिको भूत्वैवमेव पिण्डब्रह्माण्डरथरथिको बभूव	वें. पू. ३।१०
स एष पञ्चधात्मानं विभज्य निहितो गुहायां मनोमयोऽशरीरो भारूपः सत्यसङ्कल्प आत्मा दिव्यशरीरः श्रीवेङ्कटेश इति	वें. पू. ३।८
स एष शुद्धः पूतः शान्तो प्राणोऽनिशमात्मा नो ज्ञेयः	वें. पू. ३।९
स ओङ्कारो महादेवः स विष्णुः स च तारकः । नातः परं जगद्भाति यस्य भासा निरन्तरम्	चिदम्बरो. १३

स जीवः परिसंख्यातः शेषः सङ्कर्षणः प्रभुः	ना. म. २५
सदानन्दं परमानन्दं...परमपदं वेङ्कटेशाख्यं वैष्णवं यद्गत्वा न निवर्तन्ते योगिनः	वेङ्कटो. ५
स प्रजापतिरेकः पुष्करपर्णे समभवद्भगवतोऽस्यान्तर्मनसि कामः समवर्तत इदं सृजेयमिति	वेङ्कटो. १
समग्रीवशिरःकायः संवृतास्यः सुनिश्चलः	वराहो. ५।३२
स यः सायं प्राश्नीयात्सोऽस्य सायं होमः	कठश्रु. २१
सर्वमोङ्कार एव [माण्डू. १+	नृ. पू.२।२+४।२
[+नृसिंहो. १।२+	रामो. २।१
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः	श्रुतिर. ८
स वा एष आत्मेहात्मनिवसितानि तैः कर्मफलैः परिभूयमान इव शरीरे वा विचरति	वैं. पू. ३।११
स वा एष शुद्धः स्थिरो चलसालेपोऽव्यग्रो प्रेक्षकवदवस्थितः	वैं. पू. ३।१२
स वा एषोऽभिभूतः परकृतैर्गुणैरित्यंशाभिभूतत्वात्सम्मूढः प्रयातः सम्मूढत्वादात्मानं प्रभुं भगवन्तं कारयितारं नापश्यत्	वैं. पू. ४।२
स वा एषोऽस्य हृदन्तरे तिष्ठन्नकृतार्थो मन्यते	वैं. पू. ३।९
स वा योऽयं हृद्यन्तःपुरुषो भगवान् वेङ्कटेश्वरः श्रियो वासुदेवात्मा	वैं. पू. ३।१०
स विश्वकृद्विश्वविदात्मयोनिर्यः..	निर्लेपो. १२
स सोमः स सत्यं स विष्णुः स रुद्रः स देवः स सर्वम्	वेङ्कटो. ५
सहस्रबाहो सहस्रमूर्ते सहस्रास्य सहस्रसम्भव विश्वं त्वामाहुः	विष्णू. १
सहस्रशीर्षा पुरुषः सहस्राक्षः...	श्रुतिर. ९
सुमित्रिया न आप ओषधयः सन्तु	प्रवर्ग्या. २३
सोऽहं ममेदमित्येवं मन्यमानो निबद्धो ह्यात्मनाऽऽत्मानं जालेनेव खचरः कृतस्वानुचरैः पक्षैरभिभूयमानः परिभ्रमति	वैं. पू. ४।२
स्वधर्म एव सर्वं धत्ते	वैं. पू. ४।८
स्थविर हिरण्यगर्भ नारायण... स्वयम्भूर्भूतादिर्महाभूतोऽसि	विष्णू. ७

इति परिशिष्टं समाप्तम् ।



SWAMI. BRAHMAVIDYANANDA